6. T_1 इत विन्ध्य° for इति विन्ध्य°. 7. B om. स्वरात्. K S तकारादेशो for तकारो. K झडिति for झटिति. B S पिअ त्ति for पिओ त्ति. 8. Before शोः G adds अच इत्यस्य षष्ठ्यन्तविपरिणामः. B om. लुप्तयवरशोः. B परस्य for स्वरस्य. B T उपर्यधोभावेन वर्तमानानां for उपर्यधो वा वर्त°. B T_1 om. यवरशषसानां. K लोपो भवति for लोपे सति. T_2 ये अविशिष्टाः for येऽवशिष्टाः. G कासओ; T कासपो. B T वस्य लोपे for वलोपे. B वीससिइ for वीससइ. B सप्फासं for संफासो. After दूसासणो S adds सुदर्शनः सुदासणो. G विष्वाणं वीसाणं for विष्वाणः वीसाणो.

उष्मः ऊसो । विस्रम्भः वीसम्भो ॥ सलोपे—निस्सहः णीसहो ॥ बहुलाधिकारा-ल्लोपे कचिदन्यस्याच आदेर्दीर्घः । जिह्वा जीहा ॥ ' दीर्घात्र ' [१·४·८७] इति प्रतिषेधात् ' शेषादेशस्याह्वोऽचोऽखोः ' [१·४·८६] इति सूत्रोक्तं द्वित्वं न भवति ॥ ८ ॥

हे दक्षिणेऽस्य ॥ ९ ॥

दिरित्यनुवर्तते । दक्षिणशब्दे अस्य अवर्णस्य दीर्घो भवति हे क्षस्य हकारे सति । दाहिणो ॥ हे इति किम् । दक्खिणो ॥ ९ ॥

तु समृद्धयादौ ॥ १० ॥

अस्येत्यनुवर्तते । समृद्धयादिषु शब्देषु आदेरवर्णस्य दीर्घो भवति तु । सामिद्धी समिद्धी समृद्धिः । पाडिसिद्धी पडिसिद्धी प्रतिसिद्धिः । सारिच्छो सरिच्छो सदृक्षः। माणंसी मणंसी मनस्वी । पासुत्तो पसुत्तो प्रसुप्तः । पाडिप्फद्धी पडिप्फद्धी प्रतिस्पर्धी । पाडिवआ पडिवआ प्रतिपत् । पावासू पवासू प्रवासी । आहिआई अहिआई अभिजातिः । पाअडं पअडं प्रकटम् । पाअअं पअअं प्रकृतम् । पासिद्धी पसिद्धी प्रसिद्धिः । पारकेरं परकेरं पारक्कं परक्कं परकीयम् । चाउरन्तं चउरन्तं चतुरन्तम् । आफंसो अफंसो अस्पर्शः । पावअणं पवअणं प्रवचनम् । पारोहो परोहो प्ररोहः । इत्यादि ॥ १० ॥

K adds भोजनं after वीसाणो. B T_2 वीसं; T_1 वीसी for वीसुं. G om. सलोपे. S पिकस्वरः पिकासरो for विकस्वरः विआसरो. T अन्यस्य च for अन्यस्याचः. 9. G हि for हे in the Sūtra and Com. T दक्षिणे अस्य for दक्षिणेऽस्य in the Sūtra. K हे क्षस्य for the Sūtra. 10. B om. शब्देषु. BT माणंसिणी मणंसिणी मनस्विनी for माणंसी...मनस्वी. BT पाडिप्पद्धी पडिप्पद्धी; G प्रतिस्पर्द्धिः; T_2 पाडिप्पत्थी पडिप्पत्थी for पाडिप्फद्धी पडिप्फद्धी. B T आभिआई अभिआई for आहिआई अहिआई. K S om. पाअडं पअडं प्रकटम्. G om. पाअअं पअअं प्रकृतम्. B om. पारक्कं परक्कं. K reads परकेरं twice for परक्कं. B T आपंसो अपंसो for आफंसो अफंसो. B T add: प्रसिद्धिसदृक्षमनस्विनीप्रसुप्तप्रवासिचतुरन्ताः । अभिजात्यस्पर्शप्रवचनप्ररोहपरकीयाः । प्रतिपत्प्रकटप्रकृताः सह प्रतिस्पर्धिना समृध्यादिः.

स्वप्नादाविल् ॥ ११ ॥

स्वप्नादिषु शब्देष्वादेरवर्णस्य इत्वं भवति । लित्वान्नित्यम् । सिविणो सिमिणो स्वप्नः । विअणं व्यजनम् । विलिअं व्यलीकम् । किविणो कृपणः । मिइङ्गो मृदङ्गः । ईसि ईषत् । वेडिसो वेतसः । दिण्णं दत्तम् । उत्तिमो उत्तमः । मिरिअं मरिचम् ॥ बहुलाधिकाराण्णत्वाभावे दत्ते तु इत्वं न भवति । दत्तं ॥ ११ ॥

पक्काङ्गारललाटे तु ॥ १२ ॥

पक्क अङ्गार ललाट इत्येतेषु आदेरस्य इत्वं भवति तु । पिक्कं पक्कं । इङ्गारो अङ्गारो । णिडालं णडालं ॥ १२ ॥

सप्तपर्णे फोः ॥ १३ ॥

सप्तपर्णे फोः द्वितीयस्य इत्वं भवति तु । छत्तिवण्णो छत्तवण्णो ॥ १३ ॥

मध्यमकतमे च ॥ १४ ॥

चकारः फोरित्यस्यानुवृत्त्यर्थम् । मध्यमकतमयोर्द्वितीयस्याच इत्वं भवति । पृथग्योगान्नित्यम् । मज्झिमो । कइमो ॥ १४ ॥

हरे त्वी ॥ १५ ॥

हरशब्दस्यादेरच ईत्वं भवति तु । हीरो । हरो ॥ १५ ॥

उल् ध्वनिगवयविष्वचो वः ॥ १६ ॥

ध्वनिगवयविष्वक्शब्देषु वकारसंबन्धिनः अवर्णस्य उत्वं लिद्भवति । झुणी । गउओ । वीसुं ॥ १६ ॥

---

11. B T विलीअं for विलिअं. G मुइंगो; T मइंगो for मिइङ्गो. After मरिचम् G adds इत्यादि. B S T om. दत्ते तु. S om. दत्तं. After दत्तं B T add : वेतसकृपणमृदङ्गोत्तमदत्तेषव्यलीकमरिचाश्च । व्यअन (व्यजन ?) मिति स्वप्नादिर्भाषाविद्भिः समाख्यातः. 12. G अवर्णस्य; K S अकारस्य for अस्य. T_2 पंकं पिंकं for पिक्कं पक्कं. G K इङ्गालो अङ्गालो for इङ्गारो अङ्गारो. T णीडाळं for णिडालं. 13. T_1 सप्तवर्णे in the Sūtra and Com. for सप्तपर्णे. S छत्तिपण्णो छत्तपण्णो for छत्तिवण्णो छत्तवण्णो. 14. G °नुवृत्यर्थः; K S °नुकर्षणार्थम् for °नुवृत्त्यर्थम्. T द्वितीयस्यास्य for द्वितीयस्याच. G इद्भवति for इत्वं भवति. K S पृथग्योगो नित्यार्थः; T पृथक्प्रयोगान्नित्यम्. 15. T_1 त्वि; T_2 त्व for त्वी in the Sūtra. G अवर्णस्य; T अस्य for अच. 16. B T °विष्वचि for °विष्वचो in the Sūtra. B T अस्य for अवर्णस्य. B T भुणी; S झाणि for झुणी. B T गउआ; K गवुओ for गउओ.

ज्ञो णोऽभिज्ञादौ ॥ १७ ॥

उत्वमनुवर्तते । अभिज्ञादिषु ज्ञकारादेशस्य णस्य संबन्धिनः अवर्णस्य उत्वं भवति । अहिण्णू अभिज्ञः । सव्वण्णू सर्वज्ञः । आगमण्णू आगमज्ञः । कअण्णू कृतज्ञः ॥ ण इति किम् । अहिज्जो अभिज्ञः ॥ अभिज्ञादाविति किम् । पण्णो प्राज्ञः । अहिण्णा अभिज्ञा ॥ येषां ज्ञादेशणकारसंबन्धिनः अस्य उत्वं दृश्यते तेऽभिज्ञादयः ॥ १७ ॥

स्तावकसास्ने ॥ १८ ॥

स्तावकसास्नाशब्दयोरादेरस्य उत्वं भवति । थुवओ । सुण्हा ॥ १८ ॥

चण्डखण्डिते णा वा ॥ १९ ॥

चण्डखण्डितशब्दयोर्णकारेण सहितस्यादेरवर्णस्य उद्भवति तु । चुडं चण्डं । खुडिओ खण्डिओ ॥ १९ ॥

प्रथमे प्थोः ॥ २० ॥

प्रथमशब्दे पकारथकारसंबन्धिनोऽवर्णस्य युगपत्क्रमेण च उत्वं भवति तु । पुढुमं पढुमं पुढमं पढमं ॥ २० ॥

आर्यायां र्यः श्वश्र्वामूल् ॥ २१ ॥

श्वश्रूवाचिन्यार्याशब्दे र्यकारसंबन्धिनोऽवर्णस्य उत्वं लिद्भवति । अज्जू ॥ श्वश्र्वामिति किम् । अज्जा माता ॥ २१ ॥

---

17. S अस्य for अवर्णस्य. G लिद्भवति for भवति. B K T अभिण्णू for अहिण्णू. B T आअमण्णू for आगमण्णू. S अभिजो for अहिज्जो. G om. अभिज्ञादाविति किम् । पण्णो प्राज्ञः । अहिण्णा अभिज्ञा. B T अहिण्णो अभिज्ञः for अहिण्णा अभिज्ञा. T एषां for येषां. 18. G लिद्भवति for भवति. T_3 थुवयो for थुवओ. 19. G अस्य for अवर्णस्य. G K उत्वं वा भवति for उद्भवति. B S om. तु. After चण्डं K S add खुडं खंडं. T_2 खुडिअं खंडिअं for खुडिओ खण्डिओ. 20. B पथोः for प्थोः in the Sūtra. K पकारथकारयोः; S ष्टोः for °थकारसंबन्धिनोः. B S om. तु. B T पुडुमं पडुमं पुडमं पडमं; S पुढुमं पठुमं पुठमं पठमं; K पुडुमं for पुढुमं etc. 21. B S यकार° for र्यकार°. T_1 अम्मू; T_2 अंजू for अज्जू. B om. माता.

आसारे तु ॥ २२ ॥

आसारे आदेरवर्णस्य ऊत्वं भवति तु । ऊसारो आसारो ॥ २२ ॥

तोऽन्तर्येल्॥ २३ ॥

अन्तर्‌शब्दे तकारसंबन्धिनोऽवर्णस्य एत्वं लिद्भवति । अन्तःपुरम् अन्तेउरं । अन्तश्चारी अन्तेआरी ॥ क्वचिन्न भवति । अन्तर्गतम् अन्तग्गअं । अन्तोवीसम्भणिवेसिआण अन्तर्विश्रम्भनिवेशितानाम् ॥ २३ ॥

पारावते तु फोः ॥ २४ ॥

पारावतशब्दे फोर्द्वितीयस्यास्य एत्वं भवति तु । पारेवओ पारावओ ॥ २४ ॥

उत्करवल्लीद्वारमात्रचः ॥ २५ ॥

उत्करवल्लीद्वारशब्देषु मात्रच्प्रत्यये आदेरवर्णस्य एत्वं वा भवति । उक्केरो उक्करो । वेल्ली वल्ली । देरं दारं । पक्षे दुआरं ॥ मात्रच्-एत्तिअमेत्तं एत्तिअमत्तं एतावन्मात्रम् ॥ बहुलाधिकारान्मात्रशब्देऽपि । भोअणमेत्तं भोजनमात्रम् ॥ २५ ॥

शय्यादौ ॥ २६ ॥

शय्यादिष्वादेरवर्णस्य एत्वं भवति । पृथग्योगान्नित्यम् । सेज्जा शय्या । एत्थ अत्र । गेज्झं ग्राह्यम् । गेन्दुअं कन्दुकम् ॥ २६ ॥

त्वार्द्रे उदोत् ॥ २७ ॥

आर्द्रशब्दे आदेरवर्णस्य उत्वमोत्वं च वा भवतः । उल्लं ओल्लं । पक्षे अल्लं अद्दं । बाहसलिलप्पवहेण ओल्लेइ, बाष्पसलिलप्रवाहेणार्द्रयति ॥ २७ ॥

---

22. Before माता G adds संस्कृते. 23. S एत् for एल् in the Sūtra. S om. लित्. K अंतेचारि for अन्तेआरी. After अन्तेआरी B adds अन्तसहम् अन्तेसहं. B अन्तव्वीसम्भ°; Gp अन्तावीसम्भ° for अन्तोवीसम्भ°. 24. K पारावते for पारावतशब्दे. 25. B °द्वारमात्रचि for °मात्रचः in the Sūtra. T °द्वारशब्दे for °द्वारशब्देषु. G °प्रत्ययेऽपि आदे° for °प्रत्यये चादे°. T₁ om. उक्करं. G दुआरं; S वेरं, पक्षे वेरं, वारं दुआरं for वेल्ली... दुआरं. G om. मात्रच्. B S om. एत्तिअमत्तं. G om. बहुलाधिकारात्. 26. After एत्वं T₁ adds नित्यं. T गेंडुअं for गेन्दुअं. 27. B S T वार्द्रे for त्वार्द्रे in the Sūtra. S इदोत् for उदोत् in the Sūtra. S इत्वं for उत्वं G भवति for भवतः. G °पवाहेण for °प्पवहेण.

स्वपि ॥ २८ ॥

उदोदित्यनुवर्तते । स्वपिधातोरादेरवर्णस्य उदोतौ भवतः । पृथग्योगा-न्नित्यम् । सुवइ सोवइ ॥ २८ ॥

ओदाल्यां पङ्क्तौ ॥ २९ ॥

पङ्क्तौ पङ्क्तिवाचिन्यालीशब्दे आदेरवर्णस्य ओत्वं भवति । ओली ॥ पङ्क्ताविति किम् । आली सखी ॥ २९ ॥

फोः परस्परनमस्कारे ॥ ३० ॥

ओदित्यनुवर्तते । परस्परनमस्कारशब्दयोः फोर्द्वितीयस्यास्य ओत्वं भवति । परोप्परं । णमोक्कारो ॥ ३० ॥

पद्मे मि ॥ ३१ ॥

पद्मशब्दे आदेरवर्णस्य मकारे परे ओत्वं भवति । पोम्मं ॥ मीति किम् । पदुमं ॥ ३१ ॥

त्वर्पौ ॥ ३२ ॥

अर्पौ अर्पयतौ धातावादेरस्य ओद्भवति तु । ओप्पेइ अप्पेइ । ओप्पिअं अप्पिअं ॥ ३२ ॥

ईल् खल्वाटस्त्यानयोरातः ॥ ३३ ॥

खल्वाटस्त्यानयोरादेराकारस्य ईत्वं लिद्भवति । खल्लीडो । ठीणं॥ संखाअ-मिति तु 'स्त्यः समः खा' [२·४·१२४] इति खादेशे क्तप्रत्ययान्ते सिद्धम् ॥ ३३ ॥

---

28. G. उदोदित वर्तते. 29. T₁ दोल्यां for ओदाल्यां in the Sūtra. B om. पंक्तौ in Com. 31. T₁ मी for मि in the Sūtra. G ओद्भवति for ओत्वं भवति. G पउमं for पदुमं. 32. B T om. अर्पौ. G: अर्पिवातौ for अर्पयतौ धातौ. Gp ओत्वं for ओद्. 33. T₁ ई for ईल् in the Sūtra. G °स्त्यान आतः for °स्त्यानयोरातः in the Sūtra. B T₁ अवर्णस्य; G आतः for आकारस्य. G om. लित्. After भवति G adds लित्वान्नित्यम्. K ठीणं थीणं; B थीणं for ठीणं. B om. तु after संखाअमिति. After खादेशे K S add कृते. S adds रूपं after क्तप्रत्ययान्ते.

इत् सदादौ ॥ ३४ ॥

आत इत्यनुवर्तते । सदा इत्यादिष्वादेराकारस्य इत्वं भवति तु । सइ सआ सदा । कुप्पिसो कुप्पासो कूर्पासः । णिसिअरो णिसाअरो निशाकरः । इत्यादि ॥ ३४ ॥

आचार्ये चो ह्रश्च ॥ ३५ ॥

आचार्यशब्दे चकारसंबन्धिन आतो ह्रो ह्रस्वो भवति । चकारादित्वं च । आअरिओ आइरिओ ॥ ३५ ॥

श्यामाके मः ॥ ३६ ॥

ह्र इत्यनुवर्तते । श्यामाके मकारस्यातो ह्रो ह्रस्वो भवति । सामओ ॥ ३६ ॥

न वाव्ययोत्खातादौ ॥ ३७ ॥

अव्ययेषु उत्खातादिषु च आदेरातो ह्रस्वो न वा भवति । अव्यये-जह जहा यथा । तह तहा तथा । अहव अहवा अथवा । व वा । ह हा इत्यादि ॥ उत्खातादिः—उक्खअं उक्खाअं उत्खातम् । कुमरो कुमारो कुमारः । खइरं खाइरं खादिरम् । बलआ बलाआ बलाका । पअअं पाअअं प्राकृतम् । चमरो चामरो चामरः । कलओ कालाओ कलादः स्वर्णकारः । हलिओ हालिओ हालिकः कृषीवलः। णराओ णाराओ नाराचः। तलविण्टं तालविण्टं तालवृन्तम् । ठविओ ठाविओ स्थापितः । पट्ठविओ पट्ठाविओ प्रस्थापितः । संठविओ संठाविओ संस्थापितः । इत्यादि ॥ केचिद् ब्राह्मणपूर्वाह्णयोरपीच्छन्ति । बम्हणो बाम्हणो । पुव्वण्हो पुव्वाण्हो ॥ ३७ ॥

---

34. B T आदित्यनुवर्तते for आत इत्यनुवर्तते. S किप्पिसो for कुप्पिसो. 35. B K T आचार्ये for आचार्यशब्दे. B G om. ह्रो. B $T_{1\cdot3}$ om. चकारादित्वं च. T_1 आकरिओ for आअरिओ. 36. B G T om. ह्रो. 37. B T अव्यये for अव्ययेषु. B T उत्खातादौ for उत्खातादिषु. B om. Sk equivalents promiscuously. After तथा G adds सिअ सिआ ' स्याद्भव्यचैत्य ' [१·४·१००] इत्यादिना इत्वम्. After तालविंटं G T add तलवेंटं तालवेंटं । तलवोंटं तालवोंटं. T_2 तलहंटं तालहंटं for तलविंटं तालविंटं. After पुव्वाण्हो B T add: उत्खाताव्ययमथवा ह हा यथातथेत्यपि च । प्राकृतकुमारचामरसंस्थापिततालवृन्तनाराचाः । प्रस्थापितसंस्थापितकलादखादिरहालिकबलाकाः । संयोगे ह्रो न स्याद् ब्राह्मणपूर्वाह्णयोर्दीर्घः.

घञि वा ॥ ३८ ॥

घञ्निमित्तो यो वृद्धिरूप आकारस्तस्यादिभूतस्य ह्रस्वो वा भवति । पुनर्वाग्रहणादुत्तरत्र न विकल्पः । पवहो पवाहो प्रवाहः । पहरो पहारो प्रहारः । पअरो पआरो प्रकारः प्रचारो वा । पत्थओ पत्थाओ प्रस्तावः ॥ क्वचिन्न भवति । रागः राओ । भागः भाओ ॥ ३८ ॥

स्वरस्य बिन्द्वमि ॥ ३९ ॥

बिन्दौ अमि द्वितीयैकवचने च परे स्वरस्य ह्रस्वो भवति । बिन्दौ—मांसम् मंसं । मांसलम् मंसलं। पांसुः पंसू। कांस्यम् कंसं। वांशिकः वंसिओ। काञ्चनम् कंचणं । लाञ्छनम् लंछणं ॥ अमि—गङ्गं । मालं । नइं । वहुं । वच्छं ॥ ३९ ॥

संयोगे ॥ ४० ॥

संयोगे परे पूर्वस्य स्वरस्य ह्रस्वो भवति । आ—आम्रम् अम्बं । ताम्रम् तम्बं । विरहाग्निः विरहग्गी । अमात्यः अमच्चो । काव्यम् कव्वं ॥ ई—मुनीन्द्रः मुणिन्दो । तीर्थम् तित्थं । शीघ्रम् सिग्घं ॥ ऊ—चूर्णम् चुण्णं । सूत्रम् सुत्तं । पूर्वम् पुव्वं ॥ ए—नरेन्द्रः णरिन्दो । म्लेच्छः मिलिच्छो ॥ ऐ—दृष्टैकस्तनपट्टम् दिट्ठेकत्थणवट्टं ॥ ओ—अधरोष्ठः अहरुट्ठो । नीलोत्पलम् णीलुप्पलं ॥ एदोतोः क्वचित्स्वरूपेणैव ह्रस्वः । एकः एॅक्को । नेत्रम् णेॅत्तं । ग्राह्यम् गेॅज्झं । स्तोकम् थोॅक्कं । तुण्डम् तोॅण्डं । इत्यादि ॥ ४० ॥

---

38. S घञनिमित्ते for °निमित्तो. B T पत्थावो for पत्थाओ. 39. B बथा for बिन्दौ. T_1 पस्सू for पंसू. T_1 om. नइं वहुं वच्छं; T_3 reads नळं बहुं पेच्छं for नइं...वच्छं. 40. B T अमच्छो for अमच्चो. B T चूर्णः चुण्णो for चूर्णं चुण्णं. B T °थणपट्टं for °थणवट्टं. B T स्वरूपेण ह्रस्वः for स्वरूपेणैव ह्रस्वः. No MS. gives any mark for short ए and ओ. B थोकं for थोॅक्कं.

त्वेदितः ॥ ४१ ॥

संयोग इति वर्तते । आदेरिकारस्य संयोगे परे एत्वं तु भवति । पेण्डं पिण्डम् । धम्मेल्लं धम्मिल्लम् । सेन्दूरं सिन्दूरं सिन्दूरम् । बेल्लं बिल्लं बिल्वम् । बेण्हू विण्हू विष्णुः ॥ क्वचिन्न भवति । चिन्ता ॥ ४१ ॥

मिरायां लित् ॥ ४२ ॥

इत इत्यनुवर्तते एदिति च । मिराशब्दे इतः एत्वं लिद्भवति । मेरा सीमा ॥ ४२ ॥

मूषिकविभीतकहरिद्रापथिपृथिवीप्रतिश्रुत्यत् ॥ ४३ ॥

मूषिकादिष्वादेरिकारस्य अकारादेशो भवति । मूषिकः मूसओ । विभीतकः वहेडओ । हरिद्रा हलद्दी । पथि पहो । अकारान्ते सत्यपि पथशब्दे पथिशब्दस्य रूपान्तरनिवृत्त्यर्थोऽयं योगः । पृथिवी पुहवी पुढवी । प्रतिश्रुत् पडंसुआ प्रतिध्वनिः ॥ ४३ ॥

रस्तित्तिरौ ॥ ४४ ॥

अदित्यनुवर्तते । तित्तिरिशब्दे रसंबन्धिन इकारस्य अत्वं भवति । तित्तिरो ॥ ४४ ॥

इतौ तो वाक्यादौ ॥ ४५ ॥

वाक्यादिभूते इतिशब्दे तकारसंबन्धिन इतः अद्भवति । इअ विअसिअ-कुसुमसरो, इति विकसितकुसुमशरः ॥ वाक्यादाविति किम् । पिओ त्ति ॥ ॥४५॥

41. BT वेण्णू विण्णू for वेण्हू विण्हू. 42. B T सोमेति यावत् for सीमा. 43. B T अकार for अकारादेशो. S पथिशब्दनिवृत्त्यर्थो for पथिशब्दस्य रूपान्तरनिवृत्त्यर्थो. B °निवृत्त्यर्थम् for °निवृत्त्यर्थो. G पडसुआ for पडंसुआ. After प्रतिध्वनिः K adds इत्यर्थः. 44. T रेफसंबन्धिनः for रसंबन्धिनः. G स्यात् for भवति. 45. G S इतो तौ for इतौ तो in the Sūtra. B T विअसिअकुमुअसरो for °कुसुमसरो. B T विकसितकुमुदसरः for °कुसुमशरः.

वेङ्गुदशिथिलयोः ॥ ४६ ॥

इङ्गुदशिथिलयोरादेरित अत्वं वा भवति। अंगुअं इंगुअं। सढिलं सिढिलं। पसढिलं पसिढिलं॥ णिम्माअं णिम्मिअं इत्येतौ निर्मातृ-निर्मिताभ्यां भविष्यतः॥ ४६ ॥

उ युधिष्ठिरे ॥ ४७ ॥

वेत्यनुवृत्तिः। युधिष्ठिरे आदेरित उत्वं वा भवति। जुहुट्ठिलो जुहिट्ठिलो ॥ ४७ ॥

द्विर्नीक्षुप्रवासिषु ॥ ४८ ॥

उत्वमित्यनुवर्तते। द्विशब्दे नीत्युपसर्गे इक्षुप्रवासिशब्दयोश्च आदेरित उत्वं भवति। पृथग्योगान्न विकल्पः॥ द्विमात्रः दुमत्तो। द्विजातिः दुआई। द्विविधः दुविहो। द्विरेफः दुरेहो। द्विवचनम् दुवअणं। दुहा वि सो सुरवहू-सत्थो, द्विधापि स सुरवधूसार्थः॥ बहुलाधिकारात्क्वचिद्विकल्पः। दुउणो विउणो द्विगुणः। दुइओ विइओ द्वितीयः॥ क्वचिन्न भवति। द्विजः दिओ। द्विरदः दिरओ। द्विधागतः दिहागओ॥ क्वचिदोत्वमपि। द्विवचनम् दोवअणं॥ नि—णुमज्जइ। निमज्जइ। णुमन्तो निमन्त्रः॥ क्वचिन्न भवति। निपतति णिवडइ॥ इक्षुः उच्छू। प्रवासी पवासू॥ ४८ ॥

---

46. T वेंगुदि° in the Sūtra and Com. T₁ अकारत्वं for अत्वं. B णिम्मअं for णिम्मिअं. G T निर्मात° for निर्मातृ°. 47. KT₁ उत् for उ in the Sūtra. B K T om. वेत्यनुवृत्तिः. B K जहुट्ठिलो जहिट्ठिलो; T₂ जुहुट्ठिरो जहट्ठिरो for जुहुट्ठिलो जुहिट्ठिलो. 48. B उत्वमनुवर्तते; T उ इत्यनुवर्तते. B T पृथग्योगान्नित्यम् for °योगान्न विकल्पः. B T द्विधाविधः दुहाविओ; K द्विधागतः विहागओ for द्विविधः दुविहो After दुउणो B T add दिउणो. T om. दुहावि...सार्थः. G द्विधागतिः दिहागई for द्विधागतः दिहागओ. B om. णुमन्तो निमन्त्रः; G notes a p णुमण्णो BT add इच्छू after इक्षुः. After पवासू B adds पावासू.

तु निर्झरद्विधाकृञोरोणा ॥ ४९ ॥

निर्झरशब्दे द्विधाकृञ्शब्दे च आदेरितो नकारेण सह ओत्वं तु भवति। ओज्झरो णिज्झरो निर्झरः । दोहाकिज्जइ दुहाकिज्जइ द्विधाक्रियते । दोहाइअं दुहाइअं द्विधाकृतम् ॥ कृञिति किम् । दिहागअं द्विधागतम् ॥ ४९ ॥

ईतः काश्मीरहरीतक्योर्लालौ ॥ ५० ॥

काश्मीरहरीतकीशब्दयोरीकारस्य आ अ इत्येतौ लितौ यथासंख्येन भवतः । कम्हारो । हरडई ॥ ५० ॥

गभीरग इत् ॥ ५१ ॥

ईत इत्यनुवर्तते । गभीरादिष्वादेरीकारस्य इत्वं भवति । गहिरो गभीरः । सिरिसो शिरीषः । आणिअं आनीतम् ॥ क्रियामीकारोऽपि दृश्यते । आणीदा भुअणब्भुएक्कजणणी [कर्पूर० १·२५], आनीता भुवनाद्भुतैकजननी॥ गहिअं गृहीतम् । विलिअं व्रीडितम् । विइओ द्वितीयः । पईविअं प्रदीपितम् । तइओ तृतीयः। जिअओ जीवन् । ओसिअन्तो अवसीदन् । पसिअ प्रसीद । वम्मिओ वल्मीकः इत्यादि ॥ तआणिं इति तु तदानींशब्दस्य 'स्वरस्य बिन्दुमि' [१·२·३९] इति ह्रस्वे सिद्धम् ॥ ५१ ॥

वा पानीयगे ॥ ५२ ॥

पानीयादिष्वादेरीकारस्य इत्वं वा भवति । पाणिअं पाणीअं पानीयम् । अलिअं अलीअं अलीकम् । करिसं करीसं करीषम् । उवणिअं उवणीअं उपनीतम् । जिअइ जीअइ जीवतीत्यादि ॥ ५२ ॥

---

49. Gp त्वीर्निर्झर°; T त्वो निर्झर° in the Sūtra. S °द्विधाकृञो in the Sūtra. B दोहाकिअं दुहाकिअं द्विधाकृतम् for दोहाइअं दुहाइअं. K om. दुहाइअं. S कृञिति for कृञिति. G om. द्विधागतम्. 50. B T यथासंख्यं for यथासंख्येन. B कंहारो; T_2 कोम्हारो for कम्हारो. 51. G इतः for ईतः in the Sūtra. $T_{1,2}$ आणीअं for आणिअं. After व्रीडितम् G adds किलिअं क्रीडितम्. B T_1 पडिवअं; T_3 पडिविअं for पईविअं. G जिअउ जीवतु; K जीअंतो for जिअओ जीवन्. T_1 पसीअ for पसिअ. 52. B T स्यात् for भवति. B पाणियं पाणीयं for पाणिअं पाणीअं T_1 करीअं for करीसं. T_1 om. उवणिअं.

उल् जीर्णे ॥ ५३ ॥

जीर्णशब्दे ईत ऊत्वं भवति । लित्वान्न विकल्पः । जुण्णं ॥ क्वचिन्न । जिण्णे भोअणमत्ते, जीर्णे भोजनमात्रे ॥ ५३ ॥

तीर्थे ह्रूल् ॥ ५४ ॥

तीर्थे ईत ऊत्वं भवति हि हकारे सति । तूहं ॥ हीति किम् । तित्थं ॥ ५४ ॥

विहीनहीने वा ॥ ५५ ॥

विहीनहीनयोरीत ऊत्वं वा भवति । विहूणं विहीणं । हूणं हीणं ॥ अनयोरिति किम् । पहीणजरमरणा ॥ ५५ ॥

एल् पीठनीडकीदृशपीयूषविभीतकेदृशापीडे ॥ ५६ ॥

पीठादिष्वादेरीत एत्वं भवति । लित्वान्न विकल्पः । पेढं । नेडं । केरिसो । पेऊसं । वहेडओ । एरिसो । आमेलो ॥ बहुलाधिकाराच्च पीठनीडयोर्विकल्पः । पीढं । नीडं ॥ ५६ ॥

त्वदुत उपरिगुरुके ॥ ५७ ॥

उपरिगुरुकयोरादेरुकारस्य अत्वं तु भवति । अवरि उवरि । गरुओ गुरुओ ॥ कप्रत्ययपरिग्रहाद्गुरौ न भवति । गुरू ॥ ५७ ॥

---

53. B T लित्वान्नित्यम् for लित्वान्न विकल्पः. After क्वचिन्न G adds भवति; T adds स्यात्. T_1 om. जिण्णे ... मात्रे. 54. G ह्रूत् for ह्रूल्. Gp तीर्थशब्दे for तीर्थे. T उत्वं for ऊत्वं. G om. भवति. T तुहं for तूहं. 55 BT तु for वा. T_1 om. विहीने and हीनम्. S वहिण॰ for पहीण॰. S ॰मलणो for ॰मरणा 56. T adds लित् after एत्वं. B लित्वान्नित्यम्; T om. लित्वान्न विकल्पः. T_1 पेढं; T_2 पेडं for पेढं. G नेड्डं for नेडं. S आपेलो for आमेलो. 57. B अद्भवति तु; T_2 अत्वं भवति तु. T_1 om. तु. G om. गुरू.

मुकुलादौ ॥ ५८ ॥

उत इत्यनुवर्तते, अदिति च । मुकुलादिष्वादेरुकारस्य अद्भवति । पृथग्योगान्न विकल्पः ॥ मउलं मुकुलम् । मउडं मुकुटम् ॥ मवुटं यद्यपि संस्कृते तथाप्ययं योगो मुकुटशब्दस्य रूपान्तरनिवृत्त्यर्थः ॥ मउरं मुकुरम् । अगरू अगुरुः। गलोई गुडूची । गरुई गुर्वी । जहुट्ठिलो युधिष्ठिरः । सोअमल्लं सौकुमार्यम् । इत्यादि ॥ बहुलाधिकारात्क्वचिदात्वमपि भवति । विद्रुतः विद्दाओ ॥५८॥

रो भ्रुकुटिपुरुषयोरित् ॥ ५९ ॥

अनयो रेफसंबन्धिन उकारस्य इत्वं भवति । भिउडी । पुरिसो । पउरिसं पौरुषम् ॥ ५९ ॥

क्षुत ईत् ॥ ६० ॥

क्षुत उत ईत्वं भवति । छीअं ॥ ६० ॥

दोदोऽनुत्साहोत्सन्न ऊच्छसि ॥ ६१ ॥

उदित्युपसर्गस्य उतः शकारसकारयोः परयोर्दो दकारेण सह ऊत्वं भवति उत्साहोत्सन्नशब्दौ वर्जयित्वा । उच्छ्वासः ऊसासो । उच्छ्वसिति ऊससइ । उद्गताः शुका यस्मिन्स उच्छुकः ऊसुओ । उत्सुकः ऊसुओ । उत्सवः ऊसओ । उत्सरति ऊसरइ । उत्सिक्तः ऊसित्तो ॥ अनुत्साहोत्सन्न इति किम् । उच्छाहो । उच्छण्णो ॥ ६१ ॥

---

58. B om. मकुटम्. B मुकुरः for मुकुरम्. B गुलूची. T गुरुई for गुर्वी. B T₁ om. अपि. B विदाओ for विद्दाओ. 59. T₁ रूत् भ्रुकुटिपुरुषयोः; T₂.₃ र इत् भ्रुकुटिपुरुषयोः for the Sūtra. B भ्रुकुटी° in the Sūtra. B T भ्रुकुटीपुरुषयोः for अनयोः. T₁ पुरीसो for पुरिसो. 60. S क्षुभ for क्षुत in the Sūtra. B इत् for ईत् in the Sūtra. After छीअं B T add पक्षे छुअं. 61. K तो तो in the Sūtra before correction. T दो तो in the Sūtra. T उतः उदित्युप°. B om. उतः. K परयोस्तकारेण before correction. B T om. दा. G om. उत्सुकः ऊसुओ; K ऊसुवो for ऊसुओ. After उच्छण्णो Gp adds शसीति किम् । ‍‍उग्गओ उग्गओ.

दुरो रलुकि तु ॥ ६२ ॥

ऊदित्यनुवर्तते । दुर् इत्युपसर्गस्य रलुकि रेफलोपे सति आदेरुत ऊद्वा भवति । दूसहो दुसहो दुःसहः । दूहओ दुहओ दुर्भगः ॥ रलुकीति किम् । दुस्सहो विरहो ॥ ६२ ॥

सुभगमुसलयोः ॥ ६३ ॥

ऊदित्यनुवर्तते । सुभगमुसलयोरुत ऊद्वा भवति । सूहओ सुहओ सुभगः । मूसलं मुसलं मुसलम् ॥ ६३ ॥

हश्चौत्कुतूहले ॥ ६४ ॥

कुतूहले आदेरुत ओत्वं भवति ह्रस्वश्च तत्संनियोगेन ऊतो ह्रस्वश्च । कोउहलं कुऊहलं कोउहल्लं कुतूहलम् ॥ ६४ ॥

स्तौ ॥ ६५ ॥

ओदिति वर्तते । स्तौ संयुक्ते परे आदेरुत ओत्वं भवति । तुण्डम् तोण्डं । पुष्करम् पोक्खरं । कुट्टिमम् कोट्टिमं । पुस्तकम् पोत्थअं । मुस्ता मोत्था । मुद्गरः मोग्गरो । पुद्गलः पोग्गलो । कुन्दम् कोन्दं । व्युत्क्रान्तम् वोक्कन्तं ॥ ६५॥

सूक्ष्मेऽद्वोतः ॥ ६६ ॥

सूक्ष्मशब्दे ऊत अत्वं वा भवति । सण्हं सुण्हं ॥ ६६ ॥

अल् दुकूले ॥ ६७ ॥

ऊत इत्यनुवर्तते । दुकूले ऊत अल् इत्यादेशो भवति । लकारो नानुबन्धः । दुअल्लं दुऊलं ॥ ६७ ॥

---

62. T om. ऊदित्यनुवर्तते. B T om. दुःसहः. B T om. दूहओ दुहओ दुर्भगः. B T om. विरहो. 63. B K S T °मुसले for °मुसलयोः in the Sūtra. K त्वित्यनुवर्तते for ऊदित्यनु°. G उद्भवति तु for ऊद्वा भवति. T_2 सूहवो for सूहओ. B T om. सुभगः. B T om. मुसलम्. 64. T_1 हश्चोत् for हश्चौत् in the Sūtra. K कुतूहलशब्दे for कुतूहले. K कोदूहलं कुदूहलं; S कोदूहलं. B om. कोउहल्लं; K कुऊहल्लं; S कोदुहल्लं for कोउहल्लं. 65. B T ओदित्यनुवर्तते for ओदिति वर्तते. After तोण्डं G K add मुण्डं मोण्डं. S पोत्थओ for पोत्थअं. B T मुक्गरः मोत्तअरो for मुद्गरः मोग्गरो. B T पुद्गरः for पुद्गलः. K S कुन्तं कोन्तं for कुन्दं कोन्दं. 67. G वोत for ऊत.

ईदुद्व्यूढे ॥ ६८ ॥

उद्व्यूढे ऊत ईत्वं वा भवति । उव्वीढं उव्वूढं ॥ ६८ ॥

उल् कण्डूयहनूमद्वातूले ॥ ६९ ॥

कण्डूयतौ धातौ हनूमद्वातूलयोश्च आदेरूत उत्वं लिद्भवति । कण्डुअइ । हणुमन्तो । वाउलो ॥ ६९ ॥

वा मधूके ॥ ७० ॥

मधूके ऊत उत्वं वा भवति । महुअं महूअं ॥ ७० ॥

इदेन्नूपुरे ॥ ७१ ॥

वेत्यनुवर्तते । नूपुरे ऊत इदेतौ वा भवतः । णिउरं णेउरं णूउरं ॥ ७१ ॥

ओल् स्थूणातूणमूल्यतूणीरकूर्परगुडूचीकूष्माण्डीताम्बूलीषु ॥ ७२ ॥

एषु ऊत ओत्वं लिद्भवति । थोणा । तोणं । मोल्लं । तोणीरं । कोप्परं । गलोई । कोहण्डी । तम्बोली ॥ बहुलाधिकारात्स्थूणातूणयोर्विकल्पः । थूणा । तूणं ॥ ७२ ॥

ऋतोऽत् ॥ ७३ ॥

आदेः ऋकारस्य अत्वं भवति । घृतं घअं । तृणं तणं । कृतं कअं । वृषभः वसहो । मृगः मओ ॥ ७३ ॥

आद्वा मृदुत्वमृदुककृशासु ॥ ७४ ॥

ऋत इत्यनुवर्तते । एषु आदेः ऋकारस्य आत्वं वा भवति । माउत्तं मउत्तं । माउअं मउअं । कासा कसा ॥ ७४ ॥

---

68. T_1 इंदूद्वृढे for the Sūtra. 69. B कण्डूयति° for कण्डूय° in the Sūtra. 72. Gp splits this Sūtra into two and so reads as follows:- ओत् स्थूणातूणे । अनयोरूत ओत्वं वा भवति । थोणा थूणा । तोणं तूणं ॥ कूर्परमूल्यकूष्माण्डताम्बूलगुडूचीतूणीरे ॥ एषु ऊत ओद्भवति । पृथग्योगान्न विकल्पः । कोप्परं । मोल्लं । कोहंडी । तम्बोलं । गलोई । तोणीरं. K कोहण्डी कोहली; T_1 कोम्हडी; T_2 कंण्डी for कोहण्डी. 74. K मृदुतादिषु; T_1 मृद्वादिषु; T_2 मृदुत्वादिषु for एषु. G T_2 माउत्तणं मउत्तणं for माउत्तं मउत्तं. K माउक्कं मउक्कं मृदुकम्; S माउकं मउकं. S काशा कशा for कासा कसा.

इल् कृपणे ॥ ७५ ॥

कृप इत्यादिषु शब्देषु आदेः ऋत इत्वं भवति । लित्वान्न विकल्पः । किवो कृपः। णिवो नृपः। किवा कृपा । किवणो कृपणः। किवाणो कृपाणः। किसो कृशः । किसाणू कृशानुः । किई कृतिः । विसो वृषः । मूसिओ मूषिकः । किसरो कृसरः विलेपविशेषः। किच्छं कृच्छ्रम्। किसओ कृषकः। तिसिओ तृषितः । इसी ऋषिः । धिई धृतिः । विंछिओ विञ्छुओ वृश्चिकः। वित्तं वृत्तम्। वित्ती वृत्तिः। पिच्छी पृथ्वी । किवा कृत्या । घुसिणं घुसृणम् । घिणा घृणा । इद्धी ऋद्धिः । समिद्धी समृद्धिः । गिद्धी गृद्धिः । विद्धकई वृद्धकपिः । छिहा स्पृहा । बिसी बृसी । हिअअं हृदयम् । उक्किट्ठं उत्कृष्टम्। मिट्ठं मृष्टं रस एव, अन्यत्र मट्ठं । दिट्ठं दृष्टम्। विइण्हो वितृष्णः । सइ सकृत् । दिट्ठी दृष्टिः । गिट्ठी गृष्टिः । सिट्ठी सृष्टिः । सिआलो शृगालः। वाहित्तं व्याहृतम् । बिंहिअं बृंहितम् । तिप्पं तृप्रम् । सिट्ठं सृष्टम् । सिङ्गारो शृङ्गारः । भिङ्गो भृङ्गः । मिओ मृगः । भिऊ भृगुः । भिङ्गारो भृङ्गारः इत्यादि ॥ ७५ ॥

शृङ्गमृगाङ्कमृत्युधृष्टमसृणेषु वा ॥ ७६ ॥

शृङ्गादिषु ऋत इत्वं वा भवति । सिङ्गं सङ्गं । मिअङ्को मअङ्को । मिच्चू मच्चू। धिट्ठो धट्ठो । मसिणं मसणं ॥ ७६ ॥

पृष्ठेऽनुत्तरपदे ॥ ७७ ॥

पृष्ठशब्दे अनुत्तरपदे ऋत इत्वं वा भवति । पिट्ठं पट्ठं ॥ अनुत्तरपद इति किम् । महिवट्ठं महीपृष्ठम् ॥ ७७ ॥

---

75. B T om. आदेः. B T लित्त्वान्नित्यम् for लित्वान्न विकल्पः. B T om. विसो वृषः. T gives Sk. equivalents at the end. Gp किसरा कृशरा. B T om. विलेपविशेषः. G किसिओ कृषिकः for किसओ कृषकः. G om. तिसिओ तृषितः. B विञ्छिओ for विञ्छिओ. B पिहो for पिच्छी. B किच्छा for किवा. G adds दुर्गा after कृत्या. B गिद्वो for गिद्धी; G गिट्ठी गृष्टिः for गिद्धी. B K T वृद्धकविः for °कपिः. B पिहा for छिहा. After दृष्टम् G adds हिअं हृतम्. B तृप्तम्. for तृप्रम्. After तृप्रम् G adds दुःखं मोघं अधर्मः पापं काष्ठं आज्यं वा. G om. मिओ मृगः. 76. B T स्यात् for भवति. 77. G पिट्ठो पिट्ठिपरिट्ठविअं; S पिट्ठं पट्ठिं; T पिट्ठो पट्ठं. B T महिपट्ठं for महिवट्ठं.

उद् वृषभे वुः ॥ ७८ ॥

वृषभे वृ इत्येतस्य उत्वं वा भवति । उसहो वसहो ॥ ७८ ॥

वृन्दारकनिवृत्तयोः ॥ ७९ ॥

उदित्यनुवर्तते । अनयोः ऋत उद्वा भवति । वुन्दारओ वन्दारओ । णिउत्तं णिअत्तं ॥ ७९ ॥

ऋत्वगे ॥ ८० ॥

ऋत्वादिषु शब्देषु आदेः ऋत उत्वं भवति । पृथग्योगान्नित्यम् । उऊ ऋतुः । उसहो ऋषभः । पाहुडं प्राभृतम् । पहुडि प्रभृति । भुई भृतिः । णिहुअं निभृतम् । परहुअं परभृतम् । विउअं विवृतम् । संवुअं संवृतम् । णिउअं निर्वृतम् । णिव्वुई निर्वृतिः । णिउत्ती निवृत्तिः । पउत्ती प्रवृत्तिः । पाउसो प्रावृट् । वुत्तन्तो वृत्तान्तः । वुन्दं वृन्दम् । वुन्दावणं वृन्दावनम् । पुहई पृथिवी । वुड्ढो वृद्धः । उज्जू ऋजुः । मुणालं मृणालम् । पुट्ठो पृष्टः । पउट्ठो प्रवृष्टः । वुट्ठी वृष्टिः । परामुट्ठो परामृष्टः । भाउओ भ्रातृकः । पिउओ पितृकः । जामाउओ जामातृकः । माउआ मातृका । इत्यादि ॥८०॥

गौणान्त्यस्य ॥ ८१ ॥

गौणपदस्य योऽन्त्य ऋत् तस्य उद्भवति । माउमण्डलं मातृमण्डलम् । माउहरं मातृगृहम् । पिउहरं पितृगृहम् । माउसिआ माउच्छा मातृष्वसा । पिउसिआ पिउच्छा पितृष्वसा । पिउवणं पितृवनम् । पिउवई पितृपतिः ॥८१॥

---

78. S इत्यस्यावयवस्य for इत्येतस्य. B T स्यात् for भवति. 79. B S T om. वा. K निवृत्तं निवर्त्तं for णिउत्तं णिअत्तं. 80. K उद् ऋतः for ऋत्वगे for the Sūtra. S हुई हृतिः for भुई भृतिः. T परीहुअं for परहुअं. B om. विउअं विवृतम्. T निउअं निवृतम् for विउअं विवृतम्. B om. णिउअं निर्वृतम्. णिव्वुई निर्वृतिः. G पुहवी for पुहई. G om. वुड्ढो वृद्धः. T उजू for उज्जू. After ऋजुः B adds तैलादित्वाद् द्वित्वम्. B T स्पृष्टः for पृष्टः. B T वुड्ढी वृद्धिः for वुड्ढी वृद्धिः. T_1 भ्रातृकं for भ्रातृकः. After मातृका B adds पाउडं प्राकृतम् । प्रत्यादित्वात्तस्य डः. 81. B T गौणस्य उपसर्जनस्य; K गौणशब्दस्य उपसर्जनपदस्य अमुख्यस्य; S गौणशब्दस्य for गौणपदस्य B T ऋकारः for ऋत्. B om. Sk. equivalents. T_1 माउमण्डणं for °मण्डलं. T_1 om. from पिउहरं down to पितृपतिः. $BT_{1,3}$ माउघरं; T_2 माइघरं for माउहरं. BT om. पिउहरं.

इदुन्मातुः ॥ ८२ ॥

गौणस्य मातृशब्दस्य ऋत इदुतौ भवतः। माइहरं माउहरं मातृगृहम् ॥ क्वचिदगौणस्यापि। माईणं माऊणं मातृणाम् ॥ ८२ ॥

वृष्टिपृथङ्मृदङ्गनप्तृकवृष्टे ॥ ८३ ॥

इदुदित्यनुवर्तते। वृष्ट्यादिषु ऋत इदुतौ भवतः। विट्ठी वुट्ठी वृष्टिः। पिहं पुहं पृथक्। मिअङ्गो मुअङ्गो मृदङ्गः। णत्तिओ णत्तुओ नप्तृकः। विट्ठी वुट्ठी वृष्टिः ॥ ८३ ॥

तु बृहस्पतौ ॥ ८४ ॥

बृहस्पतौ ऋत इदुतौ तु भवतः। बिहप्फई बुहप्फई बहप्फई ॥८४॥

उदूदोल् मृषि ॥ ८५ ॥

मृषाशब्दे: ऋत उत्वं ओत्वं ईत्वं च भवति। लित्वान्न विकल्पः। मुसा मूसा मोसा। मुसावाओ मूसावाओ मोसावाओ मृषावादः ॥ ८५ ॥

वृन्त इदेङ् ॥ ८६ ॥

वृन्ते ऋत इदेङ् वा भवति। ए ओ एङ्, इच्च एङ् च इदेङ्। इत्वमेत्वमोत्वमित्यर्थः। विण्टं वेण्टं वोण्टं ॥ ८६ ॥

ढिरादृते ॥ ८७ ॥

आदृते ऋतो ढिरादेशो भवति। आढिओ ॥ ८७ ॥

---

82. T_1 उदुन्मातुः for इदुन्मातुः in the Sūtra. T_1 मातृकाशब्दस्य for मातृशब्दस्य. B माइघरं माउघरं for माइहरं माउहरं. BT om. मातृगृहम्. BT_1 om. माऊणं. After मातृणाम् Gp adds माइआ माउआ मातृका. 83. B वुड्ढी; S उट्ठी for वुट्ठी. T_1 पीहं for पिहं. G T_1 मिइङ्गो मुइङ्गो. S उट्ठो for वुट्ठो. 84. B T om. बृहस्पतौ in Com. T_1 वीहप्पई उहप्पई for बिहप्फई बुहप्फई. 85. G भवन्ति for भवति. B T om. मूसावाओ मोसावाओ. 86. G इदेङौ वा भवतः for इदेङ् वा भवति. S om. एओ एङ्, इच्च एच्च इदेङ्. G इदेङौ for इदेङ्. T_1 विंदं वेंदं वोंदं for विण्टं etc. 87. T_1 डीरादृते; $T_{2\cdot3}$ डिरादृते for the Sūtra. T डीरादेशो for ढिरादेशो. T_1 आडीओ; T_2 आडिओ; for आढिओ.

दृप्तेऽरि ता ॥ ८८ ॥

दृप्ते ऋतः पकारतकाराभ्यां सह अरि इत्यादेशो भवति । दरिओ । दरिअसीहेण ॥ ८८ ॥

केवलस्य रिः ॥ ८९ ॥

ऋतः केवलस्य व्यञ्जनेनासंपृक्तस्य रि इत्यादेशो भवति । रिद्धी ऋद्धिः । रिच्छो ऋक्षः ॥ ८९ ॥

दृश्यक्सक्विपि ॥ ९० ॥

अक् क्स क्विप् इत्येतदन्ते दृशिधातौ ऋतो रित्वं भवति । अक्-सरिसो सदृशः ॥ क्स–सरिच्छो सदृक्षः । क्विप्–सरी सदृक् । सरिवण्णो सरिरूवो ॥ एवं एआरिसो । भवारिसो । जारिसो । तारिसो । केरिसो । एरिसो । तुम्हारिसो ॥ अक्सयोः साहचर्यात् त्यदादिविहितः क्विप् इह परिगृह्यते ॥९०॥

ऋतुऋजुऋणऋषिऋषभे वा ॥९१ ॥

एषु ऋतो रित्वं वा भवति । रिऊ उऊ । रिज्जू उज्जू । रिणं अणं । रिसी इसी । रिसहो उसहो ॥ ९१ ॥

क्लृप्त इलिः ॥ ९२ ॥

क्लृप्त इत्यत्र आदेरच्च इलि इत्यादेशो भवति । किलित्तं । किलित्तकुसुमोवआरेसु, क्लृप्तकुसुमोपचारेसु ॥ ९२ ॥

---

88. T₁ दृसेरि पता for the Sūtra. T₁·₂ दरीओ for दरिओ. T₂ अवसंतेण; T₃ दरिअवसंतेण for दरिअसीहेण. 89. T₁ रीः for रिः in the Sūtra. T री for रि. B T₁ om. रिद्धी रिद्धिः. T₁ रीच्छो for रिच्छो. 90. Bp. दृशि टक् सक् क्विपि for the Sūtra. B °क्विपि; T °सक्पि in the Sūtra. T₁ टक् for अक्. T₁ सक्. for क्स. B T₂ क्विन् for क्विप्. G om. सरी सदृक्. B T सक्क्विनोः साहचर्यात् त्यदादीत्यादिसूत्रविहितः कन् (T₁ क्प्; T₂ क्विन्) इह परिगृह्यते. 91. B T स्यात् for भवति. B T रिजू उजू for रिज्जू उज्जू. BT उणं for अणं. BT उसी for इसी. 92. B T om. किलित्तकुसुमोवआरेसु down to °पचारेसु. K °वहारेसु...°पहारेसु for किलित्त...वआरेसु...पचारेसु.

चपेटाकेसरदेवरसैन्यवेदनास्वेचस्त्वित् ॥ ९३ ॥

एषु एचः संध्यक्षराणामित्वं भवति तु। चविडा चवेडा चपेटा। किसरं केसरं केसरम्। दिअरो देअरो देवरः। सिन्नं सेन्नं ॥ दैत्यादित्वात् [१·२·१०३] सइन्नं सैन्यम्। विअणा वेअणा वेदना॥ महिला महेला इत्येतौ तत्समावेव ॥ ९३ ॥

सैन्धवशनैश्चरे ॥ ९४ ॥

एच इत्यनुवर्तते। सैन्धवशनैश्चरयोरादेरेच इत्वं भवति। पृथग्योगान्नित्यम्। सिन्धवं। सणिच्छरो ॥ ९४ ॥

त्वत्सरोरुहमनोहरप्रकोष्ठातोद्यान्योन्ये वश्च क्तोः ॥ ९५ ॥

एषु एचः अत्वं तु भवति, तत्संनियोगे यथासंभवं ककारतकारयोश्च वकारादेशः। सररुहं सरोरुहं। मणहरं मणोहरं। पवट्ठो पओट्ठो। आवज्जं आओज्जं। अण्णण्णं अण्णोण्णं॥ सिरवेअणा सिरोवेअणा इत्येतौ शिरोवेदनायाः साध्यमानसिद्धावस्थयोरेव भवतः ॥ ९५ ॥

कौक्षेयक उत् ॥ ९६ ॥

कौक्षेयक आदेरेच उत्वं भवति तु। कुच्छेअअं कोच्छेअअं ॥ ९६ ॥

शौण्डगेषु ॥ ९७ ॥

शौण्डादिष्वादेरेच उत्वं भवति। योगविभागान्न विकल्पः। सुण्डो शौण्डः। सुद्धोअणी शौद्धोदनिः। मुञ्जाअणो मौञ्जायनः। सुन्देरं सुन्दरिअं सौन्दर्यम्। सुगन्धत्तणं सौगन्ध्यम्। दुवारिओ दौवारिकः। सुवण्णिओ सौवर्णिकः। पुलोमी पौलोमी॥ इत्यादि ॥ ९७ ॥

---

93. S °केशर° in the Sūtra. 94. K S इद्भवति for इत्वं भवति. B T सणिच्चरो for सणिच्छरो. 95. B T भवति तु for तु भवति. B तत्संनियोगेन for °संनियोगे. B T कतकारयोश्च for ककारतकारयोश्च. After वकारादेशः B T add भवति. K gives Sk equivalents of all Pr. words in Com. 96. K कौक्षेयकस्य for कौक्षेयक. 97. B T₁·₃ सुंडोअणी शौण्डोदनिः for सुद्धोअणी शौद्धोदनिः. B T om. सुन्दरिअं.

गव्यउदाईत् ॥ ९८ ॥

गोशब्दे एचः अउ आई इत्येतौ भवतः। गउओ हरस्स। एसा गाई ॥ ९८ ॥

ऊ स्तेने वा ॥ ९९ ॥

स्तेने संध्यक्षरस्य ऊत्वं वा भवति। थूणो थेणो ॥ ९९ ॥

सोच्छ्वासे ॥ १०० ॥

सोच्छ्वासशब्दे एच ऊ भवति। पृथग्योगान्न विकल्पः। सूसासो ॥ ॥ १०० ॥

ऐच एङ् ॥ १०१ ॥

ऐचः ऐकारौकारयोः एङ् एकारौकारौ यथासंख्यं भवतः। ऐ-शैलः सेलो। त्रैलोक्यं तेल्लोक्कं। ऐरावणः एरावणो। कैलासः केलासो। वैद्यः वेज्जो। कैटभः केढवो। वैधव्यं वेहव्वं ॥ औ—कौमुदी कोमुई। यौवनं जोव्वणं। कौस्तुभः कोत्थुहो। कौशाम्बी कोसम्बी। क्रौञ्चः कोञ्चो। कौशिकः कोसिओ ॥ १०१ ॥

अइ तु वैरादौ ॥ १०२ ॥

ऐच इत्यनुवर्तते। वैरादिष्वादेरैच अइ इत्यादेशो भवति तु। वैरम् वइरं वेरं। वैशंपायनः वइसंपाअणो वेसंपाअणो। वैशिकम् वइसिअं वेसिअं। वैश्रवणः वइसवणो वेसवणो। चैत्रः चइत्तो चेत्तो। कैलासः कइलासो केलासो। वैतालिकः वइआलिओ वेआलिओ। कैरवम् कइरवं केरवं। दैवम् दइवं देवं। इत्यादि ॥ १०२ ॥

---

100. G K ऊद्भवति for ऊ भवति. B T पृथग्योगान्नित्यम् for ॰योगान्न विकल्पः. 101. S एच in the Sūtra and Com. for एङ्. B कइलासो for केलासो. K केडवो for केढवो. G कौशाम्बो कोसम्बो for कौशाम्बी कोसम्बी. 102. K S om. वैशंपायनः वइसंपाअणो वेसंपाअणो. G वैदेशिकं वइदेसिअं वेदेसिअं for वैशिकं...वेसिअं. After केलासो B T add वैद्यः वइज्जो वेज्जो। कैटभः कइडहो केडहो। वैधव्यं वइहव्वं वेहव्वं. After दइवं G adds दइव्वं. After देवं G adds देव्वं.

दैत्यादौ ॥ १०३॥

दैत्यादिष्वादेरैच अइ इत्यादेशो भवति ।। पृथग्योगान्न विकल्पः । दइच्चो दैत्यः । दइण्णं दैन्यम् । दइवअं दैवतम् । कइअवं कैतवम् । वइअब्भो वैदर्भः । वइसाहो वैशाखः । अइसरिअं ऐश्वर्यम् । वइअणणो वैजननः। भइरओ भैरवः । वइएसो वैदेशः । वइसाणरो वैश्वानरः । वइदेहो वैदेहः । वइसालो वैशालः । सइरं स्वैरम् । चइत्तं चैत्यम् ।। चैत्ये विश्लेषे न भवति । चेइअं ।। १०३ ।।

नाव्यावः ॥ १०४ ॥

नौशब्दे ऐचः आव इत्यादेशो भवति । णावा ।। १०४ ।।

गौरव आत् ।। १०५ ॥

गौरवे ऐच आत्वं भवति । गारवं ।। १०५ ।।

पौरगे चाउत् ॥ १०६ ॥

पौरादिषु चकाराद्गौरवे च ऐच अउ इत्यादेशो भवति । पउरो पौरः। सउरो सौरः । मउली मौलिः । कउरवो कौरवः । गउडो गौडः । कउलो कौलः । कउसलं कौशलम् । पउरिसं पौरुषम् । कउच्छेअअं कौक्षेयकम् । सउहं सौधम् । मउणं मौनम् । गउरवं गौरवम् ।। १०६ ।।

उच्चैर्नीचैसोरअः ॥ १०७ ॥

उच्चैर्नीचैःशब्दयोरैच अअ इत्यादेशो भवति । उच्चअं णीचअं ।। उच्चनीचाभ्यां कप्रत्यये सिद्धं तथापि उच्चैर्नीचसो रूपान्तरनिवृत्त्यर्थं वचनम् ।। १०७ ।।

---

103. T Bp दैत्यगेषु for the Sūtra. B T इत्ययमादेशो for इत्यादेशो. B T पृथग्योगान्नित्यम् for °योगान्न विकल्पः. B T read Sk equivalents first and Pr. word thereafter under this Sūtra. B S T वइअवणो for वइअणणो. After वैशालः G adds विशालायां भवः. B S T चैत्यविशेषे for चैत्ये विश्लेषे. 107. B सिद्धेऽपि for सिद्धं तथापि; G om. तथापि. B S T उच्चैर्नीचसोस्तु for उच्चैर्नीचसो.

ई धैर्ये ॥ १०८ ॥

धैर्ये ऐच ईत्वं भवति । धीरं । धीरं हरइ विसाओ, धैर्यं हरति विषादः ॥ १०८ ॥

वा पुआइयाद्याः ॥ १०९ ॥

पुआई इत्यादय शब्दाः स्वराद्यादेशविशेषिता वा निपात्यन्ते । (१) पुआई पिशाच उन्मत्तश्च । (२) ऊणंदिअं आनन्दितम् । (३) टोंबरो तुम्बुरुः । (४) माहिवाओ माघवातः । (५) मइकोडी शतकोटिः। (६) माइन्दो माकन्दः । (७) ओन्दुरो उन्दुरुः। (८) अलिआ आली । (९) तणसोल्लं तृणशूलम् मल्लिकेत्यर्थः । (१०) रिट्ठो अरिष्टो दैत्यः काको वा। (११) हुलिअं लघु शीघ्रमित्यर्थः । (१२) किरो किरिः । वराह इत्यर्थः । (१३) वामरोरो वामलूरः वल्मीकम् । (१४) वन्द्रं वृन्दम् । (१५) हेरिम्बो हेरम्बः । (१६) चिक्कं स्तोकम् । (१७) चलणाओहो चरणायुधः ।

---

108. BT om. धैर्यं हरति विषादः. 109. (1) HD. 6.80. B पुआयी for पुआई. (2) HD. 1.141. (3) HD. 4.3. B तोम्बरो. G टिंबरु; T_2 डोंबरो; T_3 दोंबरो for टोंबरो. (4) HD. 6.131. (5) Sk शतकोटिः (6) HD. 6.128. (7) Sk उन्दुरुः. G उंदुरो. (8) HD. 1.16. Gp. आलिआ. (9) HD. 5.6. G तणसोल्ली; 'T' तळसोल्लं तृणशून्यम् for तणसोल्लं. GT मल्लिका for मल्लिकेत्यर्थः. (10) HD. 7.6. BST अरिट्टो for रिट्ठो. S om. काको वा. (11) Sk लघुकम्. BT दरिअं for हुलिअं. (12) HD. 2.30. (13) Sk BST वामलूरो; Gp हमलूरो for वामरोरो. After वल्मीकम् BT add वसो वृक्षः, मूसिओ मूषिकः; Gp विसो वृषः मूषिकः. (14) HG. 2.79. B T वंतं वृन्तम्; Gp बिंबं वृन्दम् for वन्द्रं वृन्दम्. (15) HD. 8.72. (16) HD. 3.21. G चिक्का for चिक्कं. After स्तोकम् BT add स्पृष्टं च. (17) HD 3.7. (चलणाउहो). G चल्णाऊहो for °ओहो.

(१८) पुआइणिआ पिशाचिनी । (१९) मूसलं मांसलम् । (२०) महालवक्खो महालयपक्षः । (२१) चंचरिओ चञ्चरीकः ॥ १०९ ॥

इति श्रीमदर्हनन्दित्रैविद्यदेवश्रीपादप्रसादासादितसमस्तविद्याप्रभाव-
श्रीमत्त्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ
प्रथमाध्यायस्य द्वितीयः पादः ॥

---

(18) HD, 6.54. B उआणिआ, G पुआइणी; S पुआइणिसा; T_1 पुआइणंआ; $T_{2,3}$ पुआइणीआ for पुआइणिआ. After पिशाचिनी BT add उन्मत्ता दुःशीला च. Gp उन्मत्तादुःशील्योर्वयणिया. (19) HD. 6.1?7. After मांसलम BT add मुसलं. (20) HD. 6.127. BT महल्लअपवक्खो; S महल्लपवक्खो for महालवक्खो. (21) HD. 3.6. BT चंचरीओ for चंचरिओ. Colophon: BKS om. from °मदर्हनन्दि down to श्रीमत्; T has only प्रथमाध्यायस्य द्वितीयः पादः.

तृतीयः पादः ॥

एत् साज्झला त्रयोदशगेऽचः ॥ १ ॥

आदेरित्यनुवर्तते । त्रयोदशादिष्वादेरचः साज्झला सस्वरव्यञ्जनेन परेण सह एत्वं भवति । तेरह त्रयोदश । थेरो स्थविरः, वृद्धो ब्रह्मा वा । एक्कारो अयस्कारः। वेइल्लं विचकिलम् ॥ मुद्धविअइल्लपसूणपुञ्जा [कर्पूर० १·१९] इति च दृश्यते ॥ तेवीसा त्रयोविंशतिः, तेत्तीसा त्रयस्त्रिंशत् । इत्यादि ॥१॥

कदले तु ॥ २ ॥

एत्साज्झलेत्यनुवर्तते । कदले आदेरचः परेण सस्वरव्यञ्जनेन सह एद्भवति तु । केलं कअलं । केली कअली ॥ २ ॥

कर्णिकारे फोः ॥ ३ ॥

कर्णिकारे फोर्द्वितीयस्याचः परेण साज्झला सह एत्वं भवति तु । कण्णेरो कण्णिआरो ॥ ३ ॥

नवमालिकाबदरनवफलिकापूगफलपूतर ओत् ॥ ४ ॥

एष्वादेरचः परेण साज्झला सह ओत्वं भवति । लित्वान्न विकल्पः । णोमालिआ नवमालिका । बोरं बदरम् । णोहलिआ नवफलिका । पोफलं पूगफलम् । पोरो पूतरः, अधमो जलजन्तुर्वा ॥ ४ ॥

N. B—From this pāda onwards, variants form M are included in the Notes. 1. M आदित्यनुवर्तते. K तेरहा त्रयोदशा for तेरह त्रयोदश. BT1·2 om. वृद्धः. B वेइल्लं; M वेइल्लं पक्किलम्; T1·2 वेइलं; T3 वेइळ्ळं for वेइल्लं. BT मुद्धविअइल°; T2; °विचिकिल° for मुद्धविअइल्ल°. G °पुञ्जाई; T3 °विज्जा for °पुञ्जा. After °पुञ्जा G adds मुग्धविचकिलप्रसूनपुञ्जानि. K तेवीसं for तेवीसा. BT1 तेतीसा; T3 तेतिसा for तेत्तीसा. 2. T कदळे for कदले in the Sūtra. T1 एत्साज्झल चेत्यनुवर्तते. BMT om. स in सस्वर°. BS एत्वं भवति तु for एद्भवति तु. M om. तु. T केळं केळी कअलं कअळी for केलं ...कअली. 3. T1·2 कर्णिकारे तु फोः for the Sūtra. Gp द्वितीयाचः परेण सस्वरव्यञ्जनेन for द्वितीयस्याचः परेण साज्झला. B T om. सह. B M T तु भवति for भवति तु S T1 कण्णीआरो for कण्णिआरो. 4. K om. परेण. B om. सह. T1·2 तु भवति for भवति. BT लित्वान्नित्यम् for लित्वान्न विकल्पः. G णोहालिआ; T3 णोहणिआ for णोहलिआ. T पोफळं for पोफलं. M om. अधमो जलजन्तुर्वा.

तु मयूरचतुर्थचतुर्वारचतुर्दशचतुर्गुणमयूखोलूखलसुकुमारोदूखललवण-कुतूहले ॥ ५ ॥

मयूरादिष्वादेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओत्वं तु भवति। मोरो मऊरो मयूरः। चोत्थो चउत्थो चतुर्थः। चोव्वारो चउव्वारो चतुर्वारः। चोद्दह चउद्दह चतुर्दश। चोद्दही चउद्दही चतुर्दशी। चोग्गुणो चउग्गुणो चतुर्गुणः। मोहो मऊहो मयूखः। ओहलं उलूहलं उलूखलम्। सोमालो सुउमालो सुकुमारः। ओहलो उऊहलो उदूखलः। लोणं लअणं लवणम्। कोहलं कुऊहलं कुतूहलम्॥ मोरः संस्कृतेऽपीति केचित्, तदप्रसिद्धम् ॥ ५ ॥

निषण्ण उमः ॥ ६ ॥

निषण्णे आदेरचः परेण साञ्झला सह उम इत्यादेशो भवति तु। णुमण्णो णिसण्णो ॥ ६ ॥

अस्तोरखोरचः ॥ ७ ॥

अधिकारोऽयं 'शोः सल्' [१·३·८७] इति यावत्। यदित ऊर्ध्वमनुक्रमिष्यामः तदस्तोरसंयुक्तस्य अखोरनादेरचः परस्य भवतीति वेदितव्यम्॥ ७ ॥

---

5. B T एष्वादेः for मयूरादिष्वादेः. B $T_{1 \cdot 2}$ om. स in सस्वर°. T_3 मयूरं for मयूरः. BS चोद्दहो चउद्दहो for चोद्दह चउद्दह. G K चोद्दसी चउद्दसी for चोद्दही चउद्दही. K M सोमारो सुउमारो for सोमालो. T ओहळं for ओहलं. T_1 उळहलं for उलूहलं. T om. ओहलो उऊहलो उदूखलः. $T_{1 \cdot 2}$ कउहळं; T_3 कोउहळं for कुऊहलं. GK कश्चित् for केचित्. 6. T om. निषण्णे. B om. सह. After सह T adds निषण्णे. B T om. तु. T_1 णीसण्णो for णिसण्णो. 7. K S T_2 °क्रमिष्यते for °क्रमिष्यामः. G अनादौ वर्तमानस्याचः for अनादेरचः. Gp अचः स्वरात्परस्य for अचः परस्य.

प्रायो लुक् कगचजतदपयवाम् ॥ ८ ॥

असंयुक्तानामनादौ वर्तमानानामचः परेषां क ग च ज त द प य व इत्येतेषां प्रायो लुग्भवति । क—लोकः लोओ । शकटः सअडो । तीर्थकरः तित्थअरो ॥ ग—नगरम् णअरं । नगः णओ । मृगाङ्कः मिअङ्को ॥ च—शची सई । कचग्रहः कअग्गहो ॥ ज—गजः गओ । रजतम् रअअं । प्रजापतिः पआवई ॥ त—स्तुतः सुओ । यतिः जई । रतिः रई । रसातलम् रसाअलं ॥ द—नदी णई । मदनः मअणो । गदा गआ ॥ प—रिपुः रिऊ । विपुलम् विउलं । सुपुरुषः सुउरिसो ॥ य—जयः जयो । वियोगः विओओ । नयनम् णअणं ॥ व—लावण्यम् लाअण्णं । वडवानलः वडआणलो ॥ वग्रहणाद्बकारस्यापि । विबुधः विउहो ॥ प्रायोग्रहणात्क्वचिन्न भवति । सुकुसुमं । पआगजलं । सुगओ । अगरू । सचावं । विजणं । सुतारं । विदुरो । सपावं । समवाओ । देवो । दाणवो ॥ अस्तोरित्येव । अक्को । सग्गो । चच्चा । अज्जुणो । धुत्तो । उद्दामो । विप्पो । सव्वं ॥ अखोरित्येव । कुलं । गङ्गा । चरो । जडो । तमो । दआ । परो । वरो ॥ अच इत्येव । संकरो । संगमो । कंचणं । वंचणा । धणंजओ । अंतरं । चंदणं । कंपो । सअंवरो ॥ समासे तु वाक्यविभक्त्यपेक्षया

---

8. KS शकटं सअडं for शकटः सअडो. M om. नगरम् णअरं. After कअग्गहो B adds रचना रअणा. After पआवई B adds भजनं भअणं. After गआ B adds कदनं कअणं. After जओ B adds प्रियः पिओ. G दवानलः दआणलो for वडवानलः वडआणलो. After वडआणलो BT विविधः add विइ-(T₁उ) हो; GST om. वग्रहणाद् बकारस्यापि. After बकारस्यापि K adds ग्रहणं. After सुकुसुमं T adds कुंभजलं. T om. पआगजलं. B अगरई for अगरू. S सआवं for सचावं. After सचावं G S add सचापम्. K reads देवो दाणवो समवाओ for समवाओ देवो दाणवो. BT अंको for अक्को. After अक्को B T add ससङ्को. BT संग्गो for सग्गो. After सग्गो B adds सङ्का. BT युत्तो for धुत्तो. After विप्पो BT add सच्चं. K सव्वो for सव्वं. After सव्वं B adds अक्को सग्गो. After परो T adds परः. T om. वरो. After वरो T₃ adds. जसो । वअणं. K reads चंचलं चंचणं G पंचाणं for वंचणा. T अंतरिअं for अंतरं. B T °पदत्वमर्पाप्यते for °मपि विवक्ष्यते; M °मपि स्यात्. After भवति

भिन्नपदत्वमपि विवक्ष्यते, तेन तत्र यथादर्शनमुभयमपि भवति। सुहकरो सुहअरो सुखकरः। आअमिओ आगमिओ आगमिकः। जलअरो जलचरो जलचरः। सुअणो सुजणो सुजनः। बहुअरो बहुतरो बहुतरः। सुअहो सुहदो शुभदः सुखदो वा। इत्यादि ॥ बहुलाधिकारात् क्वचिदादेरपि भवति। चिह्नं इण्हं। स पुनः सो उणो। न पुनः ण उणो। स च सो अ॥ क्वचिच्चस्य जः। पिशाची पिसाजी ॥ ८ ॥

नात्पः ॥ ९ ॥

आदवर्णात्परस्य अनादेः पः पकारस्य लुङ् न भवति। सवहो शपथः। सावो शापः॥ आदिति किम्। विउलो विपुलः। अनादेरिति किम्। परउट्ठो परपुष्टः ॥ ९ ॥

यश्रुतिरः ॥ १० ॥

आदित्यनुवर्तते। 'प्रायो लुक्कगचज°' [१·३·८] इत्यादिना लुकि सति योऽवशिष्यते अवर्णः, सः अवर्णात्परः लघुप्रयत्नतरयकारश्रुतिर्भवति। शकटम् सयढं। आकरः आयरो। प्रकारः पयारो। आकाशः आयासो। नगरम् णयरं। सागरः सायरो। वचनम् वयणं। आचारः आयारो। रजतम् रययं। भाजनम् भायणं। प्रजापतिः पयावई। कृतम् कयं। पातालम्

B adds सहचरो सहअरो सहचरः. T_1 सहचरो सहभरो सहचरः.सुहकरोः सुखकरः. BT आअओ आगओ आगतः for आअमिओ आगमिकः. After बहुतरः B adds वित्तअरो वित्तपरो वित्तपरः, धीरअमो धीरयमो धीरतमः, गणवारो गणआरो गणवारः. G इंधं; $T_{1\cdot 2}$; इत्थं; T_3 इद्धं. G सो उण for सो उणो. G ण उण for णउणो. 9. GM om. आद्. BT om. अनादेः. BMST om. विउलो विपुल.। अनादेरिति किम्. B T परिउट्ठो परिपुष्टः for परउट्ठो परपुष्टः. 10. S आदिति वर्तते for आदित्यनुवर्तते. BMT प्रायो लुगित्यादिना for प्रायो लुक्कगचज इत्यादिना. B T प्रकाशः पआसो for प्रकारः पआरो. The Mss. have no special sign to indicate the यश्रुति, they promiscuously use य or the vowel; we follow the majority of Mss. in giving the illustrations. G om. सागरः सायरो. G om. पातालं पायालं. T reads पाताळं

पायालं । पदम् पयं । गदा गया । नादवती णायवई । नयनम् णयणं । जाया जाया । लावण्यम् लायण्णं ।। अवर्ण इति किम् । सउणो शकुनः । पउणो प्रगुणः । पउरं प्रचुरम् । राईवं राजीवम् । रई रतिः । साऊ स्वादुः । वाऊ वायुः । कई कपिः कविर्वा ।। आदित्येव । विअडं विकटम् । देअरो देवरः ।। क्वचिद्भवति । पियइ पिबति ।। १० ।।

कामुकयमुनाचामुण्डातिमुक्तके मो ङलुक् ।। ११ ।।

कामुकादिषु मकारस्य लुग्भवति । ङानुबन्धत्वाच्छेषस्य स्वरस्य सानुनासिक उच्चारः । कामुकः काउँओ । यमुना जउँणा । चामुण्डा चाउँण्डा । अतिमुक्तकम् अइउँतअं ।। क्वचिद् अइमुत्तअं अइमुंतअं इति च दृश्यते ।। ११ ।।

खोऽपुष्पकुब्जकर्परकीले कोः ।। १२ ।।

'उकारेणानुबन्धेन स्ववर्ग्याः परिगृह्यन्ते' इति व्याकरणान्तरे सिद्धम् । यथा कुः कवर्गः । चुः चवर्गः । एवं टुतुपवः ।। अपुष्पवाचिनि कुब्जशब्दे कर्परकीलयोश्च कोः कवर्गस्य खो भवति । खुज्जो ।। पुष्पे तु- बन्धेउं कुज्जपसूणं ।। खप्परं । खीलओ ।। १२ ।।

पाआळं. G om. पदं पयं. T_1 पादं for पदं. G om. नादवती णाअवई. K S om. लावण्यम् लायण्णं. G पउओ प्रचुरः for पउरं प्रचुरम. G T om. कविर्वा. G दिअरो for देअरो. T पीअइ for पियइ. 11. G °नासिकोच्चारः. The Mss. have no sign for अनुनासिक; they use अनुस्वार for it. B अतिमुक्तकः for अतिमुक्तकम्. B अइउंत्तओ; G अणिउँतअं; S अतिउत्तकं; T अइउंतकं for अइउँतअं. B अइमुत्तअं for अइमुत्तअं. BT om. अइमुंतअं; B अइमुत्तअं for अइमुंतअं. B T om. अइमुंतअं; S अइउत्तअं for अइमुंतअं. 12. M कोः कवर्गस्य कुचुटुतुपु इति व्याकरणान्तरसिद्धत्वात् for उकारेण... सिद्धम्. B °कूर्पर°; T_1 कर्पूर° for °कर्पर° in the Sūtra and Com. BT प्रसिद्धम् for सिद्धं. BT टुतुपुपु; S टु तु पु for टुतुपवः. B बन्धुअ;K बन्धूअ for बन्धेउं. BT खप्परो for खप्परं. B खिलिओ; S खिलओ; T_1 खीदो; T_2 खलओ for खीलओ.

छागशृङ्खलकिराते लकचाः ॥ १३ ॥

कोरित्यनुवर्तते । शृङ्खलकिरातेषु कवर्गस्य ल क च इत्येते यथासंख्यं भवन्ति । छागः छालो । छागी छाली । शृङ्खलम् संकलं । किरातः चिलाओ । पुलिन्दपर्याय एव । कामरूपिणि तु नेष्यते । नमिमो हरकिराअं ॥ १३ ॥

वैकादौ गः ॥ १४ ॥

एकादिषु कोर्गकारो वा भवति । एगो । पक्षे एक्को एओ । आगारिसो आआरिसो आकर्षः । लोगो लोओ लोकः । असुगो असुओ असुकः । तित्थगरो तित्थअरो तीर्थकरः । उज्जोअगरो उज्जोअअरो उद्योतकरः । सावगो सावओ श्रावकः । अमुगो अमुओ अमुकः । आगारो आआरो आकारः । इत्यादि ॥ १४ ॥

खोः कन्दुकमरकतमदकले ॥ १५ ॥

एषु खोरादेः कवर्गस्य गो भवति । पृथग्योगान्न विकल्पः । गन्दुओ कन्दुकः । मरगअं मरकतम् । मदगलो मदकलः ॥ १५ ॥

पुन्नागभागिनीचन्द्रिकासु मः ॥ १६ ॥

एषु कोर्मो भवति । पुण्णामो । भामिणी । चन्दिमा ॥ १६ ॥

शीकरे तु भहौ ॥ १७ ॥

शीकरे कवर्गस्य भकारहकारौ तु भवतः । सीहरो सीभरो सीअरो ॥ १७ ॥

---

13. G लकचं for लकचाः in the Sūtra. G इत्येतत् for इत्येते. G T भवति for भवन्ति. G $T_{2\cdot3}$ om. छागी. B° रूपिणस्तु for °रूपिणि तु. 14. S उद्योगकरः for उद्योतकरः. M om. इत्यादि. 15. M कुसुदक°; T_1 कन्तुक° for कन्दुक° in the Sūtra. M T °योगान्नित्यम् for °योगान्न विकल्पः. G गेन्दुअं; S गंदअं; T गंदुअं for गन्दुओ. G मयगलो for मदगलो. 16. B °भगिनी° for भागिनी° in the Sūtra. G T पुण्णामाइं वसन्ते for पुण्णामो. 17. M श्रीकरे तु हभौ; S शिखरे तु हभौ for the Sūtra. B T कोः for कवर्गस्य. K S हभौ for भकारहकारौ. S सिहरो सिखरो for सीहरो ...सीअरो.

ऊत्वे दुर्भगसुभगे वः ॥ १८ ॥

अनयोरुत ऊत्वे सति कोर्वकारो भवति । दूहवो । सूहवो ।। ऊत्व इति किम् । दुहओ सुहओ ॥ १८ ॥

निकषस्फटिकचिकुरे हः ॥ १९ ॥

एषु कवर्गस्य हत्वं भवति । णिहसो । फलिहो । चिहुरो ।। चिहुरः संस्कृतेऽपीति भट्टाचार्यः ॥ १९ ॥

खघथधभाम् ॥ २० ॥

ह इति वर्तते । असंयुक्तानामनादौ वर्तमानानामचः परेषां ख घ थ ध भ इत्येतेषां प्रायो हकारो भवति । ख—शाखा साहा । मुखम् मुहं । लिखति लिहइ ॥ घ—मेघः मेहो । जघनम् जहणं । श्लाघते सलाहइ ॥ थ—नाथः णाहो । रथः रहो । मिथुनम् मिहुणं । कथयति कहेइ ॥ ध—साधुः साहू । सुधा सुहा । बाधते बाहइ ॥ भ—शुभम् सुहं । स्वभावः सहावो । स्तनभरः थणहरो । शोभते सोहइ ।। अस्तोरित्येव । सौख्यम् सोक्खं । आख्याति अक्खइ । अर्घः अग्घो । कत्थइ कथ्यते । गृद्धः गिद्धो । उद्धरति उद्धरइ । दर्भः दब्भो ।। लभ्यते लब्भइ ॥ अखोरित्येव । खगा । घटा । थणो । धणं । भरो ॥ अच इत्येव । संखो । संघो । कंथा । बंधो । रंभा ॥ प्राय इत्येव । सरिसवखलो सर्षपखलः । पलअघणो प्रलयघनः । अत्थिरो अस्थिरः । जिणधम्मो जिनधर्मः । पणट्ठभवो प्रनष्टभवः ॥ २० ॥

---

18. BKST सुभगदुर्भगे in the Sūtra. T_1 वा for वः in the Sūtra. 19. KS कोः for कवर्गस्य. After णिहसो BT add णीहसो. After चिहुरो K adds चिकुरः. G दुर्गाचार्यः for भट्टाचार्यः againist Mss. on the authority of हेमचन्द्र; T आहुराचार्याः. 20. K लाहइ for सलाहइ BT कहअइ; G कहइ for कहेइ. B K T सुहावो; G सहाओ for सहावो. T सुक्खं for सोक्खं. After उद्धरइ T adds उद्धइ उद्धाइ. GK खमो; S खक्खो for खगो. G K S घंटा for घटा. G थेणू; T_1 घणो for थणो. T om. अत्थिरो अस्थिरः. G S °भओ for °भवो. $T_{1\cdot3}$ पणट्ठपहवो प्रनष्टप्रभवः for पणट्ठभवः.

धः पृथकि तु ॥ २१ ॥

पृथक्शब्दे थस्य धकारो भवति तु । पुधं पिधं पुहं पिहं ॥ २१ ॥

चोः खचितपिशाचयोः सल्लौ ॥ २२ ॥

त्वित्यनुवर्तते । खचितपिशाचयोः चोश्चवर्गस्य सकार–द्विरुक्तल्कारौ यथासंख्यं तु भवतः । खसिओ खइओ । पिसल्लो पिसाओ ॥ स्त्रियां क्वचिज्जत्वमपि । पिसाजी ॥ २२ ॥

झो जटिले ॥ २३ ॥

चोरिति वर्तते । जटिले चवर्गस्य झत्वं तु भवति । झडिलो जडिलो ॥ २३ ॥

टोर्बडिशादौ लः ॥ २४ ॥

बडिशादौ टवर्गस्य लत्वं तु भवति । बलिसं बडिसं । गुलो गुडो । णलं णडं । चविलो चविडो । आमेलो आमेडो । णाली णाडी । वेलू वेणू । दालिमं दाडिमं । फालेइ फाडेइ ॥ बडिशगुडनडचपेटापीडनाडीवेणुदाडिमपाटीति । पाटीति पाटयति इति णिजन्तः पटिधातुरिह गृह्यते ॥ २४ ॥

स्फटिके ॥ २५ ॥

टोरित्यनुवर्तते । स्फटिके टवर्गस्य लो भवति । पृथग्योगान्नित्यम् । फलिहो ॥ २५ ॥

लरङ्कोठे ॥ २६ ॥

अङ्कोठे ठोर्लत्वं भवति । रित्त्वाद् द्वित्वम् । अङ्कोल्लं ॥ २६ ॥

---

21. S ढः; T_2 थः for धः; $T_{1\cdot3}$ damaged. G notes that all Mss. used read ढः for धः. 22. T_1 खसीओ; T_2 खस्सिओ for खसिओ. S विसालो for पिसाओ. 23. GT चोरित्यनुवर्तते. After वर्तते B adds त्विति च. T झटिलो जटिलो for झडिलो. 24. M om. बडिशादौ. Before बडिशादौ B T read त्वित्यनुवर्तते. B दाडिवं for दाडिमं. BT पालेइ पाडेइ for फालेइ फाडेइ. B °दाडिमाः, T दाडिम for °दाडिम. B T om. पाटीति. G पटधातुः for पटिधातुः 26. B अङ्कोडे in the Sūtra and Com. $T_{1\cdot2}$ अक्कोठे, for अङ्कोठे. G अङ्कोल्लतेल्लतुप्पं; Gp S अङ्कोल्लतेल्लं for अङ्कोल्लं.

ढः कैटभशकटसटे ॥ २७ ॥

कैटभशकटसटाशब्दे टोर्ढकारो भवति। केढवो। सअढो। सढा ॥ २७ ॥

ठः ॥ २८ ॥

असंयुक्तस्यानादौ स्थितस्याचः परस्य ठकारस्य ढो भवति। मठः मढो। कमठः कमढो। शठः सढो। कुठारः कुढारो ॥ अस्तोरित्येव। चिट्ठइ ॥ अखोरित्येव। ठाइ ॥ अच इत्येव। कंठो ॥ २८ ॥

पिठरे हस्तु रश्च ढः ॥ २९ ॥

ठ इति वर्तते। पिठरे ठस्य हत्वं भवति तु, तत्संनियोगे रस्य च ढत्वम्। पिहढो पिढरो पिठरः ॥ २९ ॥

लऌ डोऽनुड्डगे ॥ ३० ॥

अस्तोरखोरचः परस्य डकारस्य लकारो भवति, अनुड्डगे उड्डवादीन् वर्जयित्वा। लित्त्वान्न विकल्पः। वडवामुखम् वलआमुहं। गरुडः गरुलो। तडाकम् तलाअं। क्रीडति कीलइ ॥ अस्तोरित्येव। कुड्डं कुड्यम् ॥ अखो-रित्येव। डमरुओ डमरुकः ॥ अच इत्येव। तोंडं तुण्डम् ॥ अनुड्डग इति किम्। उड्डु। निबिडं। गउडो। नाडी। पीडिअं। नीडं इत्यादि ॥ ३० ॥

टो डः ॥ ३१ ॥

अस्तोरखोरचः परस्य टकारस्य डत्वं भवति। भटः भडो। नटः णडो। घटः घडो। घटते घडइ ॥ अस्तोरित्येव। खट्टंगं खट्वाङ्गम् ॥ अखोरित्येव। टक्को देशः ॥ अच इत्येव। घंटा ॥ क्वचिन्न भवति। अटति अटइ ॥ ३१ ॥

---

27. G °शब्देषु for °शब्दे. B ढत्वं; T डत्वं for ढकारो. B कइढवो for केढवो. B सअढं for सअढो. 28. B T वर्तमानस्य for स्थितस्य. S om. मठः मढो. 29. G इत्यनुवर्तते for इति वर्तते. S रस्य ढः; T डत्वम् for ढत्वम्. 30. BMT लित्त्वान्नित्यम for लित्त्वान्न विकल्पः B om. डमरुकः; T डमरुअं for डमरुओ. G तडी for नाडी. 31. S असंयुक्तस्यानादौ वर्तमानस्याचः परस्य for अस्तोर-खोरचः परस्य. B T टस्य for टकारस्य. After णडो B adds पटः पडो. B टक्को देशे; T टक्को टंकः for टक्को देशः.

वेतस इति तोः ॥ ३२ ॥

ड इत्यनुवर्तते । वेतसे अत इत्वे सति तोस्तवर्गस्य डो भवति । वेडिसो ॥ इतीति किम् । वेअसो ॥ अत एव विधानात् स्वप्नादौ वेतसस्य अत इत्वं वा भवतीति वेदितव्यम् ॥ ३२ ॥

प्रतिगेऽप्रतीपगे ॥ ३३ ॥

तोरित्यनुवर्तते । प्रत्यादिषु तोस्तवर्गस्य डो भवति, अप्रतीपगे प्रतीपादीन्वर्जयित्वा । प्रतिपन्नम् पडिवण्णं । प्रतिभासः पडिहासो । प्रतिहारः पडिहारो । प्रतिस्पर्द्धी पाडिप्फद्धी । प्रतिनिवृत्तम् पडिणिअत्तं । प्रतिकरोति पडिकरेइ । प्रतिपत् पडिवआ । प्रतिश्रुत् पडंसुआ । प्रतिमा पडिमा । प्रभृति पहुडि । मृतकम् मडअं । भिन्दिपालः भिण्डिवालो । पताका पडाआ । प्राभृतम् पाहुडं । बिभीतकः बहेडओ । व्यापृतः वावडो । कन्दरिका कण्डरिआ औषधविशेषः । हरीतकी हरडई । इत्यादि ॥ अप्रतिपग इति किम् । प्रतीपम् पईवं । प्रतिज्ञा पइण्णा । संप्रति संपइ । प्रतिसमयम् पइसमअं । प्रतिष्ठा पइट्ठा । प्रतिष्ठानम् पइट्ठाणं । इत्यादि ॥ ३३ ॥

दंशदहोः ॥ ३४ ॥

दंशतिदहत्योर्धात्वोस्तवर्गस्य डत्वं भवति । डंसइ । डहइ ॥ ३४ ॥

---

32. B अत इत्यनु°; T₁ स इत्यनु° for ड इत्यनु°. G इति सति for इत्वे सति. 33. B T om. तोः. T₁ पडीहासो for पडिहारो. B M T पडिप्पद्धी for पाडिप्फद्धी. B पडिणिउत्तं; T पडिणिवुत्तं for पडिणिअत्तं. B K पडिसुआ; T पडिस्सुआ for पडंसुआ. After वावडो B adds व्याहृतं वाडिडो. T₁ वावसो for वावडो. G कन्दलिका कंदलिआ for कन्दरिका कण्डरिआ. T हरीडई for हरडई. After पइसमअं B adds प्रतिसमजं पइसमजं. B K T प्रतिस्थानं for प्रतिष्ठानम्.

दम्भदरदर्भगर्दभदष्टदशनदग्धदाहदोहददोलादण्डकदने तु ॥ ३५ ॥

दम्भादिषु तवर्गस्य डो भवति तु । डम्भो दम्भो । डरो दरो । डब्भो दब्भो । गड्डहो गद्दहो । डट्ठो दट्ठो । डसणं दसणं । डड्ढो दड्ढो । डाहो दाहो । डोहलं दोहलं । डोला दोला । डण्डो दण्डो । कडणं कदनं । दरशब्दे भयार्थवृत्तावेव । अन्यत्र दरदलिअं ॥ दोहदे दम्भादिसाहचर्यादाद्यस्यैव ॥ ३५ ॥

तुच्छे चच्छौ ॥ ३६ ॥

तुच्छे तवर्गस्य चकारछकारौ तु भवतः । चुच्छं छुच्छं ॥ ३६ ॥

टल् त्रसरवृन्ततूबरतगरे ॥ ३७ ॥

एषु तवर्गस्य टकारो भवति। लित्वान्न विकल्पः। टसरो । वेण्टं । तालवेण्टं । टूबरो तूबरः शृङ्गरहितोऽनड्वान्, श्मश्रुरहितः पुरुषो वा । टगरो तगरः ओषधिविशेषो वृक्षविशेषो वा ॥ ३७ ॥

हः कातरककुदवितस्तिमातुलिङ्गे ॥ ३८ ॥

एषु तवर्गस्य हत्वं भवति । काहलो । कउहं । विहत्थी । माहुलिङ्गं ॥ मातुलुङ्गस्य तु माउलुङ्गं ॥ ३८ ॥

तु वसतिभरते ॥ ३९ ॥

अनयोस्तवर्गस्य हत्वं वा भवति । वसही वसई । भरहो भरओ ॥ ३९ ॥

---

35. S °धर for °दर° in the Sūtra. After °दर्भ° in the Sūtra MT add °गर्भ. S कद्नेषु for कदने. T₁ दर्भादिषु for दम्भादिषु. B डसणो दसणो for डसणं दसणं. After दसणं K adds डट्ठं दट्ठं. After दरदलिअं BT add अर्धदलितम्. After आद्यस्यैव G adds: बहुलाधिकारात् सड्ढो (शब्द) इति तु सिद्धम्. 36. G तकारस्य for तवर्गस्य. After छुच्छं G adds तुच्छम्. 37. M om. the Sūtra. and Com. T डसरो for टसरो. S om. तालवेण्टं. After पुरुषो वा B T add अनको वा. S om. तगरः ओषधिविशेषो वृक्षविशेषो वा. G औषध° for ओषधि°. 38. M om. the Sūtra and Com. G °मातुलिङ्गेषु for मातुलिङ्गे in the Sūtra; S °मातुलुंगे in the Sūtra. BT काहरो for काहलो. B T om. मातुलुङ्गस्य तु माउलुङ्गं. 39. M om. the Sūtra and Com. GT वसतिभरते तु for the Sūtra. KS तु for वा.

लः पलितनिम्बकदम्बे ॥ ४० ॥

एषु तवर्गस्य लो भवति वा । पलिलं पलिअं । लिम्बो णिम्बो । कलम्बो कअम्बो ॥ ४० ॥

दोहदप्रदीपशातवाहनातस्याम् ॥ ४१ ॥

दोहदे प्रपूर्वकदीप्यतिधातौ शातवाहने अतस्यां च तवर्गस्य लत्वं भवति । पृथग्योगान्नित्यम् । दोहलो । पलीवेइ । पलित्तं । सालवाहणो साला-हणो । अलसी ॥ ४१ ॥

रल् सप्तत्यादौ ॥ ४२ ॥

सप्तत्यादौ तवर्गस्य रत्वं भवति । लित्वान्नित्यम् । सप्ततिः सत्तरी । सप्तदश सत्तरह । एकादश एआरह । द्वादश बारह । त्रयोदश तेरह । पञ्चदश पण्णरह । अष्टादश अट्ठारह । गग्गरं गद्गदम् इत्यादि ॥ ४२ ॥

अद्रुमे कदल्याम् ॥ ४३ ॥

अद्रुमवाचिनि कदलीशब्दे तोः रत्वं भवति । करली ॥ अद्रुम इति किम् । कअली केली ॥ ४३ ॥

कदर्थिते खोर्वः ॥ ४४ ॥

कदर्थिते खोरादेस्तवर्गस्य वत्वं भवति । कवट्टिओ ॥ ४४ ॥

पीते ले वा ॥ ४५ ॥

व इति वर्तते । पीते स्वार्थिकलकारे सति तोर्वकारो भवति । पीवलं पीअलं ॥ ल इति किम् । पीओ ॥ ४५ ॥

---

40. G लो निम्बपलितयोः; S लःपलितबिम्बकदंबे for the Sūtra. B °नितम्ब° for निम्ब° in the Sūtra. G अनयोः for एषु. B T om. वा. B णिलम्बो णिअम्बो for लिम्बो णिम्बो. After कअम्बो G adds: इत्येतौ कडम्बकदम्बयोर्व-त्वलोपयोर्भवतः. 41. G °सात° in the Sūtra and Com. G T प्रपूर्वे दीप्यतौ धातौ; S प्रपूर्वदीप्यतौ धातौ for प्रपूर्वकदीप्यतिधातौ. B K T डोहलो for दोहलो. S om. सालाहणो. 42. KS सप्तत्यादिषु for सप्तत्यादौ. K S लित्वाच्च विकल्पः for लित्वान्नित्यम्. 43. After भवति K adds कदली. 44. T कवत्थिओ for कवट्टिओ. 45. T पीतले वा for the Sūtra. G तोरिति वर्तते; B T व इत्यनुवर्तते for व इति वर्तते. B पविलो पीअलो for पीवलं पीअलं.

डो दीपि ॥ ४६ ॥

दीप्यतौ धातौ तवर्गस्य डकारो वा भवति । डिप्पइ दिप्पइ ॥४६॥

ढः पृथिव्यौषधनिशीथे ॥ ४७ ॥

एषु तवर्गस्य ढो वा भवति । पुढवी पुहवी । ओसढं ओसहं । णिसीढो णिसीहो ॥ ४७ ॥

प्रथमशिथिलमेथिशिथिरनिषधेषु ॥ ४८ ॥

ढ इति वर्तते । प्रथमादिषु तोर्ढत्वं भवति । पृथग्योगान्नित्यम् । पढमं पुढमं । सिढिलं सढिलं । मेढी । सिढिरो । णिसढो ॥ ४८ ॥

णर्दिना रुदिते ॥ ४९ ॥

रुदिते तवर्गस्य दि इत्यवयवेन सह णत्वं भवति । रित्वाद् द्वित्वम् । रुण्णं ॥ अत्र केचिद् ऋत्वादिषु तो द इत्यारब्धवन्तः, तच्छौरसेनीमागधीविषय एव दृश्यत इति नोच्यते । प्राकृते तु ऋतुः उऊ । रजतम् रअअं । एतत् एअं । गतः गओ । आगतः आगओ । सांप्रतम् संपअं । यतः जओ । ततः तओ । कृतम् कअं । हतम् हअं । हताशः हआसो । श्रुतः सुओ । सुकृती सुकिई । निर्वृतिः णिव्वुई । तातः ताओ । कातरः काअरो । द्वितीयः दुईओ इत्यादयः प्रयोगा भवन्ति । क्वचित्संभवेऽपि 'तद्वयत्ययश्च' [३·४·६९] इति सिद्धम् ॥ ४९ ॥

---

46. T_1 धो दीपि; T_3 धो दीपिः for the Sūtra. T तवर्गस्य धो भवति for तवर्गस्य डकारो वा भवति. T धिप्पइ for डिप्पइ. 47. BT °ओषधि° in the Sūtra. T om. वा. BT ओसढी ओसही for ओसढं ओसहं. After णिसीहो T adds निशीथः. 48. T °मैथिल° for °मेथि° in the Sūtra. T_2 °शिशिर° for °शिथिर° in the Sūtra. T_1 °निषेधेषु for °निषधेषु in the Sūtra. T_3 थ इति for ढ इति. G om. पृथग्योगान्नित्यम्. G T om. पुढमं. B T om. सढिलं. T मेढिलो for मेढी. G T सिढिलो for सिढिरो. T णिसेढो for णिसढो. 49. M ना रुदिते; T_1 णो रदिना रुदिते; T_2 णो ररदिना रुदिते; T_3 णो दिना रुदितेः for the Sūtra. G om. तो. T om द B T सुकृतिः for सुकृती. After सुकिई S adds आकृतिः आकिई. B T निर्वृतः णिव्वुओ for निर्वृतिः णिव्वुई. After णिव्वुई G adds निर्वातः निव्वाओ. G om. कातरः काअरो. T om. कतरः कअरो. B T बीओ for दुईओ. B T प्रयोगा बहवः संति or प्रयोगा भवन्ति.

णो वातिमुक्तके ॥ ५० ॥

अतिमुक्तके तवर्गस्य णत्वं वा भवति । अणिउँत्तअं अइउँत्तअं अइमुत्तअं ॥ ५० ॥

गर्भिते ॥ ५१ ॥

ण इत्यनुवर्तते । गर्भिते तवर्गस्य णत्वं भवति । पृथग्योगान्नित्यम् । गब्भिणो ॥ ५१ ॥

नः ॥ ५२ ॥

अस्तोरखोरचः परस्य नकारस्य णकारो भवति । कनकं कणअं । धनं धणं । माणइ मानयति ॥ ५२ ॥

आदेस्तु ॥ ५३ ॥

न इत्यनुवर्तते । शब्दानामादेर्नकारस्य णत्वं भवति तु । नदी णई नई । नयति णेइ नेइ ॥ अस्तोरित्येव । न्यायः नाओ ॥ ५३ ॥

नापिते ण्हः ॥ ५४ ॥

नापिते नकारस्य ण्ह इत्यादेशस्तु भवति । ण्हाविओ णाविओ नाविओ ॥ ५४ ॥

पो वः ॥ ५५ ॥

असंयुक्तस्यानादौ वर्तमानस्याचः परस्य पकारस्य वकारः स्यात् प्रायः। शपथः सवहो । शापः सावो । उपसर्गः उवसग्गो । प्रदीपः पईवो । पापम् पावं । उपमा उवमा । कपिलः कविलो । कुणपम् कुणवं । कलापः कलावो ।

---

50. After अणिउँत्तअं B adds अणिउत्तअं अइंउत्तअं. 51. G णमित्यनुवर्तते. T om. पृथग्योगान्नित्यम्. G T गब्भिणो for गब्भिणो. 52. K S णो for णकारो. T_2 कणकं for कणअं. T धणअओ for धणं. B माणेइ for माणइ. T माणअेति मानयन्ति for माणइ मानयति. 53. S T णो for णत्वं. 54. G वा for तु. S om. तु. G K T om. णाविओ. 55. Before असंयुक्तस्य G reads प्रायः, but om. it at the end of the sentence. G भवति for स्यात्. K S T प्रायो भवति for स्यात्प्रायः. T कुणपः कुणवो for कुणपं कुणवं. After महीवालो B T add नरपतिः नरवई.

कपालम् कवालं । महीपालः महीवालो । गोपायति गोवाअइ । तपति तवइ ॥ अस्तोरित्येव । विप्रः विप्पो ॥ अखोरित्येव । पडइ पतति । पढइ पठति ॥ अच इत्येव । कंपइ कम्पते ॥ प्राय इत्येव । कपिः कई । रिपुः रिऊ ॥ एतेन पकारस्य प्राप्तयोर्लोपवकारयोर्यस्मिन्कृते श्रुतिसुखमुत्पद्यते स तत्र विधेयः ॥ ५५ ॥

फः पाटिपरिघपरिखापरुषपनसपारिभद्रेषु ॥ ५६ ॥

प इत्यनुवर्तते । णिजन्ते पटिधातौ परिघादिषु च पस्य फत्वं भवति । पाटयति फालेइ फाडेइ । परिघः फलिहो । परिखा फलिहा । परुषः फरुसो । पनसः फणसो ॥ फनसः संस्कृतेऽपीति केचित् ॥ पारिभद्रः फालिहद्दो ॥५६॥

नीपापीडे मो वा ॥ ५७ ॥

नीपे आपीडे च पस्य मो वा भवति । नीमो नीवो । आमेडो आवेडो ॥ ५७ ॥

रल् पापर्द्धौ ॥ ५८ ॥

पापर्द्धौ पस्य रो भवति । लित्वान्न विकल्पः । पारद्धी । पापर्द्धिर्मृगया ॥ ५८ ॥

प्रभूते वः ॥ ५९ ॥

प्रभूते पस्य वो भवति । वहुत्तं ॥ ५९ ॥

T गोपयति गोवइ for गोपायति गोवाअइ. G om. पडइ पतति. B पटइ for पडइ. T om. पढइ पठति. B कविः for कपिः. After एतेन B T add प्रकारेण. M पस्य for पकारस्य. 56. G om. पारि in °पारिभद्रेषु in the Sūtra. M °पुरुष° for परुष in the Sūtra. T om. च. T om. फाडेइ. T_2 फरिखा फलिहा for फलिहा. K फलुसो for फरुसो. S om. फनसः... केचित्. G om. इति केचित्. T_3 पारिभद्र for पारिभद्रः. K पालिभद्द; T_3 फारिभद्द for फालिहद्दो. 57. G आमेलो; T आमेलो आवेलो for आमेडो. 58. BT लित्त्वान्नित्यम् for लित्त्वान्न विकल्पः. G K om. पापर्द्धिर्मृगया.

फस्य भहौ वा ॥ ६० ॥

अस्तोरखोरचः परस्य फकारस्य भकारहकारौ यथादर्शनं व्यवस्थित-विभाषया भवतः । क्वचिद् भः । रेफः रेभो । शिफा सिभा ॥ क्वचित्तु हः । मोत्ताहलं मुक्ताफलम् ॥ क्वचिदुभावपि । सफलम् सहलं सभलं । शेफालिका सेहालिआ सेभालिआ । शफरी सहरी सभरी । गुभइ गुहइ गुम्फति ॥ अस्तोरित्येव । पुप्फं पुष्पम् ॥ अखोरित्येव । फणी ॥ अच इत्येव । गुंफइ ॥ प्राय इत्येव । कसणफणी कृष्णफणी ॥ ६० ॥

बो वः ॥ ६१ ॥

अस्तोरखोरचः परस्य बकारस्य वो भवति । शबलः सवलो । अलाबुः अलावू ॥ ६१ ॥

व्वयौ कबन्धे ॥ ६२ ॥

कबन्धे बस्य वकारयकारौ भवतः । ङित्त्वात्सानुनासिक उच्चारो वकारस्य । कबन्धः कवँधो कयंधो ॥ ६२ ॥

भिसिन्यां भः ॥ ६३ ॥

बिसिनीशब्दे बस्य भो भवति । भिसिणी ॥ ६३ ॥

वो भस्य कैटभे ॥ ६४ ॥

कैटभे भस्य वो भवति । कइढवो ॥ ६४ ॥

त्वभिमन्यौ मः ॥ ६५ ॥

व इत्यनुवर्तते । अभिमन्यौ मस्य वो भवति तु । अहिवण्णू अहिमण्णू ॥ ६५ ॥

---

60. M T_3 ह्भौ in the Sūtra. M om. वा in the Sūtra. T_3 हकारभकारौ for भकारहकारौ. BT °विभाषायां for °विभाषया. G मुत्ताहलं for मोत्ताहलं. G सोहलिआ for सेहालिआ. B गुंहइ गुभइ for गुभइ गुहइ. K गुफति for गुम्फति. BT गुप्फं गुल्फम् for पुप्फं पुष्पम्. 61. G K असंयुक्तस्यानादौ स्थितस्य for अस्तोरखोः. 62. T बयौ for व्वयौ in the Sūtra. K बकारस्य for बस्य. G ङित्त्वाद्वकारस्यानुनासिकः; S ङित्त्वाद्वकारः सानुनासिकः for ङित्वा...वकारस्य. 63. G M भकारो for भो. 64. GK वत्वं for वो. G केढवो; T केडवो for कइढवो. 65. T om. तु. S om. अहिमण्णू.

मन्मथे ॥ ६६ ॥

म इत्यनुवर्तते । मन्मथे आदेर्मस्य वो भवति । पृथग्योगान्नित्यम् । वम्महो ॥ ६६ ॥

तु ढो विषमे ॥ ६७ ॥

विषमशब्दे मस्य ढो भवति । विसढो विसमो ॥ ६७ ॥

यो जर्तीयानीयोत्तरीयकृत्येषु ॥ ६८ ॥

त्वित्यनुवर्तते । तीये अनीये च प्रत्यये उत्तरीयशब्दे कृद्विहितयप्रत्यये च यकारस्य जकारो भवति । रित्त्वाद् द्वित्वम् । तीये—द्वितीयः विइज्जो विइओ । तृतीयः तइज्जो तइओ ॥ अनीये—करणीयम् करणिज्जं करणीअं । विस्मयनीयम् विम्हअणिज्जं विम्हअणीअं । यापनीयम् जावणिज्जं जावणीअं । उत्तरीयम् उत्तरिज्जं उत्तरीअं ॥ कृत्ये—पेया पेज्जा पेआ । मेयम् मेज्जं मेअं ॥ ६८ ॥

इन्मयटि ॥ ६९ ॥

य इत्यनुवर्तते । मयट्प्रत्यये यस्य इकारो भवति तु । विषमयः विसमइओ विसमओ ॥ ६९ ॥

छायायां होऽकान्तौ ॥ ७० ॥

अकान्तौ वर्तमाने छायाशब्दे यस्य हत्वं तु भवति । वच्छस्स छाहा वच्छस्स छाआ । पुद्गलपर्यायः ॥ सच्छाहं सच्छाअं ॥ अकान्ताविति किम् । मुहच्छाआ । मुखकान्तिरित्यर्थः ॥ ७० ॥

यष्ट्यां लल् ॥ ७१ ॥

यष्ट्यां यस्य लत्वं भवति । लित्त्वान्न विकल्पः । लट्ठी यष्टिः । वेलुलट्ठी वेणुयष्टिः । चूअलट्ठी चूतयष्टिः । महुलट्ठी मधुयष्टिः ॥ ७१ ॥

---

66. M म इत्यनुवृत्तिः for म इत्यनुवर्तते. 67. B डो in the Sūtra and Com. B विसडो; T_1 विसवो for विसढो. M ढस्तु स्यात् for ढो भवति. 68. T नीये for अनीये. B M कृद्विहितप्रत्यये; T_1 कचिद्विहितप्रत्यये for कृद्विहितयप्रत्यये. G om. द्वितीयः विइज्जो विइओ. G कृये for कृत्ये. 69. T इम्मयटि for the Sūtra. S मयटि प्रत्यये for मयट्प्रत्यये. 70. M अकान्तिवाचिनि for अकान्तौ वर्तमाने. B om. तु. 71. BT om. लित्त्वान्न विकल्पः. BT वेणुलट्ठी for वेलुलट्ठी. T om. महुलट्ठी मधुयष्टिः.

कतिपये वहशौ ॥ ७२ ॥

कतिपये यस्य वत्वहत्वे भवतः । हत्वे शित्वात्पूर्वस्य दीर्घः । कइअवं कइवाहं ॥ ७२ ॥

अर्थपरे तो युष्मदि ॥ ७३ ॥

अर्थपरे युष्मच्छब्दे यस्य तकारो भवति । तुम्हच्चिअं यौष्माकम् । तुम्हकेरो युष्मदीयः ॥ अर्थपर इति किम् । जुम्हदम्हप्पअरणं, युष्मदस्मत्प्रकरणम् ॥ ७३ ॥

आदेर्जः ॥ ७४ ॥

पदादेर्यस्य जो भवति । यशः जसो । यमः जमो । युवतिः जुवई । याति जाइ ॥ आदेरिति किम् । अवअवो । विणओ ॥ बहुलाधिकारात्सोपसर्गस्यानादेरपि । संजोओ संयोगः । संजमो संयमः । अपजसो अपयशः ॥ क्वचिन्न भवति । प्रयोगः पओओ ॥ ७४ ॥

भ्यौ बृहस्पतौ तु बहोः ॥ ७५ ॥

बृहस्पतौ बकारहकारयोर्यथासंख्यं भकारयकारौ तु भवतः । भयप्पई बहप्पई ॥ ७५ ॥

रो डा पर्याणे ॥ ७६ ॥

पर्याणे रेफस्य डा इत्ययमादेशो भवति । पडाआणं पल्लाणं ॥ ७६ ॥

लो जठरवठरनिष्ठुरे ॥ ७७ ॥

र इति वर्तते । जठरादौ रस्य लत्वं वा भवति । जठरं जढलं जढरं । वठरः वढलो वढरो । निष्ठुरः णिट्ठुलो णिट्ठुरो ॥ भमलशब्दो भ्रमरपर्यायः संस्कृतवदेव ॥ ७७ ॥

---

72. B कइवहं for कइवाहं. 73. Before अर्थपरे BT read य इत्यनुवर्तते. After भवति B adds तुम्हे च्चिअ यूयमेव for तुम्हच्चिअं. K om. तुम्हकेरो. After तुम्हकेरो T adds तुम्हेच्चिअं. 74. After किम् B adds आमओ. G अवजसो for अपजसो. 75. MT ह्यौ for भ्यौ in the Sūtra. T बहे for बहोः in the Sūtra. K M T हकारयकारौ for भकारयकारौ. K T om. तु. M T_1 हअप्पई; T_3 अहप्पई for भयप्पई. $T_{1\cdot3}$ बिहप्पई for बहप्पई. 76. G T पडायाणं; T_3 पड्डाणं for पडाआणं. 77. T र इत्यनुवर्तते. B T om. वा. T_2 हसळशब्दो for भमलशब्दो. B संस्कृत इव; S संस्कृत एव.

हरिद्रादौ ॥ ७८ ॥

हरिद्रादिषु रस्य लत्वं भवति। पृथग्योगान्नित्यम्। हलद्दी हरिद्रा। इङ्गालो अङ्गारः। चलणो चरणः। जहुट्ठिलो युधिष्ठिरः। सउमालो सुकुमारः। सिढिलो शिथिरः। सक्कालो सत्कारः। मुहलो मुखरः। वलुणो वरुणः। चिलाओ किरातः। लुग्गो रुग्णः। अवद्दालं अपद्वारम्। कलुणो करुणः। दलिद्दो दरिद्रः। फलिहो परिघः। फलिहा परिखा। दलिद्दाइ दरिद्राति। मच्छलो मत्सरः। संवच्छलो संवत्सरः। फालिहद्दं पारिभद्रम्। दालिद्दं दारिद्र्यम्। काहलो कातरः। इत्यादि॥ बहुलाधिकारादङ्गारस्य कृतेत्वस्यैव। अन्यत्र अङ्गारो॥ चरणस्य पादार्थवृत्तेरेव। अन्यत्र चरणकरणं॥ किराते चकारसंनियोग एव। अन्यत्र नमिमो हरकिराअं॥ ७८॥

किरिवेरे डः ॥ ७९ ॥

अनयो रेफस्य डो भवति। किडी किरिः, वराहो गर्तो मूषिको गन्धर्वो वा। वेडो वेरः, भीरुः शरभः करभो मण्डूको दुन्दुभिर्वा॥ ७९॥

खोः करवीरे णः ॥ ८० ॥

करवीरे खोरादे रेफस्य णत्वं भवति। कणवीरो॥ ८०॥

लो ललाटे च ॥ ८१ ॥

ण इत्यनुवर्तते। ललाटे आदेर्लकारस्य णो भवति। चकारः खोरित्यनुवृत्त्यर्थः। णिडालं णडालं॥ ८१॥

---

78. T हलिद्दी for हलद्दी. BT जुहुट्ठिलो for जहुट्ठिलो. G सुउमालो for सउमालो. After सउमालो S T add सोमालो. After रुग्णः B adds संपद्दालं संपद्द्वारम्; G adds रोग्गो भुग्गो वा. T संपद्दालं संपद्दारं for अवद्दालं अपद्वारम्. B फालिहद्दो; T पालिहद्दो for फालिहद्दं. T om. अन्यत्र. B श्लोकपादार्थ°; GMT पदार्थ° for पादार्थ°. B चरणप्पहरणं; T चरणं दारुणं for चरणकरणं. B किरातस्य for किराते. T चकारसंयोगे for चकारसंनियोगे. 79. G किरिभेरे; M S किरिहेरे; T1,2 किरीबोरे for किरिवेरे in the Sūtra. T ढः for डः in the Sūtra. T om. किरिः. S om. वराहो...गन्धर्वो वा. B गर्वो for गर्तो. G भेडो भेरः; T बोढो भीरुभेदः for वेडो वेरः. G om. शरभः. G करभस्सरो for करभो. 80. G रकारस्य; S रस्य for रेफस्य. 81. B इति वर्तते; M इत्यनुवृत्तिः for इत्यनुवर्तते. T om. णडालं.

लोहललाङ्गललाङ्गूले वा ॥ ८२ ॥

एष्वादेर्लकारस्य णो वा भवति। णोहलो लोहलो। लोहलः शबर-विशेषः। णंगलं लङ्गलं। णंगूलं लंगूलं॥ ८२ ॥

स्थूले रल्लूतश्चौत् ॥ ८३ ॥

स्थूले लस्य रत्वं लिद्भवति, तत्संनियोगे ऊन ओत्वं च भवति। थोरो॥ थूलहद्दो इति तु स्थूरस्य हरिद्रादिलत्वे भविष्यति॥ ८३ ॥

बो मः शबरे ॥ ८४ ॥

शबरे बस्य मो भवति। समरो ॥ ८४ ॥

नीवीस्वप्ने वा ॥ ८५ ॥

अनयोर्वस्य मो वा भवति। नीमी नीवी। सिमिणो सिविणो॥ ८५ ॥

हस्य घो बिन्दोः ॥ ८६ ॥

बिन्दोः परस्य हस्य घत्वं वा भवति। संघारो संहारो संहारः। सिंघो सिंहो सिंहः॥ कचिदबिन्दोरपि। दाघो दाहः ॥ ८६ ॥

शोः सल् ॥ ८७ ॥

अस्तोरखोरचः [१·३·७] इति निवृत्तम्। शोः शषसानां सकारो भवति। लित्वान्नित्यम्। शं–शब्दः सद्दो। कुशः कुसो। नृशंसः णिसंसो। वंशः वंसो। अश्वः आसो। श्मश्रूः मंसू। श्यामा सामा। दश दस। शोभते सोहइ॥ ष–षण्डः सण्डो। निकषः णिहसो। कषायः कसाओ। विष्वक् वीसुं। वर्षः वासो। तुष्यति तूसइ। शेषः सेसो॥ ८७ ॥

---

82. BMST लाहल° for लोहल° in the Sūtra. M om. लाङ्गल° in the Sūtra. BT शफरविशेषः; Bp G शब्दविशेषः for शबरविशेषः 83. G रो for रत्वं. B तत्संनियोगेन for °संनियोगे. G T om. च. B थूलहलद्दो for थूलहद्दो. B स्थूलशब्दस्य; T स्थूलस्य for स्थूरस्य. 86. T हकारस्य for हस्य. 87. M om. from लित्वात् to तूसइ. T साल् for सल्. BT श्वश्रूः for श्मश्रुः. B ससू; $T_{1\cdot 2}$ सुस्; T_3 सस्सू for मंसू. B दशा दसा for दश दस. T णीसहो for णिहसो. BT_1 वर्षा वासा; T_2 वर्षा वरिसा

प्रत्यूषदिवसदशपाषाणे तु हः ॥ ८८ ॥

शोरित्यनुवर्तते। प्रत्यूषादिषु शषसानां हत्वं भवति तु। पच्चूहो पच्चूसो। दिअहो दिअसो। दह दस। दहमुहो दसमुहो। दहबलो दसबलो। दहरहो दसरहो। एआरह एआरस। बारह बारस। तेरह तेरस। पाहाणो पासाणो॥ ८८॥

स्नुषायां ण्ह फोः ॥ ८९ ॥

स्नुषाशब्दे फोर्द्वितीयस्य शोः ण्ह इत्यादेशस्तु भवति। सुण्हा सुसा स्नुषा॥ ८९॥

छल् षट्शमीसुधाशावसप्तपर्णे ॥ ९० ॥

एषु शषसानां छत्वं लिद्भवति। छट्ठी षष्ठी। छप्पओ षट्पदः। छम्मुहो षण्मुखः। छमी शमी। छुहा सुधा। छावो शावः। छत्तिवण्णो सप्तपर्णः॥९०॥

सिरायां वा ॥ ९१ ॥

सिराशब्दे शोः छो वा भवति। छिरा सिरा॥ ९१ ॥

लुक्पादपीठपादपतनदुर्गादेव्युदुम्बरेऽचान्तर्दः ॥ ९२ ॥

पादपीठादिषु अन्तर्वर्तमानस्य दकारस्य अचा सहितस्य लुग्वा भवति। पावीढं पाअवीढं पादपीठम्। पावडणं पाअवडणं पादपतनम्। दुग्गावी दुग्गाएवी दुर्गादेवी। उम्बरो उउम्बरो उदुम्बरः॥ अन्तरिति किम्। दुर्गादेव्या आदौ मा भूत्॥ ९२॥

---

88. G हकारो for हत्वं. M T पच्चूसो for पच्चूसो. BT₁ om. एआरस बारस तेरस. 89. G om. शोः. 90. Bp T° शाप°; G °शाब° in the Sūtra. K छल् षष्ठषट्पदषण्मुखशमी°, M छल् षट्षट्पद° for छल्षट्° in the Sūtra. After भवति K adds छट्ठो षष्ठः. M छाओ; T छावो शापः for छावो शावः. 91. S शिरायां for सिरायां in the Sūtra and Com. 92. T पावीढं for पावीढं. T om. दुग्गावी. B दुग्गाई दुग्गादेई for दुग्गावी दुग्गादेवी. K उदुंबरो for उउम्बरो. G T °देव्यां for °देव्या.

व्याकरणप्राकारागते कगोः ॥ ९३ ॥

लुगित्यनुवर्तते। वेति वर्तते अचेति च। व्याकरणादिषु ककारगकारयोरचा सह लुग्वा भवति। वारणं वाअरणं।। पारो पाआरो। आओ आअओ ॥ ९३ ॥

एवमेवदेवकुलप्रावारकयावज्जीवितावटावर्तमानतावति वः ॥ ९४ ॥

एवमेवादिष्वन्तर्वर्तमानस्य वकारस्य अचा सहितस्य लुग्वा भवति। एमेअ एअमेअ। देउलं देवउलं। पारओ पावारओ। जा जाव। जीअं जीविअं। अडो अवडो। अत्तमाणं आवत्तमाणं। ता ताव॥ अन्तरित्येव। एवमेवेत्यन्त्यस्य न स्यात्॥ ९४ ॥

ज्योर्दनुजवधराजकुलभाजनकालायसकिसलयहृदयेषु ॥ ९५ ॥

दनुजवधादिषु ज्योर्जकारयकारयोरचा सहितयोर्लुग्वा भवति। दणुवहो दणुअवहो दनुजवधः। राउलं राअउलं राजकुलम्। भाणं भाअणं भाजनम्। कालासं कालाअसं कालायसम्। किसलं किसलअं किसलयम्। हिअं हिअअं हृदयम्॥ महण्णवसमा सहिआ जाला ते सहिअएहिं घेप्पन्ति, महार्णवसमाः सहृदया यदा ते सहृदयैर्गृह्यन्ते॥ ९५ ॥

---

93. T om. लुगित्यनुवर्तते. K वेति अचेति च; T_3 लुगित्यचेति च for वेति वर्तते अचेति च. T सहितयोः for सह. 94. T_1 °तावती वा, T_2 °तावतिर्वा, T_3 °तावतीव for °तावति वः in the Sūtra. BT एव्वं एव्व; S एक्कमेव for एअमेअ. G आत्तमाणं for अत्तमाणं. T आअत्तमाणं for आवत्तमाणं. B T मा भूत् for न स्यात्. 95. G K T_3 om. °वध° in the Sūtra. B G °भोजन° for °भाजन° in the Sūtra. T_1 °काळायसी° for °कालायस° in the Sūtra. G K M T दनुजादिषु for दनुजवधादिषु. T_1 सहितस्य यो for सहितयोः. K राकुलं राजकुलं for राउलं राअउलं. G भोणं भोअणं. BT_3 महासुसमा; T_1 ममासुसमा for महण्णवसमा. T_1 जाद दे; T_2 बदा दे for जाला ते. B om. जाला ते सहिअएहिं घेप्पन्ति. B ममासुसमाः for महार्णवसमाः. B om. यदा ते सहृदयैर्गृह्यन्ते.

अपतौ घरो गृहस्य ॥ ९६ ॥

गृहस्य घर इत्यादेशो वा भवति पतिशब्दः परो न भवति चेत्। घरो गृहम्। घरसामी गृहस्वामी। राअघरं राजगृहम्॥ अपताविति किम्। गहवई गृहपतिः ॥ ९६ ॥

स्त्रीभगिनीदुहितृवनितानामित्थीबहिणीधूआविलआः ॥ ९७ ॥

स्त्रीप्रभृतीनामित्थीप्रभृतय आदेशा यथासंख्यं वा भवन्ति। इत्थी थी स्त्री। बहिणी भइणी भगिनी। धूआ दुहिआ दुहिता। विलआ वणिआ वनिता॥ विलयाशब्दः संस्कृतेऽपीति केचित् ॥९७॥

उभयाधसोरवहहेट्ठौ ॥ ९८ ॥

उभय अधस् इत्येतयोर्यथासंख्यं अवह हेट्ठ इत्यादेशौ वा भवतः। अवहं॥उहअं इत्यपि केचित्। हेट्ठं अह। हेट्ठमग्गो अहमग्गो अधोमार्गः॥९८॥

मलिनधृतिपूर्ववैडूर्याणां मइलदिहिपुरिमवेरुलिआः ॥ ९९ ॥

मलिनादीनां मइलादय आदेशा यथासंख्यं वा भवन्ति। मइलं मलिणं मलिनम्। दिही धिई धृतिः। पुरिमं पुव्वं पूर्वम्। वेरुलिअं वेडुज्जं वैडूर्यम् ॥ ९९ ॥

स्मरकटुोरीसरकारौ ॥ १०० ॥

स्मरकटुशब्दयोरीसरकारौ यथासंख्यं वा भवतः। ईसरो मरो स्मरः। कारं कडु कटुः ॥ १०० ॥

बाहिंबाहिरौ बहिसः ॥ १०१ ॥

बहिः शब्दस्य बाहिं बाहिर इत्यादेशौ वा भवतः। बाहिं बाहिरं। बाहिरब्भन्तरकिरिआरोहो, बाह्याभ्यन्तरक्रियारोधः ॥ १०१ ॥

---

96. G गृहशब्दस्य for गृहस्य. BTom. वा.B om. भवति. 97. M om. the Sūtra. and Com. B °दूआ° for °धूआ in the Sūtra & Com. T om. वा. 98. G °हिट्ठौ for हेट्ठौ in the Sūtra. G हिट्ठ for हेट्ठ. K उभयं for उहअं. K अधस् हेट्ठं। अहमग्गो अधोमार्गः for हेट्ठं अह...अधोमार्गः. 99. G वैडूर्याणां in the Sūtra. B T °पूरिम° in the Sūtra and Com. G वैदूर्यम् for वैडूर्यम्. 101. B बहिषः for बहिसः in the Sūtra.

कूरो गौणेषदः ॥ १०२ ॥

ईषच्छब्दस्य गौणस्य कूर इत्यादेशो वा भवति। चिञ्च व्व कूरपिका, चिञ्चेवेषत्पका ॥ पक्षे ईसि ॥ १०२ ॥

एण्हिं एत्ताहे इदानीमः ॥ १०३ ॥

इदानीमित्यस्य एण्हिं एत्ताहे इत्यादेशौ वा भवतः। एण्हिं एत्ताहे इआणिं। पक्षे दाणिं ॥ १०३ ॥

तिर्यक्पदातिशुक्तेस्तिरिच्छि पाइक्क सिप्पी ॥ १०४ ॥

तिर्यगादेस्तिरिच्छादिरादेशो भवति। तिरिच्छि पेच्छइ, तिर्यक् पश्यति। पाइक्को पआई पदातिः। सिप्पी सुत्ती शुक्तिः ॥ १०४ ॥

गोणाद्याः ॥ १०५ ॥

गोणादयः शब्दा अनुक्तप्रकृतिप्रत्ययलोपागमवर्णविकारा बहुलं निपात्यन्ते। (१) गोणो गौः। स्वार्थे णः ॥ (२) गोला गोदा। गोदेति गोदावरी। दस्य लः। गोला संस्कृतेऽपीति केचित् ॥ (३) ओसायणं आपोशनम्। आपो इत्यस्य ओसा इत्यादेशः, ततः सकारात्परो यकारागमः। ओसाशब्दो नीहारवाची देश्यः, तत्कणो वा ओसायणं ॥ (४) वणाई वनराजिः। रेफस्य लुक् ॥ (५) तल्लडं तल्लं तल्पम्। लद्वित्वपलोपौ स्वार्थे डो वा। द्वित्वाभावे तलं ॥ (६) थेवो (७) थेवो थोक्को स्तोकः। कस्य वत्वम्, ओत एत्वं च वा, सेवादिपाठाद् द्वित्वम् ॥ (८) विरुअं विरुद्धम्। संयुक्तस्य लुक् ॥ (९) आओ आपः। शरदादिपाठादन्त्यस्य हलोऽत्वं दीर्घश्च ॥

---

102. T गौणेषतः for गौणेषदः in the Sūtra. S om. वा. B कूरपका for °पिका. 103. K om. वा. G T om. पक्षे दाणिं. B तिरच्छि°; S तिरिच्छ° in the Sūtra. B तिरच्छि for तिरिच्छि. 105, (1) HD. 2. 104. Gp T गोणा for गोणो. (2) HD. 2. 104. (3) HD. 1, 64. (ओसा). G ओसाअणमहीशाने; S ओसाआणं for ओसायणं आपोशनम्. (4) HD. 7. 38, (वणई). S om. वणाई वनराजिः, रेफस्य लुक्; G K M वणई वनराजिः, रकारस्य लुक्. (5) HD. 5. 19 (तलं). 5.54 (6) From Sk स्तोकः. (7) HD. 5.29. (8) HD. 7.63. (9) HD. 1.73.

(१०) गोसो गोसर्गः प्रत्यूषः। र्गस्य लुक्॥ (११) वोसिरणं व्युत्सर्जनम्। व्युदो वो, सृजतीति जस्य रः, सस्य ऋत इत्वं च॥ (१२) धिरत्थु धिगस्तु। गस्य रः॥ (१३) पत्थेवाअं पाथेयम्। थो द्वित्वं वकारागमश्च॥ (१४) वेलंबो (१५) वडंबो विडम्बना। इत एत्, डो लः, नकारस्य लुक् च॥ (१६) बुलुबुलो बुद्बुदः। दकारयोर्लः, संयुक्तयोर्मध्ये उत्वम्॥ (१७) करिल्लं करीरम्। रस्य ल्लः॥ (१८) ऊआ यूका। यो लुक्॥ (१९) दोग्गं युग्मम्। योर्दौ॥ (२०) धणिआ धन्या प्रियतमा। यकारात्पूर्वमित्वम्॥ (२१) णिव्वहणं उद्वहनं विवाहः। उकारस्य णिः॥ (२२) मुव्वहइ उद्वहति। उकारस्य मुः॥ (२३) छिच्छि धिक्धिक्। धस्य छः॥ (२४) वाडी वृतिः। ऋत आत्वं तकारस्य उत्वम्॥ (२५) गहिल्लो ग्रहिलः। लो द्वित्वम्॥ (२६) गोणिक्को गोनीकः गवामनीकः समूहः। को द्वित्वम्॥ (२७) अइरजुवई अचिरयुवतिः। अपूर्वेत्यर्थः॥ (२८) अणरहू नववधूः। नकारवकारयोरत्वणत्वे वस्य च रः॥ (२९) अमआ असुराः। सुकाररेफयोर्मयौ॥ (३०) पण्णवण्णा (३१) पञ्चावण्णा पञ्चपञ्चाशत्। स्तोरादेर्णः, पस्य वः, चाशतोर्णा। द्वितीयस्यात आ, चाशतोर्णा॥ (३२) गामहणं ग्रामस्थानम्। स्थाकारस्य हः॥ (३३) तेवण्णा त्रिपञ्चाशत्। इत एत्वं, चाशतोर्णः॥ (३४) घुसिमं घुसृणम्। णो मः, ऋकारस्य इत्वम्॥

---

(10) HD.2,96. After गोसो B adds गोस्पर्शः. (11) From Sk व्युत्सर्जनम्. K ओसिरणं for वोसिरणं. After व्युत्सर्जनम् S adds भाअं भालं लस्य यः. (12) From Sk धिगस्तु. (13) Sk पाथेयम. (14) HD. 7.95. (15) HD. 7.95. (16) HD. 6.95. (बुलुंबुला). (17) Sk करीर. BT किरल्लं for करिल्लं. (18) HD. 1.139. (19) HD. 5.49. (20) HD. 5.58. K यात्पूर्वमित्वं for यकारात्पूर्वमित्वम्. (21) HD. 4.39. (22) Sk उद्वहति. (23) Sk धिक्-धिक्. (24) HD. 7.43. (25) Sk ग्रहिलः. (26) HD. 2.97. (गोणिक्को). (27) HD. 1.48. (28) HD. 1.48. (अणुवहुआ). (29) HD. 1.15. (30) HD. 6.27. (31) Sk पञ्चपञ्चाशत्. (32) HD. 2.90. (33) Sk त्रिपञ्चाशत्. (34) Sk घुसृणं.

(३५) छड्डा छटा। टकारस्य ड्डः ।। (३६) बइल्लो बलीवर्दः। दोर्ल्लः, लीवयोरित्वम् ।। (३७) पाउरणं (३८) पंगुरणं प्रावरणम्। द्वितीयस्यात उः, वस्य गुरादेशः ।। (३९) लक्कुडो लगुडः। गकारस्य क्कः ।। (४०) आसंघो आस्था। स्थाकारस्य संघः ।। (४१) छेणो स्तेनः। स्तोश्छः ।। (४२) दोसिणी ज्योत्स्ना ज्योर्दो, नात्पूर्वमित्वम् ।। (४३) हिज्जो ह्यः। यकारस्य इज्जः ।। (४४) कक्खडो कर्कशः। कशोः खडौ ।। (४५) ते- आलीसा त्रिचत्वारिंशत्। इत ए, चत्वयोरा, रो लः, विंशत्यादिपाठाद्बिन्दो- र्लुक् ।। (४६) कत्तं कलत्रम्। लस्य साचो लुक् ।। (४७) कलवू अलाबूः। अकारस्य कः आकारस्य अः ।। (४८) नलिअं (४९) निहेलणं निलयः। इदतोर्व्यत्ययः, यो णः, लात्पूर्वं हे ।। (५०) णिक्कडो निश्चयः। श्चयोः कडौ ।। (५१) णिक्कडो निश्चलः। चलोः कडौ ।। (५२) णिरासो नृशंसः। शंकारस्य रा ।। (५३) णिप्फंसो निस्त्रिंशः। स्त्रिकारस्य फः ।। (५४) विहुंडुओ विधुंतुदः। तो डः ।। (५५) वहिओ मथितः। मो वः ।। (५६) खड्डं खेलम्। लो ड्डः ।। (५७) कोलीरं कुरुविन्दम्। पद्मरागविशेषः। उकारयोरोदितौ, रो लः, बिन्दोश्च रः ।। (५८) विसग्गो व्युत्सर्गः। व्युदोः विः ।। (५९) संघयणं संहननम्। हस्य घः, आदेर्नो यः ।। (६०) घायणो गायनः। गो घः ।। (६१) ढेक्कुणो मत्कुणः। मतोः ढे ।। (६२) ककुडं ककुदम्। दो डः ।। (६३) सेवालं जम्बालम्। जमोः से ।।

---

(35) Sk छटा. (36) HD 6.91. (37) HD. 6.43. (पाउरणी). BT₁ पागुरणं; MT₃ पग्गुरणं for पंगुरणं. (38) HD. 6.43. (39) HD. 7.19. (40) Sk आस्था. (41) Sk स्तेनः G चेणो, K थोणी for छेणो. (42) HD. 5.50. S om. दोसिणी; K जोसिणी. (43)? S om. हिज्जा इज्जा. (44) HD. 2.11. (45) Sk त्रिचत्वारिंशत्. (46) Sk कलत्रम्. (47)? Sk अलाबू. (48) HD. 4.20. (49) HD. 4.51. (50) HD. 4.29. (51) Sk निश्चलः. (52) HD. (णिराहो) 4.37. (53) Sk निस्त्रिंशः or निःस्पर्शः (54) HD. (विहुंडुओ) 7.65. (55) Sk मथितः. (56) Sk क्रीडा. (57) HD. (कोलीरं) 2.46. B कुरुविन्दः for कुरुविन्दम्. (58) Sk व्युत्सर्गः. (59) HD. 8.14. (60) HD. 2.108. (61) HD. (ढेंकुणो) 4.14. G ढेंकुणो. (62) Sk ककुदम्. (63) HD. 8.43.

(६४) खुड्डओ क्षुल्लकः। लो डः॥ (६५) वड्डुअरो बृहत्तरः। बृहदित्यस्य वड्ढु॥ (६६) अत्थक्कं अकाण्डम्। काण्डयोः त्थक्कौ॥ (६७) आणुअं आननम्। आदेरत उः, द्वितीयस्य नो लुक्॥ (६८) संगोलं संघातः। घातयोर्गोलः॥ (६९) सामरी (७०) सामली शाल्मलिः। लो लुक् द्वित्वा-भावश्च॥ (७१) हिमोरं हिमोदरम्। दो लुक्॥ (७२) अब्बा अम्बा। बिन्दोर्लुक् बो द्वित्वं च॥ (७३) सिप्पी सूची। ऊत इः, चस्य द्विरुक्तः पः॥ (७४) बम्ही वाणी। णो म्हः॥ (७५) जच्छन्दो स्वच्छन्दः। स्वस्य जः॥ (७६) तलारो तलवरः पुराध्यक्षः। वस्य लुक्॥ (७७) कुड्डं कुतुकम्। तोर्लुक्, कस्य डो द्विरुक्तः॥ (७८) सीसक्कं शिरःपत्रम्। पत्रस्य क्कः॥ (७९) जम्बालं शैवालम्। शै इत्यस्य जम्॥ (८०) अणुदिवं दिनमुखम्। अनु पश्चात्, दिवा दिनम्। नो वः॥ (८१) सत्थरो संस्तरः। बिन्दोर्लुक्। (८२) विड्डरं विस्तारः। स्तकारस्य ड्डः॥ (८३) वीली वीची (८४) वीवी च। चो लः, चो वः॥ (८५) डंभिओ दाम्भिकः। दो डः॥ (८६) कडप्पो कलापः समूहः। लो डः पो द्वित्वं च॥ (८७) दूसलो दुर्भगः। भगोः सलौ॥ (८८) गल्लं गण्डम्। डो लः॥ (८९) पडिसिद्धी प्रतिस्पर्धा। स्पस्य सि आत ई॥ (९०) वढो वटः। टो ढः॥

---

(64) HD. (खुड्ड) 2.74. B कुड्डओ. (65) Sk बृहत्तरः. (66) HG. 2.174. (67) HD. 1.62. (68) HD. 8.4. G संगोल्लो.(69) HD. (सामरा) 8.23. (70) HD. 8.23. (71) Sk हिमोदरम्. (72) Sk अम्बा. (73) Sk सूची; S सिप्पा. (74) Sk ब्राह्मी. G वह्नि. (75) HD. 3.43. (76) HD. (तलारो). 5.3. (77) HD. 2.33. B T कुट्टं for कुड्डं. (78) HD. 8.34.S om. सीसक्कं...क्कः. (79) HD 3.12.(80) HD. 1.19. S om. from अणुदिवं down to चेर्थः under 94. (81) HD. 8.4. (82) Sk विस्तरः. (83). (84) Sk वीची. (85) HD. 4.8. (86) HD. 2.13. (87) HD. 5.43. (88) Sk गण्डः. (89) HD. 6.77 (90) Sk मूढः ?

(९१) डोअणो (९२) डोअलो (९३) डोलो लोचनम्। लो डः, लनोर्डलौ, अत्रैव चस्य साचो लुक्॥ (९४) कत्थइ कचित्। चेर्थः॥(९५) डेड्डुरो दर्दुरः। अत ए, दकारयोर्डः॥ (९६) छिल्लं छिद्रम्। द्रो लः॥ (९७) मंजरो (९८) वंजरो मार्जारः। मो वो वा, वक्रादिपाठादनुस्वारः, आतो ह्रस्वः॥ (९९) गहरो गृध्रः। रात्पूर्वमत्॥ (१००) उरओ (१०१) अज्जमो ऋजुः। जो रः, ऋकारोकारयोरत्, स्वार्थे मश्च॥ (१०२) साइआ सारिआ शारिका। रेर्लुक्, अन्त्यस्य आत इआ॥ (१०३) अरणी सरणिः। सो लुक्॥ (१०४) तणेसी तृणराशिः। राकारस्य पूर्वेणाचा सह एत्वम्॥ (१०५) दुग्गं दुःखम्। खोर्गः॥ (१०६) चउक्कं चतुष्पथम्। पथस्य कः॥ (१०७) कलेरं रलयोर्व्यत्ययः, आत एत्वं च॥ (१०८) कक्कालं कङ्कालश्च॥ इत्यादि॥ १०५॥

इति श्रीमदर्हनन्दित्रैविद्यदेवश्रुतधरश्रीपादप्रसादासादितसमस्तविद्याप्रभाव-
श्रीमत्त्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ
प्रथमाध्यायस्य तृतीयः पादः॥

---

(91) HD. 4.9. (92) HD. 4.9. (93) HD. 4.11. (94) Sk कचित्. (95) HD. 4.9. (96) HD. 3.35. S छल्लं for छिल्लं. (97) (98) Sk मार्जारः. (99) HD. 2.84. T_3 ends here. (100) (101) Sk ऋजुः. (102) Sk सारिका. (103) Sk सरणिः. (104) HD. 5.3. (105) HD. 5.53. (106) HD. 3.2. (107) HD. 2.53. (108) Sk कङ्कालः. BT कक्काल. Colophon: B om. from. मदर्ह° down to श्री°; S श्रीत्रिविक्रमदेवविरचिते प्राकृतव्याकरणे वृत्तौ. M T इति प्रथमाध्यायस्य तृतीयः पादः.

चतुर्थः पादः ॥

स्तोः ॥ १ ॥

अधिकारोऽयम् 'ईल् ज्यायाम्' [१·४·११०] इति यावत् । यदित ऊर्ध्वमनुक्रमिष्यते तत् स्तोः संयुक्तस्य भवतीति वेदितव्यम् ॥ १ ॥

वा रक्ते गः ॥ २ ॥

रक्ते स्तोः संयुक्तस्य ग इत्यादेशो वा भवति । रग्गो रत्तो ॥ २ ॥

शुल्के ङ्गः ॥ ३ ॥

शुल्के संयुक्तस्य ङ्ग इत्यादेशो वा भवति । सुङ्गं सुकं ॥ ३ ॥

कः शक्तमुक्तदष्टमृदुत्वरुग्णेषु ॥ ४ ॥

एषु स्तोः ककारो वा भवति । सक्को सत्तो । मुक्को मुत्तो । डक्को दट्ठो । माउक्कं मउक्कं माउत्तणं । लुक्को लुग्गो ॥ ४ ॥

क्ष्वेडकगे खल् ॥ ५ ॥

क्ष्वेडकादिषु संयुक्तस्य खकारो भवति । लित्त्वान्न विकल्पः । क्ष्वेडकः खेडओ ॥ क्ष्वेडको विषपर्यायः ॥ स्फोटकः खोडओ । स्फोटिका खोडिआ॥ ॥ ५ ॥

---

1. M अनुक्रमिष्यामः for °क्रमिष्यते. 2. M om. स्तोः.GK गकारो वा भवति; M गकारो वा स्यात् for ग इत्यादेशो वा भवति. 3. M शुष्के गः for the Sūtra. Bp T_2 शुष्के for शुल्के in the Sūtra. Before शुल्के GK read वेत्युनुवर्तते;M reads वेत्युनुवृत्तिः. After सुङ्गं G adds पक्षे. M सुग्गं for सुङ्गं. 4. M स्यात् for भवति. BKM om. मउक्कं. G मउत्तणं; K माउत्तं for माउत्तणं. M माइक्कं; T माउक्को for माउक्कं. Gp रुक्को रुग्गो; K om. लुग्गो. 5. GM क्ष्वेटकगे in the Sūtra. GM क्ष्वेटकादिषु for क्ष्वेडकादिषु. BT लित्त्वान्नित्यम् for लित्त्वान्न विकल्पः. GM क्ष्वेटकः; T क्ष्वेळकः for क्ष्वेडकः. After पर्यायः G adds स्फोटकः खोडिओ । क्ष्वोटकः खोडओ । स्फेटकः खेडओ.M खोडिओ; T खोडिओ for खेडओ. GMT om. स्फोटिका खोडिआ.

ष्कस्कोर्नाम्नि ॥ ६ ॥

ख इत्यनुवर्तते । ष्क स्क इत्येतयोर्नाम्नि संज्ञायां खो भवति । पुष्करम् पोक्खरं । पुष्करिणी पोक्खरिणी । निष्कम् णिक्खं । स्कन्धः खन्धो । स्कन्धावारः खन्धावारो । अवस्कन्दः अवक्खन्दो ।। नाम्नीति किम् । दुक्करं दुष्करम् । णिक्कम्पं निष्कम्पम् । णमोक्कारो नमस्कारः । सक्कअं संस्कृतम् । सक्कारो संस्कारः ॥६॥

वृक्षे रुर्वृक्षे ॥ ७ ॥

वृक्षशब्दे संयुक्तस्य खो भवति, तत्संनियोगेन वृकारस्य च रुकारः । रुक्खो ।। स्पृहादित्वाच्छत्वे वच्छो ।। ७ ॥

क्षः ॥ ८ ॥

क्षकारस्य खो भवति । लक्षणम् लक्खणं । क्षयः खओ । विचक्षणः विअक्खणो ।। बहुलाधिकारात्क्वचिच्छझावपि । खीणं छीणं झीणं क्षीणम् । छिज्जइ झिज्जइ क्षीयते ।। ८ ।।

स्थाणावहरे ॥ ९ ॥

स्थाणुशब्दे स्तोः खो भवति अहरे हरश्चेद्वाच्यो न भवति । खाणू ।। अहर इति किम् । थाणू ॥ ९ ।।

स्कन्दतीक्ष्णशुष्के तु खोः ॥१०॥

एषु खोरादेः संयुक्तस्य खो भवति तु । खन्दो कन्दो । तिक्खं तिण्हं। सुक्खं सुक्कं ।। १० ।।

---

6. Before ख M reads वेत्यनुवृत्तिः. M ष्कस्कयोः for ष्क स्क इत्येतयोः. M स्यात् for भवति. B णिक्कं for णिक्खं. B कंधो for खन्धो. K अवखंदो for अवक्खन्दो. T णिक्कंपो निष्कम्पः for णिक्कम्पं निष्कम्पम्. M संकरो for सक्कारो. 7. M स्तोः for संयुक्तस्य. KS °योगाद् ; MT °योगे for °योगेन. M om. स्पृहादित्वाच्छत्वे वच्छो. 8. BT क्षस्य for क्षकारस्य. M स्यात् for भवति. G छडावपि; K क्वचिच्छकारोऽपि; M सछावपि for छझावपि. K छणं खणं for क्षयः खओ. G डीणं for झीणं. G डिज्जइ for झिज्जइ. M शणं हीणं झण्णं खीणं । क्षीयते झिज्जइ for खीणं ... क्षीयते. 9. M स्यात् for भवति. 10. S om. from Sūtra 10 down to Sūtra. 22. KM एष्वादेः for एषु खोरादेः. M स्यात् for भवति.

स्तम्भे ॥ ११ ॥

खोरित्यनुवर्तते त्विति च। स्तम्भे खोः संयुक्तस्य खकारो भवति तु। खम्भो थम्भो। काष्ठादिमयः॥ योगविभाग उत्तरार्थः ॥११॥

थलस्पन्दे ॥ १२ ॥

स्पन्दाभाववृत्तौ स्तम्भे आदेः संयुक्तस्य थो लिद् भवति। थम्भो। थम्भिज्जइ ॥१२॥

स्त्यानचतुर्थे च तु ठः ॥ १३ ॥

स्त्यानचतुर्थयोश्चकारादस्पन्दवृत्तौ स्तम्भे च ठत्वं भवति तु। ठीणं थीणं। चउट्ठो चउत्थो। ठम्भो। ठम्भिज्जइ ॥१३॥

ष्टः ॥ १४ ॥

ठ इत्यनुवर्तते। ष्टस्य ठो भवति। योगविभागान्नित्यम्। दृष्टिः दिट्ठी। मुष्टिः मुट्ठी। यष्टिः लट्ठी। सौराष्ट्रम् सोरट्ठं ॥१४॥

विसंस्थुलास्थ्यधनार्थे ॥ १५ ॥

विसंस्थुलास्थिशब्दयोरधनवाचिन्यर्थशब्दे च संयुक्तस्य ठो भवति। विसंठुलं विसंस्थुलम्। अट्ठी अस्थि। अट्ठो अर्थः प्रयोजनम्॥ अधनार्थ इति किम्। अत्थो ॥१५॥

चः कृत्तिचत्वरे ॥ १६ ॥

कृत्तिचत्वरयोः संयुक्तस्य चो भवति। किच्ची कृत्तिः। चच्चरं चत्वरम्। ॥१६॥

---

11. M इत्यनुवृत्तिः for इत्यनुवर्तते. After स्तम्भे in Com. K M add आदेः. M om. खोः. K खो for खकारो. M खस्तु स्यात् for खकारो भवति तु. 12. GMT स्थोस्पन्दे for the Sūtra. M om. स्पन्दाभाववृत्तौ स्तम्भे. T_2 स्पन्दवृत्तौ for स्पन्दाभाववृत्तौ. GMT थकारो for थो. K om. लित्. 13. K अनयोः for स्त्यानचतुर्थयोः. M तु स्यात् for भवति तु. K ठाणं थाणं for ठीणं थीणं. 14. M अनुवृत्तिः for अनुवर्तते. M स्यात् for भवति. K जट्ठी for लट्ठी. 15. T_2 अधन्य° for अधन°. M स्यात् for भवति. M om. अधन इति किम्. GT_2 अधनार्थे for अधने. 16. T om. कृत्तिचत्वरयोः. G कृत्तिचत्वरशब्दयोः; M अनयोः for कृत्तिचत्वरयोः.

त्योऽचैत्ये ॥ १७ ॥

चैत्यवर्जितस्य त्यस्य चो भवति। सत्यम् सच्चं। प्रत्ययः पच्चओ। अमात्यः अमच्चो ॥ अचैत्य इति किम्। चइत्तं ॥१७॥

श्चेर्वृश्चिके ञ्चुर्वा ॥१८॥

वृश्चिके श्चि इत्यस्य ञ्चु इत्ययमादेशो भवति। विञ्चुओ विच्छुओ॥१८॥

उत्सवऋक्षोत्सुकसामर्थ्ये छो वा ॥१९॥

एषु स्तोः छो वा भवति॥ पुनर्वाग्रहणादुत्तरत्र न विकल्पः॥ उच्छओ ऊसओ। रिच्छो रिक्खो। उच्छुओ ऊसुओ। सामच्छं सामत्थं ॥१९॥

क्षमायां कौ ॥ २० ॥

छ इत्यनुवर्तते। कौ पृथिव्यां वर्तमाने क्षमाशब्दे स्तोः छत्वं भवति। छमा॥ लाक्षणिकस्यापि। छमा। काविति किम्। खमा क्षमा क्षान्तिः ॥२०॥

क्षण उत्सवे ॥ २१ ॥

उत्सववाचिनि क्षणशब्दे संयुक्तस्य छो भवति। छणो॥ उत्सव इति किम्। खणो ॥२१॥

स्पृहादौ ॥ २२ ॥

स्पृहादिषु स्तोः छो भवति। छिहा स्पृहा। क्षुरः छुरो। क्षीरम् छीरं। वृक्षः वच्छो। क्षेत्रम् छेत्तं। वक्षः वच्छो। कुक्षिः कुच्छी। क्षुतम् छुअं। क्षतम् छअ। क्षुण्णम् छुण्णं। कक्ष्या कच्छा। कक्षः कच्छो। मक्षिका मच्छिआ। क्षारम् छारं। इक्षुः उच्छू। सदृक्षः सारच्छो। अक्षि अच्छी। स्थगितः छइओ। दक्षः दच्छो। कौक्षेयकम् कुच्छेअअं। उक्षा उच्छा। सादृश्यम सारिच्छं। क्षुधा छुहा। लक्ष्मीः लच्छी। लक्ष्म लच्छं। इत्यादि ॥२२॥

---

17. KMT चैत्यवर्जिते for °वर्जितस्य. M स्यादित्यम् for भवति. K om. अमात्यः अमच्चो. 18. M om. the Sūtra and Com. G विंछिओ; T₂ विच्छिओ for विच्छुओ. K विंछिओ विच्छुओ for विच्छुओ. 19. M om. the Sūtra and Com. GKT छत्वं for छो. 20. M अनुवृत्तिः for अनुवर्तते. M भूम्यां for पृथिव्यां. K छो for छत्वं. M स्यात् for भवति. BGK om. क्षमा. K क्षान्तिरित्यर्थः for क्षान्तिः. 21. GM क्षणे for क्षणशब्दे. 22. T क्षुरं छुरं for क्षुरः छुरो. BT om. वक्षः वच्छो. G छीअं for छुअं. G क्षुण्णो छुण्णो for क्षुण्णं छुण्णं. B कक्षा for कक्ष्या. BKT om. क्षतं छअं. K om. कक्षः कच्छो. BT इच्छू for उच्छू. GKM om. लक्ष्म लच्छं.

ध्यश्चत्सप्सामनिश्चले ॥ २३ ॥

अनिश्चले निश्चलवर्जिते ध्य श्च त्स प्स इत्येतेशां छो भवति । ध्य—पथ्यः पच्छो । मिथ्या मिच्छा॥ श्च—पश्चिमं पच्छिमम्। आश्चर्यम् अच्छेरं । पश्चात् पच्छा॥ त्स—उत्साहः उच्छाहो । मत्सरः मच्छरो । संवत्सरः संवच्छलो । चिकित्सति चिइच्छइ ॥ प्स—अप्सरसः अच्छरा । लिप्सते लिच्छइ । जुगुप्सति जुउच्छइ ॥ अनिश्चल इति किम् । णिच्चलो ॥२३॥

द्यय्यर्यां जः ॥ २४ ॥

एषां जकारो भवति । द्य—मद्यम् मज्जं । अवद्यम् अवज्जं । आतोद्यम् आओज्जं । द्युतिः जुई । द्योतः जोओ॥ य्य—शय्या सेज्जा । जय्यः जज्जो । क्षय्यः खज्जो ॥ र्य—कार्यम् कज्जं । पर्यायः पज्जाओ । पर्याप्तम् पज्जत्तं ॥२४॥

न्वभिमन्यौ जञौ ॥ २५ ॥

अभिमन्यौ न्वोः जर् ज इत्येतौ तु भवतः । रित्वाद् द्वित्वम् । अहिमज्जू अहिमजू । पक्षे अहिवण्णू अहिमण्णू ॥२५॥

ध्यह्योर्झल् ॥ २६ ॥

ध्य ह्य इत्येतयोर्झत्वं भवति । लित्वान्नित्यम्। ध्य—ध्यानं झाणं । अध्ययनम् अज्झयणं । संध्या संझा । विन्ध्यः विञ्झा । उपाध्यायः उवज्झाओ ॥ ह्य—सह्यः सज्झो । गुह्यम् गुज्झं । ग्राह्यम् गेज्झं । नह्यते णज्झइ ॥२६॥

साध्वसे ॥ २७ ॥

साध्वसे ध्वोर्झो भवति । सज्झसं ॥२७॥

---

23. B om. अनिश्चले in the Com. M om. पथ्यः पच्छो. GT पथ्यं पच्छं for पथ्यः पच्छो. After पच्छो GKM add पथ्या पच्छा. KT मच्छलो for मच्छरो. G om. संवत्सरः संवच्छलो. After संवच्छलो G adds चिकित्सा चिइच्छा. KT जुगुप्सते for प्सति. 24. K द्य य्य र्य इत्येतेषां for एषां. M जः for जकारः. GT om. आतोद्यम् आओज्जं. GKMT om. क्षय्यः खज्जो. B कच्चं for कज्जं. 25. K जज्जो; MT जंजौ for जञौ in the Sūtra. K जज्जौ; MT अंजौ for जर् ज इत्येतौ. BKMT om. रित्वाद् द्वित्वम्. G MT om. अहिवण्णू, 26. M स्यात् for भवति. M om. लित्वान्नित्यम्. GK लित्वान्न विकल्पः. GK om. अध्ययनम् अज्झयणं. 27. Before साध्वसे in the Com. M reads ह्य इति वर्तते. G साध्वसशब्दे for साध्वसे. M स्यात् for भवति. GMT सज्झसो for सज्झसं.

ध्वजे वा ॥ २८ ॥

ध्वजे स्तोर्झो वा भवति । झओ धओ ध्वजः ।।२८।।

इन्धौ ॥ २९ ॥

इन्धी दीप्तावित्यस्मिन्धातौ स्तोर्झ इत्यादेशो भवति । समिध्यति समिज्झइ ॥ २९ ॥

र्तस्याधूर्तादौ टः ॥ ३० ॥

र्तस्य टो भवति अधूर्तादौ धूर्तादीन्वर्जयित्वा । कैवर्तः केवट्टो। वर्तिः वट्टी। वर्तुलम् वट्टुलं । संवर्तितः संवट्टिओ । प्रवर्तते पअट्टइ । नर्तयति णट्टइ ।।अधूर्तादाविति किम् । धूर्तः धुत्तो । वार्ता वत्ता । आर्तिः अत्ती । संवर्तनम् संवत्तणं। विवर्तनम् विवत्तणं । प्रवर्तनम् पवत्तणं । आवर्तनम् आवत्तणं । मुहूर्तः मुहुत्तो मूर्तः मुत्तो । आवर्तकः आवत्तओ । संवर्तकः संवत्तओ । वार्तिकः वत्तिओ । वर्तिका वत्तिआ । प्रवर्तकः पवत्तओ । मूर्तिः मुत्ती । उत्कीर्तितः उक्कित्तिओ । निवर्तकः णिवत्तओ । निर्वर्तकः णिव्वत्तिओ । कीर्तिः कित्ती । कार्तिकः कत्तिओ ।। बहुलाधिकारात्—वार्ता वट्टा ।। ३० ।।

प्रवृत्तसंदष्टमृत्तिवृत्तेष्टापत्तनकदर्थितोष्ट्रे ॥ ३१ ॥

एषु स्तोः टत्वं भवति । प्रवृत्तः पवट्टो । संदष्टः संदट्टो । मृत्तिः मट्टी । वृत्तं वट्टं । इष्टा इट्टा । पत्तनं पट्टणं । कदर्थितः कवट्टिओ । उष्ट्रः उट्टो ।। संदष्टोष्ट्रे तु ठत्वापवादः ।। ३१ ।।

28. M स्यात्तु for वा भवति. M om. ध्वजः 29. M om. अस्मिन्; G एतस्मिन् for अस्मिन्. After आदेशो G adds वा. M स्यात् for भवति. GMT समिज्झाइ for समिज्झइ. G समिध्यते. After समिध्यति BK add विज्झइ विध्यते; MT add विज्झाइ. 30. S तस्या° for र्तस्या° in the Sūtra. M om. टः in the Sūtra. M ट्टः स्यात् for टो भवति. M धूर्तादिवर्जं for अधूर्तादौ, धूर्तादीन् वर्जयित्वा. GK पवट्टइ for पअट्टइ. KMS om. आर्तिः अत्ती. KMS om. प्रवर्तनम् पवत्तणं. GKM मूर्तम् मुत्तं for मूर्तः मुत्तो. KMS om. वत्तिओ वार्तिकः. After कार्तिकः GKM add इत्यादि. 31. M स्यात् for भवति. KMT कअट्टिओ for कवट्टिओ.

वा न्तन्धौ मन्युचिह्नयोः ॥ ३२ ॥

अनयोः संयुक्तयोर्यथासंख्यं न्त न्ध इत्येतावादेशौ वा भवतः। मन्तू मण्णू। इन्धं चिण्हं ॥ ३२ ॥

डल्फोर्मर्दितविच्छर्दछर्दिकपर्दवितर्दिगर्तसंमर्दे ॥ ३३ ॥

एषु फोर्द्वितीयस्य स्तोः संयुक्तस्य डत्वं लिद्भवति। मर्दितः मड्डिओ। विच्छर्दः विच्छड्डो छर्दिः छड्डी। कपर्दः कवड्डो। वितर्दिः विअड्डी। गर्तः गड्डो। संमर्दः संमड्डो ॥ ३३ ॥

ढोऽर्धर्द्धिश्रद्धामूर्ध्नि तु ॥ ३४ ॥

फोरित्यनुवर्तते। एषु स्तोर्द्वितीयस्य ढो भवति तु। अर्धम् अड्ढं अद्धं। ऋद्धिः इड्ढी इद्धी। श्रद्धा सड्ढा सद्धा। मूर्धा मुड्ढा मुद्धा ॥ ३४ ॥

दग्धविदग्धवृद्धिदंष्ट्रावृद्धे ॥ ३५ ॥

एषु संयुक्तस्य ढो भवति। पृथग्योगान्नित्यम्। दग्धः दड्ढो। विदग्धः विअड्ढो। वृद्धिः वुड्ढी। दंष्ट्रा दाढा। वृद्धः वुड्ढो ॥ क्वचिन्न। विद्धकइणिरूविअं, वृद्धकविनिरूपितम् ॥ ३५ ॥

पञ्चदशदत्तपञ्चाशति णः ॥ ३६ ॥

एषु स्तोर्णत्वं भवति। पञ्चदश पण्णरह। दत्तं दिण्णं। पञ्चाशत पण्णासा ॥ ३६ ॥

---

32. M इत्येतौ स्याताम् for इत्येतावादेशौ वा भवतः. After मण्णू G adds चिन्धं. After इन्धं K adds इण्हं. 33. S दल्पो° for डल्फो° in the Sūtra. S विदर्ध° for °विच्छर्द° in the Sūtra. M om. °छर्दि° in the Sūtra. S °कपर्दि° for °कपर्द° in the Sūtra. S पोः for फोः. M om. लित्. S विदर्धः विदड्डो for विच्छर्दः विच्छड्डो. S कपड्डो for कवड्डो. 34. G वर्तते; M अनुवृत्तिः for अनुवर्तते. S ठो for ढो. M स्यात् for भवति तु. S अट्ठो for अड्ढं. G रिद्धी for इड्ढी. 35. M स्यान्नित्यं for भवति. M om. पृथग्योगान्नित्यम्; GK °योगान्न विकल्पः. K om. Sk equivalents under this Sūtra. S क्वचित् for क्वचिन्न. T om. क्वचिन्न विद्ध...निरूपितम्. 36. GS णकारो; M णः for णत्वं. M स्यात् for भवति. M पण्णाओ for पण्णासा.

ज्ञम्नोः ॥ ३७ ॥

ज्ञ म्न इत्येतयोर्णत्वं भवति । ज्ञानम् णाणं । संज्ञा संणा । विज्ञानम् विण्णाणं ॥ निम्नम् णिण्णं । प्रद्युम्नः पज्जुण्णो ॥ ३७ ॥

स्तवे थो वा ॥ ३८ ॥

स्तवे संयुक्तस्य थो वा भवति । थवो तवो ॥ ३८ ॥

रो हश्चोत्साहे ॥ ३९ ॥

थ इति वर्तते वेति च । उत्साहे संयुक्तस्य थो वा भवति तत्संनियोगेन हस्य च रेफः । उत्थारो उच्छाहो ॥ ३९ ॥

स्तः ॥ ४० ॥

स्तस्य थकारो भवति । हस्तः हत्थो । स्तुतिः थुई । स्तोकम् थोअं । प्रस्तरः पत्थरो । स्वास्ति सत्थि ॥ ४० ॥

पर्यस्ते टश्च ॥ ४१ ॥

पर्यस्ते स्तस्य टो भवति । चकारात् थश्च । पल्लट्टो पल्लत्थो ॥ ४१ ॥

वात्मभस्मनि पः ॥ ४२ ॥

आत्मभस्मनोः स्तोः पो वा भवति । अप्पा अप्पाणो । अत्ता अत्ताणो ॥ भप्पो भस्सो ॥ ४२ ॥

ड्मक्मोः ॥ ४३ ॥

ड्म क्म इत्येतयोः पो भवति । कुड्मलं कुप्पलं । रुक्मिणी रुप्पिणी ॥ क्वचिद् मोऽपि । रुक्मी रुम्मी रुप्पी ॥ ४३ ॥

37. M स्यात् for भवति. M om. विज्ञानम् विण्णाणं. M om. प्रद्युम्नः पज्जुण्णो. 38. S थओ for थवो. Gp S om. तवो. 39. GKS अनुवर्तते; M अनुवृत्तिः for वर्तते. M स्याद्वा for वा भवति. M तत्संनियोगे. GM रः for रेफः. T उड्डारो for उत्थारो. 40. S स्तकारस्य for स्तस्य. M थः स्यात् for थकारो भवति. KS पत्थारो प्रस्तारः for प्रस्तरः पत्थरो. 41. S तश्च for टश्च in the Sūtra. M स्यात् for भवति. M om. पल्लत्थो. 42. S om. वा in the Sūtra and Com. G आत्म भस्म इत्येतयोः for आत्मभस्मनोः. G अप्पाणो. M om. अत्ताणो. G अत्तणो; M om. अत्ताणो. 43. G ट्मक्मोः; T ग्मक्मोः for the Sūtra. M अनयोः for ड्म क्म इत्येतयोः. G कुट्मलं कुंपलं for कुड्मलम् कुप्पलं. T गोपि for मोऽपि. G रुम्मं रुप्पं रुक्मम्; M रुग्मं रुप्पं रुप्पी; T रुग्गं रुप्पं for रुम्मी रुप्पी रुक्मी.

ष्पस्पोः फः ॥ ४४ ॥

ष्प स्प इत्येतयोः फो भवति। ष्प—पुष्पं पुप्फं। शष्पं सप्फं। निष्पावः णिप्फावो। निष्पेषः णिप्फेसो॥ स्प—स्पन्दनम् फन्दणं। प्रतिस्पर्धी पडिप्फद्धी॥ ४४॥

भीष्मे ॥ ४५ ॥

फ इत्यनुवर्तते। भीष्मे ष्मोः फत्वं भवति। भिप्फो॥४५॥

श्लेष्मबृहस्पतौ तु फोः ॥४६॥

अनयोः फोर्द्वितीयस्य संयुक्तस्य फो भवति तु। सेप्फो सेम्हो। बिहप्फई बहप्पई॥ ४६॥

ग्मो मः ॥ ४७ ॥

ग्मस्य मो भवति तु। युग्मम् जुम्मं जुग्गं। तिग्मम् तिग्गं तिग्मं॥४७॥

न्मः ॥ ४८ ॥

न्मस्य मो भवति। पृथग्योगान्नित्यम्। जन्म जम्मो। मन्मथः वम्महो। मन्मनः मम्मणो॥ ४८॥

ताम्राम्रयोर्म्बः ॥४९॥

अनयोः संयुक्तस्य मकाराक्रान्तो बकारो भवति। ताम्रम् तम्बं। आम्रम् अम्बं॥ तम्बिरं अम्बिरं इत्येतौ देश्यौ॥४९॥

44. M फकारो for फो. G णिफ्फाओ for णिप्फावो. M णिप्फासो for णिप्फेसो. GT पाडिप्फर्द्धा; M पाडिप्पत्थी for पडिप्फद्धी. 45. GT om. फ इत्यनुवर्तते; M फानुवृत्तिः.M फः स्यात् for फत्वं भवति. M भिप्पो for भिप्फो. 46. S श्रेष्ठ° for श्लेष्म° in the Sūtra. M om. संयुक्तस्य. MS om. तु. B सेम्महो; G सिलेम्हो; MT सिलिम्हो for सेम्हो. GT बुहप्फई बुहस्सई; M बुहप्फई बुहप्पई for बिहप्फई बहप्पई. 47. M मः स्यात् for मो भवति तु. 48. K न्म इत्यस्य संयुक्तस्य म इत्यादेशः स्यान्नित्यम् for न्मस्य...न्नित्यम्. BK मम्महो for वम्महो. S om. मन्मनः मम्मणो. GM add मम्मणं. 49. M ष्तोः for संयुक्तस्य. S मकारादेशो बो for मकाराक्रान्तो बकारो. GM बो for बकारो. B तंबीरं अंबीरं for तम्बिरं अम्बिरं.

ऊर्ध्वे भो वा ॥ ५० ॥

उर्ध्वे स्तोर्भो वा भवति । उब्भं उद्धं ॥ ५० ॥

ह्वः ॥ ५१ ॥

भो वेत्यनुवर्तते । ह्वस्य भो वा भवति । जिह्वा जिब्भा जीहा ॥५१॥

वश्च विह्वले ॥ ५२ ॥

विह्वले संयुक्तस्य वकारस्य भो वा भवति । विब्भलो विहलो ॥ ५२ ॥

काश्मीरे म्भः ॥ ५३ ॥

काश्मीरे संयुक्तस्य म्भ इत्यादेशो भवति । कम्भारं कम्हारं ॥ ५३ ॥

लो वार्द्रे ॥ ५४ ॥

आर्द्रे स्तोर्लत्वं वा भवति । पुनर्वाग्रहणादुत्तरत्र न विकल्पः॥ अल्लं उल्लं ओल्लं । अद्दं उद्दं ओद्दं ॥ ५४ ॥

र्यः सौकुमार्यपर्यस्तपर्याणे ॥ ५५ ॥

एषु र्यस्य लो भवति । सौकुमार्यम् सोअमल्लं । पर्यस्तम् पल्लट्टं । पर्याणम् पल्लाणं ॥ पल्लङ्को इति तु पल्यङ्कस्य ॥ ५५ ॥

अररीअरिज्जमाश्चर्ये ॥ ५६ ॥

र्ये इत्यनुवर्तते । आश्चर्ये र्यस्य अर रीअ रिज्ज इति त्रय आदेशा भवन्ति। अच्छअरं अच्छरीअं अच्छरिज्जं ॥ ५६ ॥

---

50. M ऊर्ध्वशब्दे संयुक्तस्य भकारो वा स्यात् for ऊर्ध्वे...भवति. 51. G भ इत्यनुवर्तते; M भानुवृत्तिः 52. BT भश्च for वश्च in the Sūtra. M स्तोः for संयुक्तस्य. MT om. वकारस्य; M वस्य. After वकारस्य GM add च. M स्यात् for भवति. M भिब्भलो for विब्भलो. B विह्वलो for विहलो. 53. MS म्हः for म्भः in the Sūtra. M स्तोः for संयुक्तस्य. M म्ह; S म for म्भ. After आदेशो GM add वा. M स्यात् for भवति. KS कम्हारो कम्भारो; M कम्हारा कम्भारा for कम्भारं कम्भारं. 54. G आर्द्रशब्दे for आर्द्रे. M स्यात् for भवति. T om. उद्दं. 55. After सौकुमार्य KS add पर्यंक in the Sūtra. M स्यात् for भवति. KS सोउमल्लं for सोअमल्लं. K पल्लत्थं corrected to पल्लट्टं. After पल्लट्टं KS add पल्लंकं. After पल्लट्टं MT add पल्लत्थं. 56. S अरिअरिज्ज-माश्चर्ये for the Sūtra. BM रिअ; Bp रीय for रीअ in the Sūtra and Com. B om. र्ये इत्यनुवर्तते. BT अच्चअरं अच्चरिअ अच्चरिज्जं for अच्छअरं...अच्छरिज्जं.

डेरो ब्रह्मचर्यसौन्दर्ये च ॥५७॥

ब्रह्मचर्यसौन्दर्ययोः चकारादाश्चर्ये च र्यस्य डित् एर इत्यादेशो भवति। बम्हचेरं। सुन्देरं। अच्छेरं॥ डित्त्वाद्दिलोपः॥ चौर्यसमत्वात् [१·४·१००] बम्हचरिअं। सुन्दरिअं। अच्छरिअं॥ ५७॥

वा पर्यन्ते ॥५८॥

पर्यन्ते र्यस्य डेरो वा भवति। पेरन्तो पज्जन्तो॥ ५८॥

धैर्ये रः॥ ५९॥

वेत्यनुवर्तते। धैर्ये र्यस्य रो वा भवति। धीरं धिज्जं॥ ५९॥

तूर्यदशार्हशौण्डीर्ये॥ ६०॥

एषु स्तोः रो भवति। पृथग्योगान्नित्यम्॥ तूरं। दसारो। सोण्डीरं॥ ॥ ६०॥

बाष्पे होऽश्रुणि॥ ६१॥

अश्रुवाचिनि बाष्पशब्दे स्तोर्हो भवति। बाहो नेत्रजलम्॥ अश्रुणीति किम्। बप्फो ऊष्मा॥ ६१॥

कार्षापणे॥ ६२॥

कार्षापणे संयुक्तस्य हो भवति। काहावणो। कहावणो इत्यत्र 'संयोगे' [१.२·४०] इति पूर्वमेव ह्रस्वः, पश्चादादेशः। अथवा कर्षापणशब्दात्सिद्धिः॥ ६२॥

---

57. S ढेरो for डेरो. M om. चकारात्. S बंहचेरं for बम्हचेरं BT अच्चेरं for अच्छेरं. S om. डित्त्वाद्दिलोपः. BT अच्चरिअं for अच्छरिअं. 59. KM om. वेत्यनुवर्तते. 60. K तूर्यादिषु for एषु. S लो for रो. M om. पृथग्योगात्. After दसारो GM add देशः; T adds दाशार्हः. 61. K बाष्पे for अश्रुवाचिनि बाष्पशब्दे. T om. नेत्रजलम्. 62. B स्तोः for संयुक्तस्य. KMS कहापणो for काहावणो. After काहावणो B adds बहुलाधिकारात्कासावणो. S om. अथवा. M om. अथवा...सिद्धिः. After °शब्दात् KST add वा. GT सिद्धः for सिद्धिः.

न वा तीर्थदुःखदक्षिणदीर्घे ॥ ६३ ॥

एषु संयुक्तस्य हत्वं न वा भवति। तूहं तित्थं। दुहं दुक्खं। दुहिओ दुक्खिओ। दाहिणो दक्खिणो। दीहो दीहरो दिग्घो ॥६३॥

कूष्माण्ड्यां ण्डश्च तु लः ॥ ६४ ॥

कूष्माण्डीशब्दे प्रथमस्य संयुक्तस्य हकारो भवति। ण्ड इत्यस्य लत्वं तु भवति। कोहली कोहण्डी। कोहली इत्यत्र 'संयोगे' [१·२·४०] इति प्रागेव ह्रस्वः पश्चाल्लत्वम् ॥ ६४ ॥

त्वथ्वद्वध्वां क्वचिच्चछजझाः ॥ ६५ ॥

त्व थ्व द्व ध्व इत्येतेषां यथासंख्यं च छ ज झ इत्येते क्वचित्प्रयोगानुसारेण भवन्ति। त्वस्य चः—भुक्त्वा भोच्चा। ज्ञात्वा णच्चा। श्रुत्वा सोच्चा ॥ थ्वस्य छः—पृथ्वी पिच्छी ॥ द्वस्य जः— विद्वान् विज्जं ॥ ध्वस्य झः—ध्वनिः झुणी। बुद्ध्वा बुज्झा ॥ सअलपिच्छीविज्जं, सकलपृथ्वीविद्वान् ॥ ६५ ॥

ह्लो ल्हः ॥ ६६ ॥

ह्लकारस्य लकाराक्रान्तो हकारो भवति। कह्लारम् कल्हारं। प्रह्लादः पल्हादो ॥ ६६ ॥

श्मष्मस्मह्मामस्मररश्मौ म्हः ॥ ६७ ॥

श्म ष्म स्म ह्म इत्येतेषां म्ह इत्यादेशो भवति स्मररश्मिशब्दौ वर्जयित्वा। काश्मीरः कम्हारो। ग्रीष्मः गिम्हो। ऊष्मा उम्हा। विस्मयः विम्हओ ॥ अस्मादृशः अम्हारिसो॥ ब्रह्मा बम्हा। ब्रह्माणः बम्हाणो। ब्रह्मचर्यम् बम्हचेरं ॥ अस्मररश्माविति किम्। स्मरः सरो। रश्मिः रस्सी ॥ ६७ ॥

---

63. S om. न. KS तीहं; T_1 तुहं; T_2 तिहं for तूहं. T om. दिग्घं. 64. M लः for लत्वं. K S वा for तु. M om. कोहली इत्यत्र संयोगे इति. 65. S om. थ्व in the Sūtra. K S त्वादीनां; B एतेषां यथासंख्यं; M एतेषां चत्वार आदेशाः for त्व थ्व द्व ध्व इत्येतेषां; S om. श्रुत्वा सोच्चा. KS पुच्छी for पिच्छी. KS विज्जो for विज्जं. K बोज्झा for बुज्झा. 66. S कहलारं for कल्हारं. GKM पल्हाओ; S पहलाओ for पल्हादो. 67. M स्मररश्मिशब्दवर्जं for °शब्दौ वर्जयित्वा. KMS काश्मीराः कम्हारा for काश्मीरः कम्हारो. K बह्माणो for बम्हाणो. S बंह्चेरं for बम्हचेरं. S रंसि for रस्सी.

पक्ष्मणि ॥ ६८ ॥

म्ह इत्यनुवर्तते । पक्ष्मशब्दे स्तोः म्ह इत्यादेशो भवति । पक्ष्माणि पम्हाइं ॥ पम्हलल्लोअणो पक्ष्मलल्लोचनः ॥ ६८ ॥

श्नष्णस्नह्नह्लक्ष्णां ण्हः ॥ ६९ ॥

एषां ण्ह इत्यादेशो भवति । श्न– प्रश्नः पण्हो । शिश्नः सिण्हो ॥ ष्ण–विष्णुः विण्हू । जिष्णुः जिण्हू । कृष्णः किण्हो । उष्णीषम् उण्हीसं ॥ स्न– स्नातः ण्हाओ । प्रस्नवः पण्हओ । ज्योत्स्ना जोण्हा ॥ ह्न–जह्नुः जण्हू ॥ ह्ल–पूर्वाह्लः पुव्वण्हो । अपराह्लः अवरण्हो ॥ क्ष्ण–श्लक्ष्णम् सण्हं । तीक्ष्णम् तिण्हं ॥ ६९ ॥

सूक्ष्मे ॥ ७० ॥

सूक्ष्मे संयुक्तस्य ण्हो भवति । सुण्हं । सण्हं ॥७०॥

आश्लिष्टे लधौ ॥ ७१ ॥

आश्लिष्टे संयुक्तयोर्यथासंख्यं लधौ भवतः । आलिद्धो ॥ ७१ ॥

ठढौ स्तब्धे ॥ ७२ ॥

स्तब्धे संयुक्तयोर्यथासंख्यं ठढौ भवतः । ठड्ढो ॥ ७२ ॥

तो ढो रश्चारब्धे तु ॥ ७३ ॥

आरब्धे स्तोः तकारो भवति तु, तत्संनियोगेन रस्य च ढः । आढत्तो आरद्धो ॥ ७३ ॥

सो बृहस्पतिवनस्पत्योः ॥ ७४ ॥

अनयोः संयुक्तस्य सकारो भवति तु । बहस्सई बहप्फई । बिहस्सई बिहप्फई । वणस्सई वणप्फई ॥ ७४ ॥

---

68. S om. म्ह इत्यनुवर्तते. S संयुक्तस्य for स्तोः. S म्हकारो for म्ह इत्यादेशो. 69. KS श्न इत्येतेषां for एषां. G वेण्हू for विण्हू. M om. from कृष्णः down to अवरण्हो. GK कण्हो; S किण्हू for किण्हो. T जण्णू for जण्हू. S om. तीक्ष्णम् तिण्हं. 70. S om. the Sūtra and Com. BK om. सण्हं. 71. M लडौ in the Sūtra and Com. S आलंधो for आलिद्धो. 72. M om. यथासंख्यं. 73. KS संयुक्तस्य for स्तोः. GMT तत्संनियोगे for °योगेन. 74. S om. the Sūtra and Com. M om. तु. T बुहस्सई for बहस्सई. MST अहस्सई अहप्पई for बिहस्सई बिहप्फई,

शोर्लुक्खोः स्तम्बसमस्तनिस्पृहपरस्परश्मशानश्मश्रौ ॥ ७५ ॥

स्तम्बादिषु शोः शषसानां खोरादौ वर्तमानानां संयुक्तसंबन्धिनां लुग्भवति । तम्बो । समत्तो । निप्पिहो । परोप्परं । मसाणं । मंसू ॥७५॥

श्चस्य हरिश्चन्द्रे ॥७६॥

हरिश्चन्द्रे श्चस्य लुग्भवति । हरिअन्दो ॥७६॥

कगटडतदप ≍क ≍पशोरुपर्यद्रे ॥७७॥

क ग ट ड त द पानां जिह्वामूलीयोपध्मानीययोः शोः शषसानां च संयुक्तसंबन्धिनामुपरिस्थितानां लुग्भवति अद्रे द्रकारं वर्जयित्वा । क—भुक्तम् भुत्तं। सिक्थम् सित्थं ॥ ग—दुग्धम् दुद्धं । मुग्धम् मुद्धं ॥ ट—षट्पदः छप्पओ । कट्फलम् कप्फलं ॥ ड—खड्ग खग्गो । षड्जः सज्जो ॥ त—उत्पलम् उप्पलं । उत्पातः उप्पाओ । द—मद्गुः मग्गू । मुद्गरः मोग्गरो । उद्विग्नः उव्विग्गो ॥ प—सुप्तः सुत्तो । गुप्तः गुत्तो ॥ ≍क—दुःखम् दुक्खं ॥ ≍प—अन्तःपातः अन्तप्पाओ ॥ श—निश्चलः निश्चलो । श्लक्ष्णं लण्हं । श्च्योतति चुअइ ॥ ष—गोष्ठी गोट्ठी । षष्ठः छट्ठो ॥ स—स्खलितः खलिओ । स्नेहः णेहो ॥ अद्र इति किम् । समुद्रो । चन्द्रो । भद्रं ॥ अद्र इति निषेधोऽयं 'धात्रीद्रे रस्तु' [१·४·८०] इति विकल्पिते रेफलोपे प्राप्तो दकारलोपो मा भूदिति ॥७७॥

---

75. K परप्परो; S परप्पलो for परोप्परं. B मंसु; S मस्सू for मंसू. 76. GK श्चकारस्य for श्चस्य. 77. B om. अद्रे S om. द्रकारं वर्जयित्वा; K द्रकारमात्रवर्जिते सति; M द्र इत्यक्षरवर्जं; T द्रे न भवति. T om. सिक्थं सित्थं; M सिक्थः सित्थो. GMT मुग्धा मुद्धा for मुग्धम् मुद्धं. T उद्घातः for उत्पादः. M मद्दलः मद्दलो for मद्गुः मग्गू. T मुद्गरं मोग्गरं for मुद्गरः मोग्गरो. KMS om. उद्विग्नः उव्विग्गो. KMS om. गुप्तः गुत्तो. S सांतःपातः संतप्पाओ for अन्तःपातः अन्तप्पाओ. BK समुद्दो चंदा भद्दं for समुद्रो चन्द्रो भद्रं. B रेफलोपेऽप्राप्ते; G रेफलोपे प्राप्तो; M रलोपे प्राप्तो; KT रलोपे प्राप्ते.

लवरामधश्च ॥ ७८ ॥

लवरां संयुक्तस्याधो वर्तमानानां चकारादुपरि स्थितानां च लुग्भवति। अधः। ल—श्लक्ष्णम् सण्हं। विक्लवः विक्कओ॥ व—पक्वः पक्को। विध्वस्तः विद्धत्थो॥ र—चक्रम् चक्कं। ग्रहः गहो। रात्रिः रत्ती॥ उपरि। ल—उल्का उक्का। वल्कलम् वक्कलं॥ व—शब्दः सद्दो। अब्दः अद्दो। लुब्धकः लुद्धओ॥ र—अर्कः अक्को। तर्कः तक्को॥७८॥

मनयाम् ॥ ७९ ॥

संयुक्तस्याधो वर्तमानानां मनयां लुग्भवति। म—युग्मम् जुग्गं। रश्मिः रस्सी। स्मरः सरो॥ न—नग्नः नग्गो। लग्नः लग्गो॥ य—श्यामा सामा। कुड्यम् कुड्डं॥ अत्र द्वितीयकल्मषमाल्यादिष्वेतत्सूत्रत्रयविधिप्राप्तौ यथादर्शनं लोपः। द्वितीयः बिइओ। द्विगुणः बिउणो। द्वादश बारह। द्वाविंशतिः बावीसा। द्वात्रिंशत् बत्तीसा। कल्मषम् कम्मसं। शुल्बम् सुव्वं॥ क्वचित्तु अधः। द्विपः दिवो। द्वीपः दीवो। द्विजातिः दुआई। काव्यम् कव्वं। दिव्यम् दिव्वं। माल्यम् मल्लं। कुल्या कुल्ला॥ क्वचित्पर्यायेण। उद्विग्नः उद्विग्गो उव्विण्णो॥ रेफस्य तु सर्वत्रैव॥ सव्वं। वक्कं। चक्कं॥ 'सर्वत्र लवरामचन्द्रे' [हे. २·७९] इति कश्चित्। तदयुक्तम्। चन्दो चन्द्रो इति स्वयमेवोदाहृतत्वा-त्तथाविधप्रयोगदर्शनाच्च उत्तरसूत्रोक्तविकल्प एवाभ्युपगन्तव्यः॥७९॥

---

78. KS संयुक्तसंबंधिनां for संयुक्तस्य. M स्यात् for भवति. GKMS पक्कं पिक्कं for पक्वः पिक्को. 79. M स्थितानां for वर्तमानानां. After लग्गो B adds मग्नः मग्गो. B कोड्डं for कुड्डं. G °त्रयस्यापि प्राप्तौ; M °त्रयप्राप्तौ; T °त्रयप्राप्तो for °त्रयविधिप्राप्तौ. S om. द्विपः दिवो. B दिआई; M द्विजाई for दुआई. MK उव्विग्गो for उद्विग्गो. M उद्विण्णो for उव्विण्णो. BGp MT केचित् for कश्चित्. BT उत्तरत्र for उत्तर°.

धात्रीद्रे रस्तु ॥ ८० ॥

धात्रीशब्दे द्रशब्दे च रेफस्य लुग्भवति तु । धात्री धत्ती धारी ॥ ह्रस्वात्प्रागेव रलोपे धाई ॥ द्र—चन्दो चन्द्रो । मन्दो मन्द्रो । रुदो रुद्रो । भद्दं भद्रं । समुद्दो समुद्रो ॥ 'ह्रदे दहयोः' [१·४·११५] इति ह्रदशब्दस्य दहयोः स्थितिपरिवृत्तौ द्रह इति रूपम् । तत्र च दहो इति ॥ केचिन्नेच्छन्ति द्रे रलोपम् । द्रहशब्दः संस्कृतेऽपीति केचित् । वोद्रहास्तरुणपुरुषादिवाचका नित्यं रेफसंयुक्ता देश्या एव । सिक्खन्तु वोद्रहीओ । वोद्रहद्रहम्मि पडिआ । शिक्षन्तु तरुण्यः । तरुणह्रदे पतिता ॥८०॥

ह्रस्य मध्याह्ने ॥ ८१ ॥

मध्याह्ने हस्य लुग्वा भवति । मज्झण्णो मज्झण्हो ॥ ८१ ॥

ज्ञो ञोऽविज्ञाने ॥ ८२ ॥

ज्ञकारसंबन्धिनो ञकारस्य लुग्भवति तु, अविज्ञाने विज्ञानशब्दे न भवति । ज्ञानम् जाणं णाणं । सर्वज्ञः सव्वज्जो सव्वण्णो । आत्मज्ञः अप्पज्जो अप्पण्णो । दैवज्ञः दइवज्जो दइवण्णो । इङ्गितज्ञः इङ्गिअज्जो इङ्गिअण्णो । अभिज्ञः अहिज्जो अहिण्णो । मनोज्ञः मणोज्जो मणोण्णो । प्रज्ञा पज्जा पण्णा। आज्ञा अज्जा अण्णा । संज्ञा सज्जा सण्णा ॥ अविज्ञान् इति किम् । विणाणं ॥८२॥

द्वोर्द्वारे ॥ ८३ ॥

द्वारे दकारवकारयोः पर्यायेण लुग्भवति तु । दारं वारं ॥ पक्षे । दुवारं ॥ ८३ ॥

रात्रौ ॥ ८४ ॥

रात्रिशब्दे संयुक्तस्य लुग्भवति तु । राई रत्ती ॥ ८४ ॥

---

80. M स्यात् for भवति. S om. मंदो मंद्रो रुद्दो रुद्रो; T om. मंदो मंद्रो. G M om. ह्रदे दहयोरिति. GT om. द्रे. T वोद्रहशब्दः for द्रहशब्दः. S कश्चित्. BT द्रहादयः for वोद्रहादयः; Gp बोद्रहादयः. 81. K हकारस्य for ह्रस्य. M स्यात् for भवति. 82. G ज्ञस्य for ज्ञकारस्य. M विना शब्दर्थशब्दो...for अविज्ञाने...भवति. GST सव्वण्णू. GST °ण्णू for °ण्णो under this Sūtra. K अभिज्जो for अहिज्जो. K आणा for अण्णा. After अण्णा G adds आणा. 83. After दुवारं B adds देरं वेरं.

रितो द्वित्वल् ॥ ८५ ॥

रेफानुबन्धस्यादेशव्यञ्जनस्य द्वित्वं लिद्भवति । अङ्कोल्लो अङ्कोलः। रुण्णं रुदितम् । करणिज्जं करणीयम् ॥ ८५ ॥

शेषादेशस्याहॄोऽचोऽखोः ॥ ८६ ॥

द्वित्वमिति वर्तते । संयुक्तयोरेकतरस्य लोपे योऽवशिष्यते स शेषः । तस्य संयुक्तादेशस्य च अहॄः हकाररेफवर्जितस्य अचः स्वरात्परस्य अखोः अनादौ वर्तमानस्य द्वित्वं लिद्भवति ॥ शेषः—समस्तः समत्तो । निस्पृहः णिप्पिहो । भुक्तम् भुत्तं । दुग्धम् दुद्धं । षट्पदः छप्पओ । खड्गः खग्गो । उत्पलम् उप्पलं । मुद्गरः मुग्गरो । प्राप्तः पत्तो । दुर्गम् दुग्गं । दुःखम् दुक्खं । अन्तःपातः अन्तप्पाओ । निश्चलः णिच्चलो । दुष्करम् दुक्करं । विप्लवः विप्प-ओ । पक्वम् पक्कं । धूर्तः धुत्तो । रात्रिः रत्ती । युक्तम् जुत्तं । युग्मम् जुग्गं । रश्मिः रस्सी । नग्नः नग्गो । काव्यम् कव्वं ॥ आदेश—रक्तः रग्गो । सक्तः सग्गो । अमात्यः अमच्चो । आत्मा अप्पा । आर्या अज्जा । उपाध्यायः उव-ज्झाओ । सह्यः सज्झो । साध्वसम् सज्झसं । बृहस्पतिः बहप्फई ॥ अहॄ इति किम् । विह्वलः विहलो । दुःखम् दुहं । बाष्पः बाहो । धात्री धारी । तूर्यम् तूरं। धैर्यम् धीरं ॥ अच इति किम् । कांस्यम् कंसं । वयस्यः वअंसो । संध्या संझा । भिन्दिपालः भिण्डिवालो ॥ अखोरिति किम् । स्खलितः खलिओ । स्थूलः थूरो । स्तम्भः खम्भो ॥ ८६ ॥

---

85. S om. the Sūtra. BKM अंकोल्लं for अंकोल्लो. K om. करणीयम्.
86. M अनुवर्तते for वर्तते. M अवशिष्टः for अवशिष्यते. M om. अहः, M om. अचः. GMS om. लित्. GKS मोग्गरो for मुग्गरो. GKM S om. दुर्गम् दुग्गं. GKM om. युक्तम् जुत्तं. GK शक्तः for सक्तः S अज्जू for अज्जा. S बुहप्पई for बहप्फई. S अस्तोरिति for अखोरिति.

दीर्घाच्च ॥ ८७ ॥

शेषादेशस्येति वर्तते । लाक्षणिकादलाक्षणिकाच्च दीर्घात्परयोः शेषादेशयोः द्वित्वं न भवति । लाक्षणिकात्—निःश्वासः णीसासो । स्पर्शः फासो । दंष्ट्रा दाढा । अस्पर्शः अप्फासो ॥ लाक्षाणिकात्—पार्श्वम् पासं । शीर्षम् सीसं । ईश्वरः ईसरो । द्वेष्यः वेसो । लास्यम् लासं । आस्यम् आसं । प्रेष्यः पेसो । निर्माल्यम् ओमालं । आज्ञा आणा । आज्ञप्तिः आणत्ती । आज्ञापनम् आणात्रणं ॥ अमच्चो इत्यादिषु 'संयोगे'[१·२·४०] इति आदावेव ह्रस्वः, पश्चाल्लोपे द्वित्वम् । अलाक्षणिकात्प्रायो द्वित्वाभावः प्रयोगतोऽनुसर्तव्यः ॥ ८७ ॥

कर्णिकारे णो वा ॥ ८८ ॥

कर्णिकारे शेषस्य णस्य द्वित्वं वा न भवति । कण्णिआरो कणिआरो ॥ णग्रहणमुत्तरार्थम् ॥ ८८ ॥

धृष्टद्युम्ने ॥ ८९ ॥

धृष्टद्युम्ने आदेशस्य णस्य द्वित्वं न भवति । पृथग्योगान्न विकल्पः । धट्ठज्जुणो ॥ ८९ ॥

वा से ॥ ९० ॥

से समासे शेषादेशयोर्द्वित्वं वा भवति । णइग्गामो णइगामो । कुसुमप्पअरो कुसुमपअरो । देवत्थुई देवथुई । हरक्खन्दा हरखन्दा हरस्कन्दौ । आणालक्खम्भो आणालखम्भो ॥ ९० ॥

---

87. KMST om. लाक्षणिकात्. K देसो for वेसो. GKMT अवमाल्यं for निर्माल्यम्. K ओमालो for °मालं. K आणवणं for आणावणं. After आणावणं S adds इत्यादि. GKST om. लोपे. 89. BMT om. धृष्टद्युम्ने in Com. M स्याद्विर्न for भवति । पृथग्योगान्न विकल्पः. B धट्ठज्जुणो. 90. M om. से in Com. BT हरक्कन्दा हरकंदा for °खन्धा हरखंधा. K आलाणक्खम्भो for आणाल°. T om. आणालखंभो.

प्रमुक्तगे ॥ ९१ ॥

से इति वर्तते वेति च । प्रमुक्तादिषु समासे यथादर्शनं व्यञ्जनस्य द्वित्वं वा भवति । प्रमुक्तः पम्मुक्को पमुक्को । सपिपासः सप्पिवासो सपिवासो । बद्धफलः बद्धप्फलो बद्धफलो । मलयशिखरखण्डः मलयसिहरक्खण्डो मलयसिहर-खण्डो । त्रैलोक्यम् तेल्लोक्कं तेलोक्कं । सपरितापः सप्परितावो सपरितावो । परवशः परव्वसो परवसो । प्रतिकूलम् पडिक्कूलं पडिकूलं । अदर्शनम् अद्दंसणं अदंसणं । इत्यादि ॥ आकृतिगणत्वात् प्रफुल्लम् पप्फुल्लं पफुल्लं । सपरिहासम् सप्परिहासं सपरिहासं । इत्यादि सिद्धम् ॥ ९१ ॥

दैवगेषु ॥ ९२ ॥

दैवादिषु यथादर्शनं व्यञ्जनस्य द्वित्वं वा भवति । दैवम् दइव्वं दइवं । व्याकुलः वाउल्लो वाउलो । नखः णक्खो णहो । नीडं णेड्डं णीडं । निहितः णिहित्तो णिहिओ । मृदुत्वं माउक्कं माउअं । कुतूहलम् कोउहल्लं कोऊहलं । स्थूलः थुल्लो थोरो । एकः एक्को एओ । व्याहृतम् वाहित्तं वाहिअं । तूष्णीकः तुण्हिक्को तुण्हिओ । मूकः मुक्को मूओ । सेवा सेव्वा सेवा । अस्मदीयम् अम्ह-क्केरं अम्हकेरं । हूतम् हुत्तं हूअं । स्त्यानम् ठिण्णं ठाणं । स्थाणुः खण्णू खाणू । स इव सो च्चिअ सो चिअ । स एव सो च्चेअ । इत्यादि ॥ ९२ ॥

तैलादौ ॥ ९३ ॥

तैलादिषु यथादर्शनमन्त्यस्यानन्त्यस्य च व्यञ्जनस्य द्वित्वं भवति । पृथग्योगान्नित्यम् ॥ तैलम् तेल्लं । व्रीडा विड्डा । प्रेम पेम्मं । स्रोतः सोत्तं । प्रभूतम् पहुत्तं । मण्डूकः मण्डुक्को । उलूखलम् ओक्खलं । यौवनम् जोव्वणं । ऋजुः उज्जू । विचकिलम् वेइल्लं । इत्यादि ॥ ९३ ॥

---

91. KS om. वेति च. After पफुल्लं BK add अप्प-रिहासो अपरिहासो. 92. G दैवगेऽस्तौ for the Sūtra. After दैवादिषु GKM add अनादौ. M om. यथादर्शनं. B अम्मकेरं अम्मकेरं for अम्हक्केरं अम्हकेरं. After अम्हकेरं B adds भूअं भुत्तं भूतम् G थिण्णं थीणं for ठिण्णं ठाणं. After सो च्चेअ B adds चिअस्सा चिअसा (?) 93. T अन्त्यान-न्त्यस्य for अन्त्यस्यानन्त्यस्य च. M द्वित्वं स्यान्नित्यम् for द्वित्वं भवति. M om. पृथग्योगान्नित्यम्; GK °योगाच्च विकल्पः. KMS om. उलूखलं ओक्खलं.

पूर्वमुपरि वर्गस्य युजः ॥ ९४ ॥

वर्गसंबन्धिनो युग्वर्णस्य शेषस्यादेशस्य वा द्वित्वप्रसङ्गे उपरि पूर्वमक्षरं भवति । वर्गाणां द्वितीयस्योपरि प्रथमं चतुर्थस्योपरि तृतीयमित्यर्थः । व्याख्यानम् वक्खाणं । वृक्षः रुक्खो । व्याघ्रः वग्घो । अर्घति अग्घइ । मूर्छा मुच्छा । अक्षीणि अच्छीणि । निर्झरः णिज्झरो । मध्यम् मज्झं । निष्ठुरः णिट्ठुरो । मुष्टिः मुट्ठी । तीर्थम् तित्थं । हस्ती हत्थी । हस्तः हत्थो । निर्धनः णिद्धणो । आश्लिष्टः आलिद्धो । गुल्फम् गुप्फं । पुष्पम् पुप्फं । निर्भरः णिब्भरो । विभ्रमः विब्भमो । पिप्पलः पिप्फलो ॥ प्रमुक्तादौ [१·४·९१] द्वित्वे मलयसिहरक्खण्डो ॥ देवादौ [१·४·९२] णक्खो ॥ तैलादौ [१·४·९३] ओक्खलं ॥ समासे [१·४·९०] कइद्धओ कपिध्वजः ॥ द्वित्व इत्येव । ख्यातः खाओ ॥ ९४ ॥

प्राक्श्लाघाप्लक्षशार्ङ्गे ङ्लोऽत् ॥ ९५ ॥

श्लाघादिषु ङ्लः ङकारलकारयोः प्राक् अत् अकारो भवति । श्लाघा सलाहा । प्लक्षः पलक्खो । शार्ङ्गम् सारङ्गं ॥ ९५ ॥

क्ष्मारत्नेऽन्त्यहलः ॥९६॥

प्रागित्यनुवर्तते, अदिति च । क्ष्माशब्दे रत्नशब्दे च संयुक्तस्यान्त्यहलः अन्त्यव्यञ्जनस्य प्रागत्वं भवति । क्ष्मा छमा खमा । रत्नम् रअणं ॥९६॥

स्नेहाग्न्योर्वा ॥ ९७ ॥

अन्त्यहल इत्यनुवर्तते । स्नेहाग्न्योः संयुक्तस्यान्त्यहलः प्रागत्वं वा भवति । सणेहो णेहो । अगणी अग्गी ॥ ९७ ॥

---

94. T om. प्रथमचतुर्थस्योपरि. S om. तीर्थम् तित्थं । हस्ती हत्थी । हस्तः हत्थो. M om. विभ्रमः विब्भमो. B विप्पलः विंचूलो; T पिप्पलो विचूलो (?); GK om. पिप्पलः. GK विप्फलो विब्भलो for पिप्फलो. 95. T पळग्घो for पलक्खो. 96. KS क्ष्मारत्नशब्दयोः for क्ष्माशब्दे रत्नशब्दे च. K om. छमा. GT om. खमा. 97. S स्नेहाग्नी वा for the Sūtra. S om. अन्त्यहल इत्यनुवर्तते; B इति वर्तते; M इत्यनुवृत्तिः. M सिणेहो for णेहो.

शर्षतप्तवज्रेष्वित् ॥ ९८ ॥

र्श र्ष इत्येतयोस्तप्ते वज्रे च संयुक्तस्यान्त्यहलः प्रागित्वं वा भवति । र्श—आदर्शः आअरिसो आअंसो । सुदर्शनः सुअरिसणो सुदंसणो । दर्शनम् दरिसणं दंसणं ॥ र्ष—वर्षम् वरिसं वासं । वर्षाः वरिसा वासा । वर्षशतम् वरिससअं वाससअं । तप्तः तविओ तत्तो । वज्रं वइरं वज्जं ॥ ९८ ॥

हर्षामर्षश्रीह्रीक्रियापरामर्शकृत्स्नदिष्टयार्हे ॥ ९९ ॥

हर्षादिषु र्हे इत्यत्र च संयुक्तस्यान्त्यहलः प्रागित्वं भवति ॥ पृथग्योगान्नित्यम् ॥ हर्षः हरिसो । अमर्षः अमरिसो । श्रीः सिरी । ह्रीः हिरी । अह्रीकः अहिरिओ । क्रिया किरिआ । परामर्शः परामरिसो । कृत्स्नम् कसिणं । दिष्ट्या दिट्ठिआ ॥ र्हे—अर्हः अरिहो । गर्हा गरिहा । बर्हः बरिहो ॥ ९९ ॥

स्याद्भव्यचैत्यचौर्यसमे यात् ॥ १०० ॥

स्याद् भव्य चैत्य इत्येतेषु चौर्यसमेषु च यकारात्प्रागित्वं भवति । स्यात् सिआ । स्याद्वादः सिआवाओ । भव्यः भविओ । चैत्यम् चेइअं । चौर्यसम—चौर्यम् चोरिअं । गाम्भीर्यम् गम्भीरिअं । धैर्यम् धीरिअं । भार्या भारिआ । सौन्दर्यम् सुन्दरिअं । ब्रह्मचर्यम् बम्हचरिअं । सूर्यः सूरिओ । शौर्यम् सोरिअं । आचार्यः आइरिओ । वर्यः वरिओ । वीर्यम् वीरिअं । चर्या चरिआ । स्थैर्यम् थेरिअं । इत्यादि ॥ आकृतिगणत्वात्पर्यङ्कादयः । पर्यङ्कः पलिअङ्को ॥ १०० ॥

---

98. T शार्ष° for शर्ष° in the Sūtra; Bp °वज्रतप्तेषु in the Sūtra. M om. आअंसो; BT आअस्सो; G आयंसो; K आइंसो. M om. वइरं. 99. KS पृथग्योगाच्च विकल्पः; M पृथक्त्वान्नित्यम्. M om. गरिहा गर्हा । बर्हः बरिहो. 100. K स्यादित्यादिषु for स्या...इत्येतेषु T चौर्यसमेषु for °समे. M चोरिओ for चोरिअं. After चोरिअं S adds चोरिआ. M om. from गाम्भीर्यम् down to the end of the Sūtra S om. पर्यङ्कादयः. GK परिअंको for पलिअंको.

लादक्लीबेषु ॥ १०१ ॥

संयुक्तस्य लकारात्प्रागित्वं भवति । अक्लीबेषु क्लीबप्रकारेषु न भवति । क्लिन्नम् किलिन्नं । क्लिष्टम् किलिट्ठं । क्लृप्तम् किलित्तं । प्लुष्टम् पिलुट्ठं । क्लान्तम् किलितं । प्लोषः पिलोसो । श्लेष्मा सिलिम्हो । श्लेषः सिलेसो । शुक्लम् सुकिलं । क्लेदः किलेओ । क्लेशः किलेसो । प्लवः पिलेवो । अम्लम् अमिलं । ग्लायति गिलाअइ । म्लायति मिलाअइ । म्लानम् मिलाणं । क्लाम्यति किलम्मइ ॥ अक्लीबेष्विति किम् । क्लीबः कीवो । विक्लवः विक्कओ । क्लमः कमो । प्लवः पवो । विप्लवः विप्पओ । शुक्लपक्षः सुक्कपक्खो । उत्प्लावयति उप्पावेइ ॥ १०१ ॥

नात्स्वप्ने ॥ १०२ ॥

स्वप्ने संयुक्तस्य नकारात्प्रागित्वं भवति । सिविणो सिमिणो ॥१०२॥

स्निग्धे त्वदितौ ॥ १०३ ॥

नादिति वर्तते । स्निग्धे संयुक्तस्य नकारात्प्रागत्वमित्वं च तु भवतः । सिणिद्धं सणिद्धं । पक्षे णिद्धं ॥ १०३ ॥

कृष्णे वर्णे ॥ १०४ ॥

अदिताविति वर्तते । वर्णवाचिनि कृष्णशब्दे संयुक्तस्यान्त्यहलः प्राग-दितौ भवतः । कसणो कसिणो ॥ वर्ण इति किम् । कण्हो कृष्णः (विष्णुः) ॥ १०४ ॥

---

101. GT लादक्लबेषु; M लोऽक्लबेषु for the Sūtra. GMT अक्लबेषु क्लबप्रकारेषु. K पिलुट्टं for पिलिट्ठं. K किलतं for किलिन्नं. K प्रोषः for प्लोषः. K सुकिलं for सुकिलं. T पिळवे for पिलेवो. B किलामइ for किलम्मइ. GKMT अक्लबेषु for अक्लीबेषु. GKMT क्लबः कओ for क्लीबः कीओ. G om. उत्प्लावयति उप्पावेइ. S उत्सादयति for उत्प्लावयति. 102. M न इत् स्वप्ने for the Sūtra. 103. BpT स्निग्धे तु for the Sūtra. MS स्निग्धे अदितौ for the Sūtra. S om. नादिति वर्तते. S om. तु. G S om. पक्षे. S om. णिद्धं. 104. K कृष्णवर्णे for the Sūtra. After कृष्णशब्दे S adds संयुक्तस्य. After अदितौ K adds तु. M om. कृष्णः.

अर्हत्युच्च ॥ १०५ ॥

अर्हच्छब्देऽन्त्यहलः प्रागुत्वमदितौ च भवन्ति । अरुहो अरहो अरिहो ॥ अरुहन्तो अरहन्तो अरिहन्तो ॥ १०५ ॥

तन्व्याभे ॥ १०६ ॥

उदित्यनुवर्तते । उकारान्ता ईकारप्रत्ययान्तास्तन्व्याभाः, तेषु संयुक्तस्यान्त्यहलः प्रागुत्वं भवति । तन्वी तणुवी । लघ्वी लहुवी । गुर्वी गुरुवी । पृथ्वी पुहुई । मृद्वी मउई । बह्वी बहुई । पट्वी पटुई । इत्यादि ॥ १०६ ॥

स्रुघ्ने रात् ॥ १०७ ॥

स्रुघ्ने संयुक्तस्य रात्पूर्वमुत्वं भवति । सुरुग्घं नगरम् ॥१०७॥

एकाचि श्वःस्वे ॥ १०८ ॥

एकस्वरयोः श्वः स्व इत्येनयोः संयुक्तस्यान्त्यहलः प्रागुत्वं भवति । श्वःकृतं सुवो कअं । स्वे जनाः सुवे जणा ॥ एकाचीति किम् । स्वजनः सअणो ॥१०८॥

वा छद्मपद्ममूर्खद्वारे ॥ १०९ ॥

एषु स्तोरन्त्यहलः प्रागुत्वं वा भवति । छउमं छम्मं । पउमं पोम्मं । मुरुक्खो मुक्खो । दुवारं । पक्षे । दारं वारं देरं वेरं ॥१०९॥

ईल् ज्यायाम् ॥ ११० ॥

ज्याशब्दे अन्त्यहलः प्रागीत्वं लिद्भवति । जीआ ॥ ११० ॥

---

105. B अरुहितो आरिहितो अरहतो for अरुहन्तो etc. 106. S om. this Sūtra and Com. GMT ङीप्रत्ययान्ताः for ईकारप्रत्ययान्ताः. K लघुवी for लहुई. K पिहुई for पुहुई. GKMT om. पट्वी पटुई. 107. S om. the Sūtra and Com. M om. संयुक्तस्य. M प्रागुत्वं स्यात् for पूर्वमुत्वं भवति. 108. S om. the Sūtra and Com. M प्रागुक्तं स्यात् for प्रागुत्वं भवति. B सजणो for सअणो. 109. M स्यात् for भवति. B पम्मं; T पट्टं for पोम्मं. G om. वारं वेरं; M om. देरं वेरं; T om. वारं देरं वेरं. 111. S विपरीतवृत्तिः for स्थितिपरिवृत्तिः. M om. भवति.

ह्र्श्च महाराष्ट्रे होर्व्यत्ययः ॥ १११॥

स्तोरिति निवृत्तम् । महाराष्ट्रशब्दे होः हकाररेफयोर्व्यत्ययः स्थितिपरिवृत्तिर्भवति । एकस्य स्थाने एको भवतीत्यर्थः । ह्र्श्च ह्रस्वश्च दीर्घस्य भवति । मरहट्ठो ॥१११॥

लनोरालाने ॥ ११२ ॥

व्यत्यय इत्यनुवर्तते । आलाने लकारनकारयोर्व्यत्ययो भवति । आणालो ॥ ॥११२॥

वाराणसीकरेण्वां रणोः ॥ ११३ ॥

अनयो रेफणकारयोर्व्यत्ययो भवति । वाणारसी । कणेरू ॥ करेण्वामिति किम् । स्त्रीलिङ्गनिर्देशादन्यत्र न भवति । एसो करेणू ॥११३॥

ललाटे डलोः ॥ ११४ ॥

ललाटे टस्य डत्वे डलयोर्व्यत्ययो भवति । णिडालं णडालं । 'लो ललाटे च' [१·३·८१] इति आद्यस्य णत्वमेव ॥११४॥

ह्रदे दहयोः ॥ ११५ ॥

ह्रदे दहयोर्व्यत्ययो भवति । द्रहो दहो ॥११५॥

चलयोरचलपुरे ॥ ११६ ॥

अचलपुरे चलयोर्व्यत्ययो भवति । अलअउरं ॥११६॥

ह्ये ह्योर्वा ॥ ११७ ॥

ह्य शब्दे हकारयकारयोर्व्यत्ययो वा भवति । गुह्यम् गुय्हं गुज्झं । सह्यं सय्हं सज्झं ॥११७॥

---

112. GKS add आणालखंभो. After °खंभो G adds आलानस्तम्भः । स्तम्भ [१·४·११] इति खत्वम्; K adds आलाने गजबन्धनस्तम्भ इत्यर्थः. 114. K णो ललाटे for the Sūtra. After डत्वे G adds सति. G om. णिडालं. 115. M दहोः for दहयोः in the Sūtra. 116. G अलअपुरं; KS अलचपुरं for अलअउरं. 117. M om. the Sūtra and Com. After गुज्झं BT read गुहअहं. After सज्झं BT read सहिअहं.

लघुके लहोः ॥ ११८ ॥

लघुकशब्दे घस्य हत्वे हलोर्व्यत्ययो वा भवति । हलुओ लहुओ ॥ घस्य व्यत्यये कृते पदादित्वाद् हत्वं न भवतीति हत्वकरणम् ॥११८॥

रलोर्हरिताले ॥ ११९ ॥

हरिताले रलोर्व्यत्ययो भवति । हरिआलो हलिआरो ॥११९॥

दर्वीकरनिवहौ दव्वीरयणिहवौ ॥ १२० ॥

एतयोर्यथासंख्यं दव्वीरअ णिहव इति कृतव्यत्ययविधानौ निपात्येते । दव्वीरओ सर्पः । पक्षे दव्वीअरो । णिहवो ॥१२०॥

गहिआद्याः ॥ १२१ ॥

गहिआ इत्यादयः शब्दा निर्वचनगोचरा निपात्यन्ते । (१) गहिआ काम्यमाना ग्राह्या काम्यमानत्वात् । ह्रस्वः, चौर्यसमत्वात्प्रागित्वं च ॥ (२) किमिघरवसणं कौशेये । कृमिगृहवसनं कृमिविहितावरणादेव तत्तन्तो- रुत्पत्तेः ॥ (३) णन्दिणी धेनुः । नन्दिनीव नन्दिनी ॥ (४) पडिसाओ घर्घरकण्ठः । प्रतिशब्दवत्त्वात् ध्वनेः प्रतिपादनत्वाद्वा ॥ (५) वइरोडो जारः । पतिं रोटयति वञ्चयतीति । पो वः । टो डः ॥ (६) अविणअवई अविनयपतिः ॥ (७) अणडो अनृतम् । प्रत्यादिपाठात् [१·३·३२] तस्य डः ॥ (८) अजडो अजडः शीघ्रकारित्वात् ॥

---

118. GS लहोः; M लघोः for हलोः in the Sūtra. G S लहोः for हलोः. S om. वा. T हकरणं for हत्वकरणम्. 119. M om. हरिताले रलोर्व्यत्ययो भवति. 120. M दर्वीकरनिवहे तु for the Sūtra. B °दव्विअर° in the Sūtra. After °णिहवौ in the Sūtra G adds तु. S यथा-संभवं for यथासंख्यं. M °विधानेन for °विधानौ. B दव्विरओ for दव्वीरओ. M om. पक्षे दव्वीअरो सर्पः. After णिहवो G adds णिवहो; T adds णीवाहो; S adds णिहओ. 121. (1) HD. 2.85. (2) HD. 2.33. GT किमिहरवसणं for किमिघर°. GT कौशेयम् for कौशेये. T_2 देवतरोरुत्पत्तेः for तत्तन्तोरुत्पत्तेः. (3) HD. 4.18.(4) HD. 4.17. B वडिणाओ; K वडिसाओ for पडिसाओ. (5) HD. 7.42. T आरुकट स्तेये । पतिं कुटति वञ्चयति for रुट... °यतीति.(6) HD. 1.18.T अविनयवती for °पतिः. (7) HD.1.18. (अणाडो).

(९) छिण्णो छिन्नः स्मरशरश्छिन्नत्वात् । (१०) छिण्णाली सदाचारंछिन्नां लात्यादत्ते इति ॥ (११) छिक्कओ अक्षिक्षतः नयनप्रीत्यनर्हत्वात् । अक्ष्णो-ऽकारस्य लुक् ॥ (१२) मदोली कामपरंपराकारणत्वात् । आदेरातोऽत् ॥ (१३) संचारी दूती । प्रीतिं संचारयतीति ॥ (१४) सहउत्थिआ सहोत्थिता दूती । कार्यानुकूलत्वात् ॥ (१५) मराली दूती । मृदुस्वभाव-त्वान्मधुरवचनत्वाद्वा ॥ (१६) पेसणआरी दूती प्रेषणं करोतीति ॥ (१७) अत्तिहरी दूती । आर्तिहरी संतर्पणशीलत्वात् ॥ (१८) पडिसोत्तो प्रतिकूले । प्रतिमुखं स्रोतः प्रवाहो यस्यासौ ॥ (१९) पडिक्खरो प्रति-कूले । प्रतिमुखं क्षरतीति ॥ (२०) जोओ (२१) दोसणिजन्तो (२२) दोसारअणो (२३) समुद्दणवणीअं चन्द्रः । द्योतन इति द्योतः । ज्योत्स्नायन्त्रम् । आत इः, जस्य दः, नात्प्रागत्वम् । दोषारत्नम् । समुद्र-नवनीतं मथनोत्थितत्वात् ॥ (२४) चिरिचिरिआ (२५) चिलिचिडिआ धारा । चिरिचिरीति चिलिचिलीति ध्वनिर्यस्याः सा तथोक्ता ॥ (२६) समुद्दहरं अम्बुगृहं जलधारोपचारात् ॥ (२७) तम्बकुसुमं कुरबकं कुरण्टकं च । ताम्रकुसुमं तथाविधकुसुमत्वात् ॥ (२८) मुहरोमराई भ्रूः श्मश्रूर्वा मुखरोमराजिः तथाविधस्वरूपत्वात् ॥(२९) थेवो बिन्दुः स्तोकत्वात् ॥

---

(9) HD. 3.27. (11) HD. 1.174. G नयनप्रीत्याहितत्वात्; Gp हृतत्वात् ; T °प्रत्याहतत्वात् for नयनप्रीत्यनर्हत्वात्. (12) HD. 6.142. K om. मदोली upto संचारयतीति. Before मदोली G read सहउत्थिआ सहोत्थिता दूती. G मराली for मदोली. T अमराळी व ममराळी. (13) GKT om. संचारी दूती । प्रीतिं संचारयतीति. (14) HD.8.9. (15) 6.142. (16) HD. 6.59. T प्रेक्षणं for प्रेषणं. (17) HD 1.35. अतिहारी for अत्तिहरी. (18) HD. 6.18. G प्रतिकूलः for प्रतिकूले. (19) HD. 6.18. पडिमूरो for पडिज्झरो. (20) HD. 3.40. (21) HD.5.51. (22) SK. (23) HD. 8.50. K मन्दरान्मथितत्वात् for मथनोत्थित-त्वात्. (24) HD. 3.13. (25) HD. 3.13. (26) HD. 8.21. K समुद्र-गृहं for अम्बुगृहं. After अम्बुगृहं G adds समुद्रगृहम्. (27) HD. 5.9. (28) HD. 6.136. S om. श्मश्रूर्वा.(29) HD. 5.29. S थोओ for थेवो.

(३०) धूमद्धअमहिसीओ कृत्तिकाः धूमध्वजमहिष्यः अग्निना संयुक्तत्वात् ॥ (३१) विसारो सैन्यं विसरणशीलत्वात् ॥ (३२) अवहोओ विरहः । अपभोगः भोगासहत्वात् ॥ (३३) पाओ (३४) पअलाओ फणी । प्राणिघातुकत्वात्पापः । पदानि लायति निगूहतीति पदलापः ॥ (३५) अहिअलो क्रोधः । अहिरिव वलति नाशयतीति अहिवलः ॥ (३६) सिहिणं स्तनः । शिखित्वं चूचुकवत्त्वात् । अस्त्यर्थे णः ॥ (३७) थिरण्णेसो यो न क्वचिदपि स्थितिं बध्नाति, स्थिरं यथा स्यात्तथा न तिष्ठतीति थिरण्णेसो चपलहृदयः ॥ (३८) सूरङ्गो दीपः । सूरवदङ्गं यस्यासौ ॥ (३९) जोइक्खो ज्योतिष्कः ॥ (४०) पासावओ गवाक्षः । पासो इति प्राकृते चक्षुः, तदापवत इति पासावओ ॥ (४१) पासो पश्यतीति पासो अक्षि ॥ (४२) कोप्पो अपराधः । आत्मनः कोप एवापराधः ॥ (४३) उम्मुहो उन्मुखः ॥ (४४) उद्दणो उद्वदनः । दस्य वस्य च लुक् ॥ (४५) पहट्ठो प्रधृष्टः । गर्वीत्यर्थः ॥ (४६) लम्बा केशाः । लम्बन्त इति लम्बाः ॥ (४७) वल्लीवत् वेल्ली वल्लरीवत् ॥ (४८) वेल्लरिआ आदेरत एः, स्वार्थे कश्च ॥ (४९) जण्णहरो यज्ञहरो राक्षसः । तत्स्वभावत्वात् ॥ (५०) जणउत्तो ग्रामप्रधाननरः जनपुत्रः । तद्वदाचरतीति ॥ (५१) बम्हहरं (५२) आरनालं

---

(30) HD. 5.62. S संयुक्तत्वात् for संभुक्तत्वात्. (31) HD. 7.72. (32) HD. 1.35. अवहाओ for अवहोओ. (33) HD. 6.38. G पावो for पाओ. (34) HD. 6.72. (35) HD 1.36. GK अहिअलो for अहिवलः. (36) HD. 7.31. B om. शिखित्वं. (37) HD. 5.27. G थिरणासो; Gp थिरणामो. ST थिरण्णोसो. (38) HD. 8.41. (39) HD. 3.49. (40) HD. 6.43. (41) HD. 6.75. (42) HD. 2.45. (43) HD. 1.99. (44) HD. 1.99. (45) HD 6.9. (46) HD. 7.26. G लम्बो for लम्बा. After लम्बाः G adds वल्लो. (47) HD. 7.32. (48) HD 7.32. G विल्लरिआ for वेल्लरिआ. (49) HD. 3.43. जण्णोहणो; S जण्णहलो दक्षः for यज्ञहरो राक्षसः. (50) HD. 3.52. GT ग्रामप्रधान; for °प्रधाननरः (51) HD. 6.91. (52) HD. 1.66. G आरणालं. K अम्बुजं for अम्बुजे.

(५३) थेरोसणं अम्बुजे। ब्रह्मगृहम्। आराद् दूरे समीपे च नालमस्तीति आरनालं। द्वितीयस्यातोऽत्। स्थविरासनं स्थविरो ब्रह्मा। आत ओत्॥ (५४) कलिमं कन्दोट्टं उत्पले। के लीयते इति कलिमं। डिमः। कन्दादुट्टीकते उद्गच्छतीति कन्दोट्टं। 'स्तौ' [१·२·६५] इत्योत्वम्॥ (५५) चन्दोज्जं (५६) रअणिद्धअं कुमुदम्। चन्द्रेणोद्द्योतत इति चन्दोज्जं। रजनिध्वजम्॥ (५७) घरअन्दं मुकुरम्। गृहे चन्द्रवदुद्द्योतत इति॥ (५८) आआसतलं हर्म्यपृष्ठम्। आकाशतलमिति॥ (५९) आणन्दवडो नववध्वा रक्तारुणं वस्त्रम्, प्रथमरजस्वलाया रक्ताक्तः पटः, आनन्दविषयत्वात्॥ (६०) सूरद्धओ दिवसः। सूर्यो ध्वजो यस्य सः॥ (६१) पल्लविअं लाक्षारक्तम्। सपल्लवमिव पल्लवितम्॥ (६२) अच्छिवडणं निमीलनम्। अक्षिपक्ष्मणां पतनम्॥ (६३) णीसङ्को वृषः। निःशङ्कः॥ (६४) एलविलो धनवांश्च। चकाराद् वृषश्च॥ (६५) सुहरओ दारिकागृहं चटकश्च। सुखं रतमस्यास्तीति॥ (६६) हट्ठमहट्ठो स्वस्थः। हृष्टश्चासौ महार्थश्च॥ (६७) णिम्मीसुओ युवा निःश्मश्रुकः। आदेरत ई॥ (६८) जहणारोहो ऊरुः। जघनेनारुह्यत इति॥ (६९) पल्लट्टजीहो (७०) अउज्झहरो रहस्यभेदी। पर्यस्तजिह्वः। गुह्यहरः। आदावडागमः॥ (७१) णिहुअं निधुवनं सुरतं निभृतम्॥

---

(53) HD.5.29. (54) HD. 2.9. (55) HD.3.4. (56) HD.7.4. KS मुकुरं for कुमुदम्. K adds सितोत्पलं. (57)HD. 2.107.G घरअंदअं. (58) HD. 1.72. B आआसतअं for °तलं. G आकाशतलवदाभासत इति for °तलं. (59) HD. 1.72. KM रक्तासक्तं वस्त्रं for रक्ताक्तः पटः. (60) HD. 8.42. (61) HD. 6.19. G पल्लवितमिव for सपल्लवं. (62) HD. 1. 39.G अक्षिपद्मानां for °पक्ष्मणां. (63) Sk. (64) HD. 1.148. GM add ऐलबिलवत्. (65) HD. 8.56. सुहराओ for सुहरओ. T सुमरओ for °सुहरओ. (66) HD. 8.65. (67) HD. 6.32. (68) HD. 3.44. GMT जहणरोहो; K जहणलाहो for °णारोहो. (69) HD. 6.35. (70) HD. 1.42.G अगुज्झहरो; M अउंझहरओ for अउज्झहरो. (71) HD. 4.50.

(७२) अब्बुद्दसिरी मनोरथाधिकफलप्राप्तिः। अबुद्धश्रीः। प्रमुक्तादिपाठात् [१·४·९१] द्वित्वम्॥ (७३) बहुजाणो चोरो धूर्तश्च। बहुज्ञानः॥ (७४) परेओ परेतः पिशाचः॥ (७५) उज्जल्लो बहुबलवान्। उज्ज्वलः। दैवादिपाठात् [१·४·९२] द्वित्वम्॥ (७६) जोई विद्युत् ज्योतिर्वा॥ (७७) भिङ्गं कृष्णं भृङ्गवन्नीलत्वात्। भिङ्गं संस्कृत इत्येके॥ (७८) णिअंधणं परिधानम्। निबध्यत इति निबन्धनम्॥ (७९) जहणूसुअं चल्लणकम्। जघनांशुकम्। आतो बिन्दुना सह ऊत्वम्॥ (८०) पाउरणं कवचः। प्रावरणकत्वात्। आदेरत उः (८१) ओअल्लो अपसारः कम्पश्च। अपचारे ओअल्लो। तैलादित्वात् [१·४·९३] द्वित्वम्॥ (८२) चवेडी करसंपुटाघातः॥ (८३) रइलक्खं रतिलक्ष्यं जघनम्॥ (८४) वावडो कुटुम्बी व्यापृतः॥ (८५) पुरिल्लदेवा दैत्याः पुराभवाः॥ (८६) गोसण्णो मूर्खः। गोसंज्ञः पशुप्रायत्वात्॥ (८७) परभत्तो भीरुः निष्पीडश्च। परः शत्रुस्तद्भक्तश्च॥ (८८) चच्चिक्को स्थासकः। चर्चिका। को द्वित्वं पुंस्त्वं च॥ (८९) कालं तमिस्रं नीलत्वात्॥ (९०) भट्टिओ विष्णुः। भर्तृकः जगत्पोषकत्वात्। ऋत इत्॥ (९१) इन्दग्गिधूमं तुहिनम्। इन्द्राग्निधूमः॥ (९२) पत्थरं पादताडनम्। प्रस्तरवत्पत्थरं दुःसहत्वात्॥

---

(72) HD1.42.(73) HD.(बहुणो).6.97 (74) HD. 6.12. (75) HD. 1.154. ओज्जल्लो;M उज्जलो for उज्जल्लो.(76) HD.3.49.K adds द्योतत इव; M द्योती वा. (77) HD. 4.104. MS om. भिंगं संस्कृत इत्येके. (78) HD. 4.3. (79) HD. 3.45. B जहणूसअं for °णूसुअं. (80) HD. 6.43. (81) HD. 1.165. KS कशादित्वात् for तैलादित्वात्. (82) HD. 3.3.GK करसंपुटघातः for °टाघातः. (83) HD. 7.13. (84) HD 7.54. (85)HD. 6.55. (86) HD. 2.97.S णोसण्णो for गोसण्णो. (87) HD. (परिब्भंतो).6.72. M परहत्तो for परभत्तो. KMS निषिद्धश्च for निष्पीडश्च. (88)HG 2.174. M om. चर्चिका. (89)HD. 2.26. (90) HD. 6.10. (91) HD. 1.80. (92) HD. (पत्थरा); 6.8. Gp पद्दरा; M पत्थमं for पत्थरं.

(९३) ओ वा अ ओ अस्तकालः । अपातपः ॥ (९४) पि उ च्छा (९५) मा उ आ सखी । पितृष्वसेव मातृकेव हितकारित्वात् ॥ (९६) पो र त्थो मत्सरी । पौलस्त्यवत् ॥ (९७) दो सो कोपः आत्मदोषत्वात् ॥ (९८) च च्चा चर्चा तलाहतिः ॥ (९९) प म्ह लो केसरः । पक्ष्मलवत् ॥ (१००) ख न्ध ल ट्ठी (१०१) ख न्ध म सो भुजस्कन्धस्य यष्टिः । स्कन्धं प्रमृशतीति ॥ (१०२) अ ग्गि आ ओ (१०३) त म्ब कि मी इन्द्रगोपः । अग्निवत्कायोऽस्येति अग्निकायः । ताम्रकृमिः ॥ (१०४) वि हा ड णो अनर्थः । विघाटनम् ॥ (१०५) जो इ ओ ज्योतिरिङ्गणः खद्योतः ॥ (१०६) सिं ञ्जि रो ध्वनिः । शिञ्जनमेव ॥ (१०७) जो इ सो (१०८) जो अ णा (१०९) जो डो (११०) ख ज्जो ओ खद्योते । तारका । ज्योतिषं जोइसं । द्योतना जोअणा । द्योतः जोडो । तस्य डः । खे द्योतत इति खद्योतः खज्जोओ ॥ (१११) द र व ल्ल हो कान्तः । दरो भयः तत्र वल्लभः । (११२) का अ रो कातरः वियोग-भीरुत्वात् ॥ (११३) प ण्ड र ङ्गो महेश्वरः । धवलाङ्गत्वात् ॥ (११४) भो इ ओ ग्रामेशः । भोगं चरतीति भोगिकः ॥

---

(93)KD. 1.162. G ओआअवो for ओवाअओ. G adds ओवाअळो अस्त-कालः अवपातः अतोपकारः (?) ओवायवो ओवायवा अस्तकालः अपातपः अपौकारः (?).(94) HD. 6.49.B पिउच्चा for पिउच्छा. (95) HD. 6.148. (96). HD. 6.62. पोरच्छो for पोरत्थो. (97) HD. 5.56. (98) HD. 3.19 M चंचा for चच्चा. (99) HD. 6.13. (100) HD. 2.71. G खंधअट्ठी for °लट्ठी. (101) HD. 2.71. G मृशतीति for प्रमृशतीति. (102) HD. 1.53. अग्गिओ for अग्गिआओ. (103) HD. 5.6. (104) HD. 7.71. B विहडणो for विहाडणो. (105) HD. 3.50. (106) G सिंजओ for सिंजिरो. (107) HD. 3.50. B जोइओ; K जोइसं for जोइसो. (108)HD. 3.50. (109) HD. 3.49. B जोअडो for जोडो. (110) HD. 2.69. B खज्जओ for खज्जोओ. (111). HD. 6.37. (112) HD. 2.58. कायलो; कायरो for काअरो. (113). HD. 6.23. (114) HD. 6.108.

(११५) सग्गहो मुक्तः। सुष्ठु अग्रहः स्वग्रहः ॥ (११६) संकरो रथ्या। संकीर्यते अत्रेति संकरः॥ (११७) पअरो प्रवरः अर्थपरः। अर्थे प्रकर्षेण वरः॥ (११८) मइमोहिणी सुरा। मतिमोहिनी ॥ (११९) धारावासो दर्दुरः प्रावृषेण्यत्वात्॥ (१२०) कमलं आस्यं कलहश्च। कमलवत्कमलं। कं मस्तकं मलतीति ॥ (१२१) वेणुसाओ (१२२) धुअराओ भ्रमरः। वेणुशब्द-वच्छब्दो यस्य स वेणुसाओ। संयुक्तस्य लुक्। ध्रुवरागः सदा सुस्वरत्वात्॥ इत्यादि॥ अस्मिन्गणे लिङ्गव्यत्ययः प्रयोगाधीनः॥

इति श्रीमदर्हनन्दित्रैविद्यदेवश्रुतधरश्रीपादप्रसादासादितसमस्तविद्याप्रभाव-श्रीमत्त्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ

प्रथमोध्यायस्य चतुर्थः पादः ॥

प्रथमोऽध्यायः समाप्तः ॥

---

(115) HD. 8.4. M अनुग्रहः for अग्रहः. (116) HD. 8.6. (117) M वअरो; S पइरो. B अर्थदरः; M अर्थम्. (118) HD. 6.113. (119) HD. 5.63. S दुर्धर for दर्दुरः. (120) HD. 2.54.(121) HD. 7.78. वेणुणासो for वेणुसाओ. (122) HD. 5.7. S om. सदा. Colophon: B KMS om. from °मदर्हनन्दि...to प्रभाव. KMS इति प्राकृतव्याकरणवृत्तौ प्रथमस्याध्यायस्य.

द्वितीयोऽध्यायः ॥

प्रथमः पादः ॥

मन्तमणवन्तमाआलुआलइरइल्लउल्लइन्ता मतुपः ॥ १ ॥

मतुप्प्रत्ययस्य मन्त मण वन्त मा आलु आल इर इल्ल उल्ल इन्त इत्येते दशादेशा यथाप्रयोगं भवन्ति । मन्त—सिरिमन्तो श्रीमान् । पुण्णमन्तो पुण्यवान् ॥ मण—धणमणो धनवान् ॥ वन्त—धणवन्तो धनवान् । भत्तिवन्तो भक्तिमान् ॥ मा—हणुमा हनुमान् । पडमा पटवान् ॥ आलु—णेहालू स्नेहालुः। दआलू दयालुः । ईसालू ईर्ष्यालुः ॥ आल—सद्दालो शब्दवान् । जडालो जटावान् । पडालो पटवान् । रसालो रसवान् । जोण्हालो ज्योत्स्नावान् ॥ इर—गाहिरो ग्रहवान् ॥ इल्ल—सोहिल्लो शोभावान् । छाइल्लो छायावान् । धामिल्लो धामवान् ॥ उल्ल—विआरुल्लो विकारवान् । मंसुल्लो मांसवान् । दप्पुल्लो दर्पवान् ॥ इन्त—कहइन्तो कथावान् । माणइन्तो मानवान् ॥ मतुप इति किम् । धणी । अत्थी ॥ १ ॥

वतुपो डित्तिअमेतल्लुक् चैतत्तद्यदः ॥ २ ॥

एतद् यद् तद् इत्येतेभ्यः परस्य परिमाणार्थस्य वतुप्प्रत्ययस्य डित् इत्तिअ इत्यादेशो भवति एतदो लुक् च ॥ एतावत् एत्तिअं । यावत् जित्तिअं । तावत् तित्तिअं ॥ २ ॥

N. B.- G is not available from this chapter to the end.

1. MS °उन्ता for °इन्ता in the Sūtra and Com. KMST आदेशा for दशादेशा. After धणमणो K adds दुग्गमणो. M विहिमणो for धणमणो. After धणवन्तो KS add सुहवन्तो हत्थिवन्तो. M धणुमा for हणुमा. KMS om. पडमा पटवान्. After आलु KT add मआलू. M सिणेहालू for णेहालू. M om. पडालो पटवान्. KS ईसालो; T रसालू for रसालो. After गाहिरो KM add गव्विरो मोहिरो; S adds मोहिरो. KS छाहिल्लो for छाइल्लो. BT₁ जामिल्लो; KS आमइल्लो; M आइल्लो; T₂ जेमिल्लो for धामिल्लो M पिआउल्लो महुल्लो for विआरुल्लो मंसुल्लो. M उन्त-पउन्तो माणउन्तो for कहइन्तो माणइन्तो. S om. माणइन्तो. S हत्थी for अत्थी. 2. M मतुपो for वतुपो. Bp डित्तिअमिदमेत° for डित्तिअमेत° in the Sūtra. BMST चैतद्यत्तदः for चैतत्तद्यदः in the Sūtra. M एतेभ्यः for इत्येतेभ्यः. M वा भवति for भवति. S om. from यावत् down to यस्य in Sūtra 4.

किमिदमश्च डेत्तिअडित्तिलएद्दहम् ॥ ३ ॥

किमिदंभ्यां चादेतत्तद्यद्भ्यश्च परस्य वतुप्प्रत्ययस्य डानुबन्धा एत्तिअ इत्तिल एद्दह इत्येते आदेशा भवन्ति । एतावत् एत्तिअं इत्तिलं एद्दहं । यावत् जेत्तिअं जित्तिलं जेद्दहं । तावत् तेत्तिअं तित्तिलं तेद्दहं । कियत् केत्तिअं कित्तिलं केद्दहं । इयत् एत्तिअं इत्तिलं एद्दहं ॥ ३ ॥

इकः पथो णस्य ॥ ४ ॥

'पथो ण नित्यम्' इति यः पथिन्शब्दात् णप्रत्ययो विहितः, तस्य इक इत्यादेशो भवति । पान्थः पहिओ ॥ ४ ॥

खस्य सर्वाङ्गात् ॥ ५ ॥

सर्वाङ्गाद्व्यापिन्यर्थे विहितस्य खप्रत्ययस्य इको भवति । सर्वाङ्गीणः सव्वङ्गिओ ॥ ५ ॥

छस्यात्मनो णअः ॥ ६ ॥

आत्मनः परस्य छप्रत्ययस्य णअ इत्यादेशो भवति । आत्मीयम् अप्पणअं ॥ ६ ॥

हित्थहास्त्रलः ॥ ७ ॥

सप्तम्यन्तात्सर्वनाम्नो विहितस्य त्रल्प्रत्ययस्य हि त्थ ह इति त्रय आदेशा भवन्ति । यत्र जहिं जत्थ जह । तत्र तहिं तत्थ तह । कुत्र कहिं कत्थ कह । अन्यत्र अण्णहिं अण्णत्थ अण्णह ॥ ७ ॥

---

3. K °डेद्दहम् for एद्दहम् in the Sūtra; M °एद्दहाः in the Sūtra. K इत्यादेशाः for इत्येते आदेशाः. After आदेशा T adds डितो. After भवन्ति K adds एतल्लुक् च । अनुबन्धादन्त्यस्वरादेर्लुक्; M adds लुक् च । डानुबन्धादन्त्यस्य स्वरादेर्लुक्. B om. form °कियत् down to एद्दहं. M om. इयत् एत्तिअं एद्दहं. K कियत् केत्तिलं कित्तिअं केद्दहं for कियत्...केद्दहं. 4. K पथो णः पन्थश्चेति यः; MT पथश्चेति यः for पथो ण नित्यम् इति यः. S पथिन्शब्दस्य; MT पथो णप्रत्ययो for पथिन्शब्दात् णप्रत्ययो. 5. M सर्वव्यापिन्यर्थे for सर्वाङ्गाद् व्यापिन्यर्थे. T अप्पणीअं for अप्पणअं. 7. K सप्तम्यन्तान्नाम्नो for सप्तम्यन्तात्सर्वनाम्नो.

केर इदमर्थे ॥ ८ ॥

इदमर्थे विहितस्य छप्रत्ययस्य केर इत्यादेशो भवति। युष्मदीयः तुम्हकेरो। अस्मदीयः अम्हकेरो॥ क्वचिन्न भवति। मदीयपक्षः मइज्जपक्खो। पाणिनीयम् पाणिणीअं ॥ ८ ॥

राजपराड्डिक्कडक्कौ ॥ ९ ॥

राजन् पर इत्येताभ्यां परस्य इदमर्थे विहितस्य प्रत्ययस्य डितौ इक्क अक्क इत्येतौ भवतः। चकारात्केरश्च। राजकीयं राइक्कं राअक्कं राअकेरं। परकीयं परिक्कं परक्कं परकेरं॥ ९ ॥

डेच्चओ युष्मदस्मदोऽणः ॥ १० ॥

युष्मदस्मद्भ्यां परस्य इदमर्थस्याण्प्रत्ययस्य डित् एच्चअ इत्यादेशो भवति। यौष्माकम् तुम्हेच्चअं। आस्माकम् अम्हेच्चअं ॥ १० ॥

वर्वतेः ॥ ११ ॥

उपमानार्थे विहितस्य वतिप्रत्ययस्य वर् इत्यादेशो भवति। रित्त्वाद् द्वित्वम्। महुर व्व पाडलिउत्ते पासाआ, मथुरावत्पाटलिपुत्रे प्रासादाः ॥११॥

तैलस्यानङ्कोलाड्डेल्लः ॥ १२ ॥

अङ्कोलवर्जिताच्छब्दात्परस्य तैलस्य डित् एल्ल इत्यादेशो भवति। सुरहिजलेण कडेल्लं, सुरभिजलेन कटुतैलम्॥ अनङ्कोलादिति किम्। अङ्कोलतेल्लं ॥ १२ ॥

त्वस्य तु डिमात्तणौ ॥ १३ ॥

भावार्थे विहितस्य त्वप्रत्ययस्य डित् इमा त्तण इत्यादेशौ तु भवतः। पीनत्वं पीणिमा पीणत्तणं। पुष्पत्वं पुप्फिमा पुप्फत्तणं॥ पक्षे पीणत्तं पुप्फत्तं॥ त्वस्येति किम्। पीणआ पीणदा पीनता॥ १३ ॥

---

8. S om. क्वचिन्न भवति. M मईअपक्खो for मइज्जपक्खो. 9. MS °क्कं च; T डिक्कडक्कौ च for °डक्कौ in the Sūtra. KMS इत्यादेशौ क्रमेण भवतः for इत्येतौ भवतः. KMS पारिक्कं पारक्कं पारकेरं for परिक्कं...परकेरं. 10. Bp एच्चओ for डेच्चओ in the Sūtra. 11. BpT वर्तवं; MS वंवते for the Sūtra. B वरा; S वं for वर् in Com. 12. S om. कडेल्लं; T सुरहेल्लं कडुएल्लं for कडेल्लं. 13. M भावार्थस्य for भावार्थे विहितस्य. K पुप्फमा for पुप्फिमा. S om. from पीनत्वं down to सव्वदो under the next Sūtra. M om. पीणदा.

दो त्तो तसः ॥ १४ ॥

त्वित्यनुवर्तते । पञ्चम्यन्तात्सर्वनाम्नः परस्य तसिल्प्रत्ययस्य दो त्तो इत्येतौ तु भवतः । सव्वदो सव्वत्तो । एअदो एअत्तो । अण्णदो अण्णत्तो । कदो कत्तो । तदो तत्तो । जदो जत्तो । इदो इत्तो ॥ पक्षे सव्वओ इत्यादि ॥ १४ ॥

एकाद्दः सिसिआइआ ॥ १५ ॥

एकशब्दात्परस्य दाप्रत्ययस्य सि सिआ इआ इति त्रय आदेशा भवन्ति तु । एकदा एक्कसि एक्कसिआ एक्कइआ एकआ ॥ १५ ॥

ल्हुत्तः कृत्वसुचः ॥ १६ ॥

'वारे कृत्वसुच्' इति विहितस्य कृत्वसुच्प्रत्ययस्य हुत्त इत्यादेशो भवति । लित्त्वान्नित्यम् । सअहुत्तो । सहासहुत्तो । चुम्बिज्जइ सअहुत्तो । उवगूहिज्जइ सहासहुत्तो । रमिआ वि पुणो रमिज्जइ णवत्तणं णत्थि पुणरुत्तं । पिअहुत्तं इति तु अभिमुखार्थेन हुत्तशब्देन भविष्यति ॥ १६ ॥

भवे डिल्लोल्लडौ ॥ १७ ॥

भवार्थे नाम्नः परौ इल्ल उल्ल इत्येतौ डितौ भवतः । इल्ल—मातुलानी मामी तत्र भवा मामिल्लिआ । पुरो भवं पुरिल्लं । अधो भवं हेट्ठिल्लं । उपरि भवं उवरिल्लं ॥ उल्ल—आत्मभवं अप्पुल्लं । अल्लाल्लावपीच्छन्त्यन्ये ॥ १७ ॥

---

14. K नाम्नः for सर्वनाम्नः. M तस्प्रत्ययस्य; K तसिप्रत्ययस्य for तसिल्प्रत्ययस्य. K M इत्यादेशौ for इत्येतौ. M एगओ for सव्वओ. 15. M om. तु 16. M ल्हुत्वं कृत्वसः; S लुत्वं कृत्वसः; T लहुकृत्वसः; for the Sūtra. KMST वारे कृत्वस् for वारे कृत्वसुच्. KMS प्रत्ययस्य कृत्वसः for कृत्वसुच्प्रत्ययस्य. KS लित्त्वाच्च विकल्पः for लित्त्वान्नित्यम्. B उपगूहिज्जइ for उव° K S सहस्सहुत्तो for सहास°. T सअभुत्तं सहस्सभुत्तं. B रमज्जइ for रमिज्जइ. M S om. from सहासहुत्तो down to णत्थि. 17. M डिल्लोल्लड्; T डिल्लोल्लडः for °ल्लडौ in the Sūtra. M इत्यादेशौ for इत्येतौ.

स्वार्थे तु कश्च ॥ १८ ॥

स्वार्थे नाम्नः परं कप्रत्ययो भवति तु । चकारात् डिल्लोल्लडौ च । चन्द्रः चन्दओ । हृदयं हिअअअं । इह इहअं । आश्लिष्टं आलिद्धअं ॥ द्विरपि भवति । बहुअअं ॥ ककारोच्चारणं पैशाचीभाषार्थम् । वदनं वतनकं । डि ल्ल—णिज्जिआसोअपल्लविल्लेण, निर्जिताशोकपल्लवेन । पुरिल्लो पुरा पुरो वा ॥ उ ल्ल ड्— पिउल्लो प्रियः । मुहुल्लं मुखम् । हत्थुल्लो हस्तः ॥ पक्षे चन्दो इत्यादि ॥ कुत्सादिविशिष्टे तु संस्कृतवदेव कः सिद्धः ॥ १८ ॥

उपरेः संव्याने ल्लः ॥ १९ ॥

स्वार्थ इत्यनुवर्तते । संव्यानार्थे उपरिशब्दात् द्विरुक्तो लो भवति । लित्त्वान्नित्यम् । उवरिल्लो ॥ संव्यान इति किम् । उवरिं ॥ १९ ॥

नवैकाद्वा ॥२०॥

नव एक इत्येताभ्यां परं स्वार्थे द्विरुक्तो लो वा भवति । णवल्लो णवो । एक्कल्लो एक्को ॥ २० ॥

मिश्राल्लिअः ॥ २१ ॥

मिश्रशब्दात्स्वार्थे लिअ इत्यादेशो वा भवति । शित्त्वात्पूर्वस्य दीर्घः । मीसालिअं मिस्सं ॥ २१ ॥

शनैसो ल्डिअं ॥ २२ ॥

शनैः शब्दात्स्वार्थे लित् डिच्च इअं इत्यादेशो भवति । सणिअं ॥२२॥

मनाको डअं च वा ॥ २३ ॥

मनाक्शब्दात्स्वार्थे डित् अअं इअं च प्रत्ययौ वा भवतः । मणअं मणिअं । पक्षे मणा ॥ २३ ॥

---

18. M चार्थे for स्वार्थे in the Sūtra and Com. K om. परं; MT परः. M om. तु. B द्वित्वेऽपि; T द्विरपि for द्विरपि भवति. MST पैशाचिकभाषार्थम् for पैशाचीभाषार्थम्. KST वदनकं for वतनकं. K चन्द्रो for चन्दो. 19. Before द्विरुक्तो S reads स्वार्थे. S om. लित्त्वान्नित्यम्; M लित्त्वान्न विकल्पः. M अवरिल्लो for उवरिल्लो. M अवरि for उवरिं. 20. M इत्याभ्यां for इत्येताभ्यां. 21. T लिअट् for लिअः in the Sūtra. M मीसं for मिस्सं.

रो दीर्घात् ॥२४॥

वेत्यनुवर्तते । दीर्घशब्दात्स्वार्थे रो वा भवति । दीहरं दीहं दिग्घं ॥ ॥ २४ ॥

डुमअडमऔल् भ्रुवः ॥२५॥

भ्रूशब्दात्स्वार्थे उमअ अमअ इत्येतौ डितौ लितौ भवतः । लित्वान्नित्यम् । भुमआ भमआ ॥ २५ ॥

लो वा विद्युत्पत्रपीतान्धात् ॥ २६ ॥

एभ्यः परं स्वार्थे लो वा भवति । विज्जुला विज्जू । पत्तलं पत्तं । पीअलं पीअं । अन्धलो अन्धो ॥ २६ ॥

त्वादेः सः ॥ २७ ॥

'तस्य भावस्त्वतलौ' इत्यादिना विहितत्वादेः परं स्वार्थे स एव त्वादिर्वा भवति । मृदुत्वेन मउत्तआइ । मृदुतया मउत्तआए । ज्येष्ठतरः जेट्ठअरो । कनिष्ठतरः कणिट्ठअरो ॥ २७ ॥

इरः शीलाद्यर्थस्य ॥ २८ ॥

शीलधर्मसाध्वर्थेषु विहितस्य प्रत्ययस्य स्थाने इर इत्यादेशो भवति । हसनशीलः हसिरो । रोदनशीलः रोइरो । लज्जाशीलः लज्जिरो । जल्पशीलः जप्पिरो । वेदनशीलः वेइरो । उच्छ्वसनशीलः ऊससिरो ॥ केचिदिरं तृन एवाहुः । तेषां नमिरकमिरादयो न सिध्यन्ति । तृनोत्तरादिना बाधितत्वात् ॥ ॥ २८ ॥

---

24. KMS om. दीहं. 25. KM om. लितौ. KMS लित्वाद्विकल्पः for लित्वान्नित्यम्. KS भ्रमआ; M भुमअं; T हुमआ for भुमआ. 26. MT om. परं. KT विज्जुल्ला for विज्जुला. 27. MT भावे त्वतलादिना for तस्य भावस्त्वतलौ इत्यादिना. M परः for परं. After मउत्तआए M adds त्वादेरिति किम्. 28. MS °साध्वर्थे; T शीलधर्मस्वार्थं for °साध्यवर्थेषु. T भसिरो for हसिरो. KS जंपिरो for जप्पिरो. BT ऊसिरो; S उस्ससिरो for ऊससिरो. M केचिदिह आल एवाहुः for केचिदिरं तृन एवाहुः. M तेषां मते for तेषां.

तुमत्तुआणतूणाः क्त्वः ॥ २९ ॥

क्त्वाप्रत्ययस्य तुं अत् आण तूण इति चत्वार आदेशा भवन्ति। तुं—दट्ठुं। मोत्तुं। भोत्तुं॥ अत्—भमिअ। रमिअ॥ तुआण—घेत्तुआण। साउआण॥ 'क्त्वासुपोस्तु सुणात्' [१·१·४३] इत्यनुस्वारे कृते। घेत्तुआणं। सोउआणं॥ तूण—घेत्तूण। सोऊण। काऊण॥ अनुस्वारे। घेत्तूणं। सोऊणं। काऊणं॥ वन्दित्ता इति तु सिद्धावस्थायां वलोपे॥२९॥

वरइत्तगास्तृनाद्यैः ॥ ३० ॥

वरइत्त इत्यादयः तृनादिप्रत्ययैः सहिताः स्वराद्यादेशविशेषिता बहुलं निपात्यन्ते॥ (१) वरइत्तो वरयितृकः नूतनवरः। ऋतोऽत्, तो द्वित्वं च॥ (२) कणइल्लो (३) वाअडो शुकः। कणइल्लो। कणई लतावाची देश्यः, ततो भवार्थेऽस्त्यर्थे वा डिल्लः। वाअडो। वाचाटे द्वितीयस्यातोऽत्॥ (४) मइलपुत्ती पुष्पवती। मलिनशब्दस्य मइलादेशः, तस्मात् पुत्ती॥ (५) दुग्घोट्टो दोग्घोट्टो (६) दूणो द्विपः। पिबतेर्घोट्टः। द्वाभ्यां पिबतीति। द्विपाने पकारेण सह इत उत्। दूणो॥ (७) विरिचरो धाराविरेचनशीलः॥ (८) सूरल्ली मध्याह्नः। सूरादस्त्यर्थे ल्लिः॥ (९) वेल्लहलो कोमलो विलासी च। वल्लभात् लः, आदेरत एच॥ (१०) सद्दालं नूपुरम्। शब्दादालोऽस्त्यर्थे॥ (११) अल्लिल्लो (१२) फुल्लंधओ

---

29. M om. तूण–घेत्तूण। सोऊण। काऊण॥ अनुस्वारे. T णिहित्ता नन्दित्ता इति for वन्दित्ता इति. 30. T om. बहुलं. S om. from इत्यादयः down to डिल्लः. (1) HD. 7.44. K नूत्नवरः नवो वरः for नूतनवरः. (2) HD. 2.21. ( ) Sk वाचाटः. (4) From मलिन and पोत्त=वस्त्र K मलिनादेशात् मइलात् पुत्ती. (5) HD. 5.44. M ST om. दोग्घोट्टो. (6) HD 5.44 (7) HD. (विरिविरो) 7.93. MT विरिचिरो for °चरो. (8) HD. 8.57. T_2 सुरल्ली for सूरल्ली. (9) HD. 7.96. (10) HD. 8.10. (11) HD. (अल्लल्लो) 1.13. (12) HD (फुल्लंधुओ) 6.85. S पुल्लंदओ; T पुल्लद्दओ for फुल्लंधओ.

(१३) रसाओ भ्रमरः। एषां क्रमात् अलेः स्वार्थे डिल्लः,लो द्वित्वं च। पुष्पंधयः पस्य लः। रसमत्तीति रसाओ॥ (१४) लअणी लअणा (१५) कणई लतायाम्। लतायाः स्वार्थे डणी डणा च। कनतेर्धातोः स्त्रियां डई। शोभावहत्वात्॥(१६) वहुज्जा कनीयसी श्वश्रूः। वध्वा उक्तेऽर्थे ज्जा। (१७) भाउज्जा भ्रातृवधूः। भ्रातुर्जायार्थे ज्जा॥ (१८) मेहुणिआ मातुलात्मजा स्याली च। मैथुनिका। मिथुनादुक्तेऽर्थे इकण् डाच॥ (१९) रिमिणो रोदनशीलः। रुदेः शीले डिमिणः॥ (२०) पुण्णाली (२१) छिच्छई (२२) अडअणा असती। पुंश्चल्यां श्वस्य णा। धिक् धिक् छिच्छि। धिग्धिगिति गर्हणा यस्याः सा। अस्त्यर्थे डई। अटेः शीले अणा। अड-अणा अटनशीला। (२३) चप्पलओ मिथ्याबहुभाषी। चपलात्कः, पस्य च द्विरुक्तः पः॥ (२४) पिव्वं जलम्। पिबतेर्द्विर्बः॥ (२५) मघोणो मघवा। स्वार्थे णः, अवा इत्यस्य ओकारः॥ (२६) सइलासिओ मयूरः। सदालासिकः नृत्यशीलत्वात्। 'इत्तु सदादौ' [१-२-३४] इत्यनेन सइ॥ (२७) वाउल्लो प्रलपिता। वाचो डुल्लः॥ (२८) पलहिअओ मूर्खः। उपलहृदयः। उकारस्य लोपः॥ (२९) चण्डिक्को कोपः। चण्डात् कोपे डिक्कः॥ (३०) चण्डिज्जो पिशुनः कोपश्च। चण्डादुक्तेऽर्थे डिज्जः॥ (३१) कुम्मणो म्लानः। म्लायतेः कुम्मादेशे णः॥ (३२) अच्छिहरुल्लो द्वेष्यः। अक्ष्णोर्हरः, अदर्शनीयत्वात। अक्षिहरात्स्वार्थे डुल्लः॥

---

(13) HD. (रसाऊ) 7.2. (14) HD. 7.27. K लअणं for लअणी. (15) HD. 2.5. (16) HD. (वहुव्वा?) 7.40. KMST वहुव्वा for °ज्जा. (17) HD. 6.103. M बाहुज्जा for भाउज्जा. (18) HD. 6.148. (19) HD. 7.7. (20) HD. 6.53. (21) Sk धिक् धिक्. (22) HD. 1.18. K om. अटनशीला. (23) HD. 3.20. M चच्चइओ; T छप्फलओ for चप्पलओ. M चंचलात्कः for चपलात्कः. (24) HD. 6.46. (25) Sk मघवन्. (26) HD. 8.20. (27) HD.7.56. (28) Sk उपलहृदयः. M पलाहिओ अपहृतहृदयः. (29) HD. 3.2. (30) HD. 3.20 K चंडिज्जो पिशुनश्च। चकारात्कोपश्च. (31) HD. 2.40. T कुम्हणो for कुम्मणो. (32) HD. 1.41.

(३३) छाइल्लो रूपवान्। छायाया डिल्लोऽस्त्यर्थे। कान्तिमानित्यर्थः॥ (३४) कुडुंगो कुंगो कुडुक्को लतागृहम्। कुडादुक्तेऽर्थे डुङ्गः डङ्गः डुकश्च॥ (३५) जरण्डो वृद्धः। जरतेरण्डः॥ (३६) अच्छिविअच्छी परस्परा-कृष्टिः। आकर्षति व्याकर्षतीत्यत्र कृषेः स्थाने विअच्छी॥ (३७) धूमरी तुहिनम्। धूमवत् धूमरी। उपमानार्थे री॥ (३८) सोत्ती तरङ्गिणी। स्रोतसोऽस्त्यर्थे डी। तस्य द्वित्वम्॥ (३९) अहिसिओ ग्रह-शङ्कया रुदितः। अभिसीदतेः उक्तेऽर्थे डिकः॥ (४०) गावी गौः। गोः स्त्रियां डावी॥ (४१) उत्थल्लपत्थल्ला पार्श्वयुगापवृत्तिः। उत्स्थलप्रस्थला-त्पार्श्वद्वयापवृत्त्यर्थे डा, लो द्वित्वं च॥ (४२) गज्जिलिओ स्पृष्टेऽङ्गे हासः पुलकश्च। अङ्गे स्पृष्टे यो हासो जायते तस्मिन् पुलकार्थे च गर्जतेरिलिअः॥ (४३) चित्तलं रम्यम्। चित्तं लातीति॥ (४४) पाडहुओ प्रतिभूः। प्रतिभुवः स्वार्थे डुकण्, इतोऽत्वं च॥ (४५) पासणिओ पासाणिओ साक्षी। साक्षात्पार्श्वे नीयतेऽनेनेति पार्श्वान्नीयतेर्डिकः॥ (४६) अवरिज्जं अद्वितीयम्। अवरात् भावार्थे डिज्जः॥ (४७) लाहिल्लो लम्पटः। लाभा-दुक्तेऽर्थे डिल्लः॥ (४८) कडिल्लं गहनं, दौवारिकः, कटिवस्त्रम्, निर्विव-रम्, विपक्षः, आशीश्च। कटिशब्दाद् गहनादिष्वर्थेषु डिल्लः॥

---

(33) HD. 3.35. (34) HD. 2.31. M S om. कुडुंगो down to डुकश्च. (35) HD. 3.40. (36) HD. 1.41. K कृषेः स्थाने अच्छिविअच्छी. (37) HD. 5.61. K उपमार्थे for उपमानार्थे. (38) HD. 8.44. (39) HD. 1.30. (40) Sk गो. (41) HD. 1.122. M पार्श्वान्नीयते आनीयते चेत्यर्थे for पार्श्वद्वयापवृत्त्यर्थे. (42) HD. (गंजोल्लिअ) 2.100. S गंजिलिओ; T गज्जलीओ for गज्जिलिओ. (43) HD. 3.4. (44) HD. (पाडुहुओ). 6.42. KS पाडंहुओ; T पालभुओ for पाडहुओ. T प्रतिभूमिः for प्रतिभूः. (45) HD. 6.41. T पाडणीओ for पासणिओ. S साक्षात्कश्चिन्नीयते for साक्षात्पार्श्वे नीयते. (46) HD. 1.36. T_1 अवरंजं; T_2 अवरज्जं. T अवरादभावार्थे सिज्जं for अवरात् भावार्थे डिज्जः. (47) Sk लाभ. (48) HD. 2.52. T_1 कडिल्ली; T_2 कडिल्लः. S वाहनं for गहनं.

(४९) रू व सि णी रूपवती । रूपादस्त्यर्थे स्त्रियां सिणी ॥(५०) कु डु ग्वि अं सुरतम् । कुटुम्बादुक्तेऽर्थे डिकः ॥ (५१) अ न्त रि ज्जं रशना कटिसूत्रम् । अन्तरादुक्तेऽर्थे डिज्जः ॥ (५२) अ व डु क्कि अं निपतितं कूपाद्यवटेषु । अवटादुक्तेऽर्थे डुक्किअः ॥ (५३) बु ड्डि रो महिषः । मज्जतेरादेशात् बुड्डात् इरः शीलार्थे ॥ (५४) पि प्पि डि अं यत्किंचित्पठितम् । पिडिपिडीत्यनुकरणात्कः, आदेर्डिकारस्य लुक्, पो द्वित्वं च ॥ (५५) स रि सा हु लो सदृशः । सदृशात्स्वार्थे डुलश् ॥ (५६) गु मि लो मूढः । मुहेरादेशाद्गुमेरिलः॥ (५७) क च्चं कार्यम् । कृञो डच्चः ॥ (५८) घ डि अ घ डा घ डी गोष्ठी । घटिता घटा घटना यस्याः सा ॥ (५९) क म णी निश्रेणी ॥ (६०) कि रि कि रि आ कर्णोपकर्णिका कुतुकं च । कर्णोपकर्णं कर्णपरंपराप्राप्तं कटुजल्पनं तस्मिन्नर्थे कौतुके च किरिकिरीत्यनुकरणात्का ॥ (६१) अ ण्ण इ ओ सर्वत्रार्थे तृप्तः । अर्णवादुपमानार्थे डिकः ॥ (६२) सा हु ली शाखा । स्वार्थे डुलिः ॥ (६३) जं पे क्खि र म ग्गि र ओ यद् दृष्टं याचते । यद् दृष्टमित्यर्थे जंपेक्खिरमिति निपातितात्परो याचनशीले मग्गिरओ कप्रत्ययान्तः ॥ (६४) ग अ सा उ ल्लो विरक्तः । गतस्वादनुरक्तेऽर्थे डुल्लः ॥

---

(49) HD. 7.9. (50) HD. (कुडुच्चिअं) 2.41. (51) HD. 1.35. B दशनाः for रशना. (52) HD. (अवडक्किओ) 1.47. T अवड्ढक्किअं for अवडु°. (53) T पुंसिरो for बुड्डिरो. From बुड्=मज्ज. KST शीले for शीलार्थे. (54) HD. 6.50. KT पिटिपिटी°; M पिडिपिटी° S पटिपटी° for पिडिपिडी°. (55) HD. 8.9. T सारीसाभुलो for सरिसाहुलो. (56) HD. 2.102. T गुम्मिळो for गुमिलो. T मुहादेशात् for मुहेरादेशात्. (57) HD. 2.2. (58) HD. 2.105. T घसिआ घसा for घडिअघडा. (59) HD. 2.8. (60) HD. (किरिइरिआ) 2.61. KM S om. कर्णोपकर्णं. MT कर्णपरंपरया प्रयुक्त प्रकटजल्पनं for कर्ण...कटुजल्पनम्. (61) HD. 1.19. Sk अक्षचितः. (62) HD. 8.52. (63) HD. 3.44. M यद्यद्दृष्टं तत्तद्याचते for यद्दृष्टं याचते; T यावद् द्रष्टव्यं प्रेक्षितमित्यर्थे for यद्दृष्टमित्यर्थे. (64) HD. (गयसाउल्लो) 2.87. M S om. from विरक्तः down to सिढिलहिल्लो. K गतेः स्वादादुक्तेऽर्थे; T हतस्वादुक्तेऽर्थे for गतस्वादनुरक्तेऽर्थे.

(६५) सिहण्डहिल्लो बालः। शिखण्डादुक्तेऽर्थे हिल्लः। शिखावानित्यर्थः॥ (६६) अलवलत्रसहो धूर्तो दुष्टः पृष्ठवाही बलीवर्दः। अलमत्यर्थं बलमस्य वृषभस्येति। बिन्दोर्लुक्॥ (६७) खुरहखुडी प्रणयकोपः। क्षुरवद्भाति तोदयतीति तुदेरादेशात् खुडात् डी॥ (६८) सीउल्ली सीउग्गं हिमकाले दुर्दिनम्। शीतात् डुल्लिडुग्गौ, तस्य लोपः॥ (६९) वरण्डो वरणः प्राकारः। वृञो रण्डः॥ (७०) तत्ती तत्परता। तात्परस्य तात्पर्ये डत्ती॥ (७१) हीरणा त्रपा। त्रपार्थे णा हीरादेशश्च॥ (७२) गामरेडो योऽन्तर्भुक्त्वा ग्रामं भुङ्क्ते। ग्रामादुक्तेऽर्थे रेडः॥ (७३) लडहा (७४) वेल्लरी विलासवती। लसतेर्डहा सलोपश्च। वेष्टयन्ते विटा अनयेति वेष्टेः परो री, ष्टो लश्च॥ (७५) दुम्मइणी कलहपरा। दुर्मतेः स्वार्थे स्त्रियां णी॥ (७६) लज्जालुइणी लज्जावती। लज्जालोः स्वार्थे णी॥ (७७) तण्णाअं आर्द्रम्। तिम्यतेर्डण्णाअं॥ (७८) चिक्खअणो असहनः। नञ्पूर्वात्सहतेर्यणः, चिक्खादेशश्च॥ (७९) वेणिअं वचनीयम्। वचेरुक्तेऽर्थे डेणिअः॥ (८०) सुण्हसिओ निद्रालुः। स्वप्नात् शीले सियः, प्नस्य च ण्हः, आदेरत उः। यद्वा साक्षा संस्कृते निद्रा। 'स्तावकसास्ने' [१·२·१८] इत्युत्वे सति ततः शीलार्थे डसिअः॥

---

(65) HD. (सिहंडइल्लो). 8.54. T सिहसहिल्लो. (66) HD. (अलमल) 1.25. M दुर्दान्तः for धूर्तः; T om. धूर्तः. B पृष्ठवाची for °वाही. T बन्धं for बलं. (67) HD. (खुरडुक्खुडी) 2.76. T_1 खररखुसी; T_2 खरखुडी for खुरहखुडी. (68) Sk शीत. T_1 सीअलं; T_2 सीदइं for सीउग्गं.(69) HD. 7.86. T_1 वरीडो; T_2 वरीसो for वराडो. (70) HD. 5.20. T_2 तत्तं. (71) HD. 8.67. T सीरणा for हीरणा. M ह्रियः स्वार्थे णा for त्रपार्थे णा. (72) HD. (गामरोडो) 2.90. BT ग्रामे for ग्रामं. (73) HD.7.17. T_1 रिसमा; T_2 रउमा for लडहा.(74)HD. 7.76. (75) HD. 5.47. M दुम्मलणी for दुम्मइणी. (76) Sk. B लज्जालुणी for लज्जालुइणी. (77) HD. (तण्णायं). 5.2. (78) ? (79) HD. 7.75. (80) HD. 8.39. T_2 सुम्भडिओ. M om. from यद्वा साक्षा down to डसिअः.

(८१) वप्पिओ केदारः। उप्यन्तेऽत्रेति वपेः पिअः॥ (८२) बन्धोल्लो मेलकः। बन्धेर्डोल्लः॥ (८३) वारिज्जो विवाहः। वृञ इज्जण्। 'अचो ञ्णिति' इति वृद्धिः॥ (८४) साउल्लो (८५) हडहडं अनुरागः। स्वादेरुक्तेऽर्थे ल्लः। हडत् हडदिति हृदयं स्फुरति यत्रेति। तस्य लुक्॥ (८६) माणंसी मायावी मनस्वी च॥ (८७) कोडिल्लो कोडिओ पिशुनः। कुडेर्धातोरिल्लइकौ, उत ओच्च॥ (८८) अइण्णो आर्तज्ञः। आर्तं जानातीति॥ (८९) गञ्जोल्लो। गञ्जतेः परिभवार्थे देश्याद्धातोर्डोल्लः॥ (९०) वन्दिणो बन्दी। स्वार्थे णः॥ (९१) तत्तिल्लो तच्छीलः। तत्ती तत्परता, ततोऽस्त्यर्थे लः, लो द्वित्वम्॥ (९२) ऊसुम्भिअं रुद्धगलरोदनम्। उत्पूर्वस्य सुम्भतेरुक्तेऽर्थे डिकः॥ (९३) णिउक्को तूष्णीकः मूकः। निर्मुक्तः। मस्य लुक्, दैवादिपाठाद् द्वित्वं च॥ (९४) बंहलो अपस्मारः। ब्रह्मण उक्तेऽर्थे लः॥ (९५) ठाणिज्जं गौरवम्। स्थानादुक्तेऽर्थे डिज्जः॥ (९६) उवउज्जो उपकारी। उपकृञो डुज्जः॥ (९७) एक्कलो प्रबलः। एकादुक्तेऽर्थे लः॥ (९८) माउसिआ माउच्छा मातृष्वसा। मातुः परस्य स्वसुः सिआच्छौ॥ (९९) महल्लो मुखरः। महतो डल्लः॥ (१००) कुच्छिमई गर्भवती। कुक्षेरस्त्यर्थे मई॥ (१०१) रिञ्छोली ऋक्षालिः नक्षत्रमाला, तद्वत् रिञ्छोली। ऋनो बिन्दुः॥

---

(81) HD. (वप्पिणो) 7.85. (82) HD. 6.89. (83) HD. 7.55. BS इज्जाणा for इज्जण्. (84) HD. 7.55. (85) HD. 8.74. M भगत्; T भटत् for हडत्. T₁ स्फुटति for स्फुरति (86) HD. 6.147. T माणंसिणी माणंसी. (87) HD. 2.40. T कटेर्धतोः for कुडेर्धातोः. (88) Sk आर्तज्ञ. T आवण्णो आपन्नः. (89) HD. (गजिल्लो) 2.83. T गंजालो गुंजालो for गञ्जोलो. (90) Sk. T विंदिण्णो विंदी. (91) HD. 5.3. (92) HD. 1.142. (93) HD. 4.51. (94) ? S बह्मलो; T वह्मलो for बंहलो. (95) HD. 4.5 M ठाणेज्जं; T ठाणेज्जा for ठाणिज्जं. (96) HD. 1.108 KS उपपूर्वात्कृञो for उपकृञो. (97) Sk. (98) HD. (माअलिआ) 6.131. T माउच्चा for °च्छा. T सिआच्ची for सिआच्छौ. (99) HD. 6.143. M महुल्लो for महल्लो. (100) HD. 2.41. (101) HD. 7.7. T रिञ्चोळी for रिञ्छोली.

(१०२) धोरणी पंक्तिः। धारावत् धोरणी। आत ओ, उपमार्थे ऽणी च ॥ (१०३) पडमा दूष्यपटम्। पटादस्त्यर्थे मा॥ (१०४) जुअणो युवा। स्वार्थे णः॥ (१०५) करमरी हठहृता स्त्री बन्दी। करेण मृद्यमानादाकृष्यत इत्यर्थे करोपपदाद् मृद्गातेर्डरी॥ (१०६) दड्ढाली दववर्त्म दवाग्निमार्गः। दग्धात् डाली॥ (१०७) कुडङ्गो कुडओ लतागृहम्। कुटीशब्दादुक्तेऽर्थे डङ्गडकौ॥ (१०८) कारिमं कृत्रिमम्। कृञो डारिमः॥ (१०९) जंघालुओ (११०) जंघामओ दूतः। जङ्घायाः शीघ्रेऽर्थे लुअमऔ॥ (१११) बलामोडी बलात्कारः। बलान्मुच्यते यलेति॥ (११२) चक्कलं परिवर्तुलम्। चक्राल्लः॥ (११३) बाउल्ली पुत्रिका कुमारीक्रीडोचिता सालभञ्जिका। कुमारीर्व्यापारयतीति व्याप्रेर्डुलिः॥ (११४) मत्तवालो मत्तः। स्वार्थे वालः॥ (११५) वहुणिआ ज्येष्ठभ्रातृवधूः। वध्वा उक्तेऽर्थे णिआ॥ (११६) जंभणंभणो स्वैरभाषणः। यद्वा तद्वा भणत्यधिकमिति। आदितृतीयाभ्यामनुस्वारः, तलोपश्च॥ (११७) भाइरो भेज्जलो भेज्जो (११८) ओज्जरो भीरुः। भियः शील इत्यर्थे डाइरडेज्जलडेज्जाः, त्रसेरादेशात् ओज्जाच्च रः॥ (११९) आहडं सीत्कारः। आहरति आदत्ते प्रियहृदयमिति। आहृञो डः॥ (१२०) काअपिउला कोकिला। काकः पितृवत्पोषको यस्या इत्यर्थे काकपितृशब्दात् ला॥ (१२१) मुहलं मुखम्। स्वार्थे लः॥ (१२२) गत्तडी गायिका। गात्रीशब्दात्स्वार्थे डडी॥

(102) Sk. (103) HD. (पडवा) 6.6. M दूष्यपटकुटी; T दूष्या पटकुटी for दूष्यपटम्. (1'4) Sk युवन् (105) HD. 2.15. T किरिमरी for करमरी. M मृद्यमाना कृष्यते; T मर्द्यमाना कृष्यते for मृद्यमानादाकृष्यते (106) Sk दग्धाली. (107) HD. 2.31. T कुडुको for कुडंगो. (108) HD. 2.27. (109) HD. 3.42. (110) HD. 3.42. (111) HD. 6.92. (112) HD. 3.20. T_1 चग्गळं; T_2 चब्मळं for चक्कलं. (113) HD. 6.92. T बाउळ्ळं. (114) HD. 6.122. (115) HD. (वहुण्णी). 7.41. T वहुणिआ for वहुणिआ. (116) HD. (जंभणवो) 3.44. (117) HD. 6.107. T भाउरो for भाइरो Tom. भेज्जो. (118) HD. (ओज्जल्लो) 1.154. S वंजोलो; T वोजरो for ओज्जरो. (119) HD. (आहुडं). 1.74. KMS शीत्कृतं for सीत्कारः. (120) HD. 2.30. T पुत्रवत् for पितृवत्. (121) HD. 6.134. (122) HD. 2.82.

(१२३) दुद्दोलणा दुग्धापि या दुह्यते गौरित्यत्रार्थे दुग्धात् दोलणा ॥(१२४) माभाइ अभयम् । भियो भादेशान्मापूर्वात् इः॥ (१२५) तोमरिओ शस्त्र-प्रमार्जकः।तोमरादुक्तेऽर्थे डिकः॥ (१२६) वहुहाडिणी वध्वा उपरि परिणीयते इति वध्वा उक्तेऽर्थे हाडिणी॥ (१२७) रुअरुइआ उत्कलिका । रुहरुहिका-शब्दे हकारयोर्लुक् ॥ (१२८) पिउसिआ पिउच्छा पितृष्वसा । पितुः परस्य स्वसुः सिआच्छौ ॥(१२९) पुप्फी पितुः परस्य स्वसुः फी च ॥ (१३०) अणुसूआ आसन्नप्रसवा । अनुसूतेरासन्नप्रसवार्थे डा ॥ (१३१) भच्चो भगिनीसुतः । भगिन्याः सुतेऽर्थे चः, भादेशश्च ॥ (१३२) ओहल्ली अप-सृतिः । सृतेर्हल्ली॥ (१३३) मम्मक्को गर्वः। मर्मणः उक्तेऽर्थे क्कः॥ (१३४) मडप्परो मधुपरः । उतोऽत्, धो डश्च ॥ इत्यादि ॥ कृष्टानुपसर्गघृष्टवाक्य-विद्वस्वाचस्पतिविष्टरश्रवःप्रचेतःप्रोक्तादीनां क्विबादिप्रत्ययान्तानां च अग्निचि-त्सोमसुदित्यादीनां सुग्लौ सुम्लौ इत्यादीनां च पूर्वविद्वद्भिरप्रयुक्तानां प्रतीतिवैषम्य-करः प्रयोगो न कर्तव्यः । शब्दान्तरैरेव तदर्थोऽभिधेयः । यथा—कृष्टः कुशलः । वाचस्पतिः गुरुः । विष्टरश्रवाः हरिः । इत्यादि ॥ घृष्टशब्दस्य सोपसर्गस्य प्रयोग इष्यत एव । मन्दरअडपरिघट्टं, मन्दरतटपरिघृष्टम् । तं दिअसणिघट्टाणं इत्यादि ॥ ३० ॥

अव्ययम् ॥ ३१ ॥

अधिकारोऽयमा पादपरिसमाप्तेः। इतः परं ये वक्ष्यन्ते ते अव्ययसंज्ञका ज्ञातव्याः ॥ ३१ ॥

---

(123) HD. (दुद्धोलणी). 5.46. (124) HD. 6.129. T माहाई for माभाइ. (125) HD. 5.18. B शस्त्री प्रमार्जकः; T शास्त्रप्रमार्जकः. (126) HD. 7.50. T बहुभासिणी for बहुहाडिणी. (127) HD. 7.8. (128) Sk. पितृष्वसा. (129) HD. (पुप्फा). 6.52. (130) HD. 1.23. T_1 अणेपिआ; T_2 अणेडिआ for अणुसूआ. (131) Sk ? (132) Sk अपसृतिः. (133) HD. 6.143. (134) HD. (मडप्फरो) 6.120. S मडुपलो for मडप्परो. MT मदस्फुरः for मधुपरः. KM आर्यैः कविभिः, T पूर्वविद्भिः for पूर्ववि-द्वद्भिः. KMT °वैषम्यपरः for °वैषम्यकरः. KS तंदिअस° for दिअस°. M °णिहट्टाणं for °णिघट्टाणं. Before Sūtra. 31 Bp K read अथाव्ययानि. MS अतः परं for इतः परं.

आम अभ्युपगमे ॥ ३२ ॥

आम इत्यव्ययमभ्युपगमे प्रयोज्यम्। आम बहुला वणाली ॥ आम संस्कृतेऽपीति केचित् ॥ ३२ ॥

तं वाक्योपन्यासे ॥ ३३ ॥

तं इत्यव्ययं वाक्योपन्यासे प्रयोज्यम्। तं तिअसबन्दिमोक्खं ॥ ३३ ॥

णइ चेअ चिअ च्च एवार्थे ॥ ३४ ॥

णइ चेअ चिअ च्च इत्येते अवधारणार्थे प्रयोज्याः। गइओ णइ। गदित एव ॥ जं चेअ मउलणं लोअणाणं अणुबन्धं तं चिअ कामिणीणं। यदेव मुकुलनं लोचनानामनुबन्धं तदेव कामिनीनाम् ॥ दैवादिपाठाद् द्वित्वम्। ते च्चिअ धण्णा ते च्चिअ सुउरिसा। त एव धन्यास्त एव सुपुरुषाः ॥ सो च्च वअरूवेण। स एव वयोरूपेण ॥ सो च्च सीले। स एव शीले ॥ ३४ ॥

हद्धि निर्वेदे ॥ ३५ ॥

हद्धि इति निर्वेदे प्रयोज्यम्। हाधिक्शब्दवत् हद्धि। हद्धि हो धावह। हा धिक् हो धावत ॥ ३५ ॥

दर अर्धेऽल्पे वा ॥ ३६ ॥

दर इत्यव्ययमर्धार्थे ईषदर्थे वा प्रयोज्यम्। दरविअसिअं अर्धमीषद्वा विकसितम् ॥ ३६ ॥

किणो प्रश्ने ॥ ३७ ॥

किणो इत्यव्ययं प्रश्ने वा प्रयोज्यम्। किणो धुवसि, किं धुवसि, किं धूनोषि ॥ ३७ ॥

---

32. KMS अभ्युपगमे आम for the Sūtra. K अभ्युपगमेऽपि for °पगमे. KMS प्रयोक्तव्यम् for प्रयोज्यम् here and elsewhere. 33. B दिअसबंदिमोक्खं for तिअस°. 35. KM निर्वेदे हद्धि इति for हद्धि इति निर्वेदे. B णो धामह for हो धावह. 37. Before किणो in Com. MS read वेत्यनुवर्तते. MS om. अव्ययं.

मिव पिव विव विअ व व्व इवार्थे ॥ ३८ ॥

मिव पिव विव विअ व व्व इति षडेते इवार्थे वा प्रयोज्याः । कमलं मिव । चन्दणं पिव । हंसो विव । जीवो विअ । उअअस्स व ताविअसीअलस्स, उदकस्येव तापितशीतलस्य । साअरो व्व गहिरो, सागर इव गभीरः । साअरो व्व खारओ, सागर इव क्षारः ॥ पक्षे णीलुप्पलमाला इव, नीलोत्पलमालेव ॥ ३८ ॥

किर इर हिर किलार्थे ॥ ३९ ॥

किर इर हिर इति त्रयः किलार्थे वा प्रयोज्याः । कल्लं किर खलहिअओ । तस्स इर पिअवअस्सो । वाहित्ता हिर देवी ॥ पक्षे । एव्वं किल तेज सिविणए भणिअं ॥ ३९ ॥

अम्हो आश्चर्ये ॥ ४० ॥

आश्चर्ये अम्हो इति प्रयोज्यम् । अम्हो देवस्स गई । अम्हो कह परिणिज्जइ ॥ ४० ॥

अब्भो पश्चात्तापसूचनादुःखसंभाषणापराधानन्दादरखेदविस्मयविषादभये ॥ ४१ ॥

अब्भो इति पश्चात्तापादिषु प्रयोज्यम् । पश्चात्तापे—अब्भो तह तेण कआ अहअं जह कस्स साहेमि ॥ सूचनायाम्—अब्भो दुक्करआरअ । अब्भो अगद्धो ॥ दुःखे—अब्भो दलइ हिअअं ॥ संभाषणे—अब्भो किमिणं ॥ अपराधे—अब्भो हरन्ति हिअअं तह विव वेसा भवन्ति जुवईणं ॥ आनन्दे—अब्भो सुप्पहाअमिणं ॥ आदरे—अब्भो मह सफलं जीविअं ॥ खेदे—अब्भो ण जाणामि चित्तं ॥ विस्मये—अब्भो किं पि रहस्सं मुणन्ति धुत्ता जणब्भहिआ, किमपि रहस्यं जानन्ति धूर्ता जनाभ्यधिकाः ॥ विषादे—अब्भो णासेन्ति धिइं पुलअं वड्ढेन्ति देन्ति रणरणअं, नाशयन्ति धृतिं पुलकं वर्धयन्ति ददति रणरणकम् ॥ भये—अब्भो गइअम्हि तुमे णवरज्जइ सा ण जूरिहइ, अब्भो गदितास्मि त्वया नैव रज्येत सा न खेद्यते ॥ ४१ ॥

---

38. KMST om. साअरो व्व गहिरो. 40. KMS अम्मो for अम्हो in the Sūtra and Com. 41. KMS अब्बो; T अंबो for अब्भो in the Sūtra and Com.

हुं पृच्छादाननिवारणे ॥ ४२ ॥

हुं इति पृच्छादिषु प्रयोज्यम्। पृच्छायाम्—हुं साहसु सब्भावं॥ दाने—हुं गेण्ह अप्पणो विअ॥ निवारणे—हुं णिल्लज्ज समोसर॥ ४२॥

वणे निश्चयानुकम्प्यविकल्पे ॥ ४३ ॥

वणे इति निश्चयादौ प्रयोज्यम्। निश्चये—वणे देमि, निश्चयं ददामि॥ विकल्पे—वणे होइ ण होइ, भवति वा न भवति॥ अनुकम्प्ये—होइ दासो वणे ण मुच्चइ, भवति दासोऽनुकम्प्यो न मुच्यते॥ ४३॥

संभावने अइ च ॥ ४४ ॥

अइ इति, चकारात् वणे इति च, संभावने प्रयोज्यम्। अइ दिअर किं ण पेच्छसि। णत्थि वणे जं ण देइ विहिपरिणामो॥ ४४॥

आनन्तर्ये णवरिअ ॥ ४५ ॥

णवरिअ इत्यानन्तर्ये प्रयोज्यम्। णवरिअ से रहुवइणो, अनन्तरमस्य रघुपतेः॥ ४५॥

केवले णवर ॥ ४६ ॥

केवलेऽर्थे णवर इति प्रयोज्यम्। णवर पिआइं चिअ णिव्वडन्ति, केवलं प्रियाण्येव निष्पतन्ति पृथग्भवन्ति॥ केचित्तु 'केवलानन्तर्ययोर्णवर-णवरिअ' इत्येकमेव सूत्रमाहुः। तन्मते उभावप्युभयार्थौ॥ ४६॥

भन्द ग्रहणार्थे ॥ ४७ ॥

भन्द इति ग्रहणार्थे प्रयोज्यम्। भन्द ओलोएसु मं। गृहाणेत्यर्थः॥४७॥

भन्दि विकल्पविषादसत्यनिश्चयपश्चात्तापेषु च ॥ ४८ ॥

भन्दि इति विकल्पादिषु ग्रहणार्थे च प्रयोज्यम्। विकल्पे—भन्दि भोज्ज एत्ताहे, भवेदिदानीम्॥ विषादे—भन्दि चरणे तओ संमाणिओ, चरणौ ततः संमानितौ॥ सत्ये—भन्दि तुह भणिमो॥ निश्चये—सासिज्जइ भन्दि तुह कज्जे॥ पश्चात्तापे—भन्दि सहेहि धरणि॥ ग्रहणार्थे—भन्दि आलोएसु मं॥ ४८॥

---

42. T भुं for हुं. 47. M हंद for भन्द in the Sūtra and Com. 48. K भंदि तुज्झ for भोज्ज.

संभाषणरतिकलहे रे अरे ॥ ४९ ॥

संभाषणरतिकलहयोर्यथासंख्यं रे अरे इत्येतौ प्रयोज्यौ । संभाषणे– रे रे हिअअ मडअसरिसा ॥ रतिकलहे–अरे बहुवल्लह मए समं मा करेसु उवहासं ॥ ४९ ॥

हरे क्षेपे च ॥ ५० ॥

क्षेपे चकारात्संभाषणरतिकलहयोर्यथासंख्यं हरे इति प्रयोज्यम् । क्षेपे–हरे णिल्लज्ज ॥ संभाषणे–हरे पुरिसा ॥ रतिकलहे–हरे बहुवल्लह ॥ ५० ॥

धू कुत्सायाम् ॥ ५१ ॥

कुत्सायां धू इति प्रयोज्यम् । धू णिल्लज्जो लोओ ॥ ५१ ॥

ऊ गर्हाविस्मयसूचनाक्षेपे ॥ ५२ ॥

गर्हादिषु ऊ इति प्रयोज्यम् । गर्हायाम्–ऊ णिल्लज्ज । विस्मये– ऊ कहं मुणिआ अहं ॥ सूचने–ऊ केण ण विण्णाअं ॥ प्रक्रान्तवाक्यस्य विपर्यासशङ्कया विनिवर्तनलक्षण आक्षेपः । तत्र–ऊ किं मए भणिअं ॥५२॥

पुणरुत्तं कृतकरणे ॥ ५३ ॥

पुणरुत्तं इति कृतकरणे प्रयोज्यम् । अइ सुव्वइ पंसुलि णीसहेहिं अङ्गेहिं पुणरुत्तं, अयि स्वपिषि पांसुले निःसहैरङ्गैः कृतकरणम् ॥ ५३ ॥

हु खु निश्चयविस्मयवितर्के ॥ ५४ ॥

हु खु इत्येतौ निश्चयादिषु प्रयोज्यौ । निश्चये–तं पि हु अच्छिण्णसिरं, तं खु सिरीऍ रहस्सं ॥ विस्मये–को खु एसो सहाससिरो ॥ वितर्क ऊहः संशयो वा । ऊहे–न हु नवरसंगहिआ एअं खु हसइ ॥ संशये–जलधरो खु धूमो खु ॥ संभावने चेष्यते–तरिउं ण हु णवर इमं । एअं खु तुमं हसइ ॥ बहुलाधिकारादनुस्वारात्परो हु न प्रयोक्तव्यः ॥ ५४ ॥

---

49. BT भवभासि for उवहासं. 51. KS धू for धू in the Sūtra and Com. 53. K सुप्तते पांसुले for स्वपिषि पांसुले.

णवि वैपरीत्ये ॥ ५५ ॥

णवि इति वैपरीत्ये प्रयोज्यम् । णवि लोअणो ॥ ५५ ॥

वेव्वे विषादभयवारणे ॥ ५६ ॥

वेव्वे इति विषादादौ प्रयोज्यम् । विषादे—उल्लाविरीइ वेव्वेत्ति तीएँ भणिअं ण विम्हरिमो । किमुल्लापयन्त्या उत खिद्यमानया त्वया वेव्वे इति भणितं न विस्मरामः ॥ भये—वेव्वे पलाइदं तेण ॥ वारणे—उल्लाविरीइ वि तुमं वेव्वे त्ति मयच्छि किं णेअं ॥ उल्लाविरीइ इति स्वमायातम् ॥ ५६ ॥

आमन्त्रणे वेव्वे च ॥ ५७ ॥

वेव्वे इति चामन्त्रणे प्रयोज्यम् । वेव्वे गोले । वेव्वे मुरन्दले वहसि पाणिअं ॥ ५७ ॥

वा सख्या मामि हला हले ॥ ५८ ॥

आमन्त्रण इति वर्तते । सख्या आमन्त्रणेऽर्थे मामि हला हले इति प्रयोज्याः । मामि सरिसक्खराण वि । पणवह माणस्स हला । हला सउन्दले । हले हआसे ॥ पक्षे । सहि एरिस च्चिअ गई ॥ ५८ ॥

दे संमुखीकरणे च ॥ ५९ ॥

संमुखीकरणे सख्या आमन्त्रणे च दे इति प्रयोज्यम् । दे पसिअ णिअत्तसु सुन्दरि, यावत्प्रसीद निवर्तस्व सुन्दरि । दे सहि ॥ ५९ ॥

ओ पश्चात्तापसूचने ॥ ६० ॥

पश्चात्तापे सूचनायां च ओ इति प्रयोज्यम् । पश्चात्तापे—ओ पच्चाअन्तिआए ॥ सूचनायाम्—ओ अविणयतत्तिल्लो ॥ परिकल्पार्थे उतादेशेन ओकारेणैव सिद्धम् । ओ विरएमि णहअले ॥ ६० ॥

---

55. M माअणो for लोअणो. 56. B बेव्वे; M बेंबे for वेव्वे in the S0tra and Com. M om. उल्लाविरीइ इति स्वप्रायातम्. 57. T आमंत्रणेषु in the S0tra. B बेव्वे; T बव्वे for वेव्वे. BT बेव्वे मुकुरं रेहसि पाणी क्षीबा (?) 58. BT सरिसक्खराणि; M सहि सक्खिराण वि for सरिसक्खराण वि. BT माणं सहला for माणस्स हला. 59. M आमन्त्रणकरणे for °मन्त्रणे. BT णिवत्तइ. T om. दे सहि. 60. M विकल्पार्थे for परिकल्पार्थे.

अण णाइं नञर्थे ॥ ६१ ॥

नञर्थे अण णाइं इत्येतौ प्रयोज्यौ । अणचिन्तिअं मुणन्ति, अचिन्तितं जानन्ति । णाइं करेमि रोसं, न करोमि रोषम् ॥ ६१ ॥

निश्चयनिर्धारणे वले ॥ ६२ ॥

निश्चये निर्धारणे च वले इति प्रयोज्यम् । निश्चये—वले सीहो, सिंह एवायम् ॥ निर्धारणे—वले पुरिसो धणंजओ खत्तिआणं, पुरुषो धनंजय एव क्षत्रियाणाम् ॥ ६२ ॥

मणे विमर्शे ॥ ६३ ॥

विमर्शे मणे इति प्रयोक्तव्यम् । मणे सूरो, किंस्वित्सूर्यः अन्ये मन्ये इत्यर्थमपीच्छन्ति ॥ ६३ ॥

माइं मार्थे ॥ ६४ ॥

माइं इति मार्थे प्रयोक्तव्यम् । माइं काहीअ रोसं, मा कार्षीद् रोषम् ॥ ६४ ॥

अलाहि निवारणे ॥ ६५ ॥

अलाहीति निवारणे प्रयोज्यम् । अलाहि विसाएण, अलं विषादेन ॥ ६५ ॥

लक्षणे जेण तेण ॥ ६६ ॥

लक्षणे जेण तेण इत्येतौ प्रयोज्यौ । भमररुअं जेण कमलवणं । भमररुअं तेण कमलवणं ॥ ६६ ॥

त्वोदवापोताः ॥ ६७ ॥

अव अप इत्येतावुपसर्गौ उत इति विकल्पार्थो निपातश्च ओ इति तु प्रयोक्तव्याः । ओआरो अवतारः अपकारो वा । ओ विरएमि णहत्थले, उत विरचयामि नभःस्थले । पक्षे अवआरो इत्यादि ॥ ६७ ॥

---

63. BT इत्यमपीच्छन्त्यन्ये for अन्ये मन्ये इत्यर्थमपीच्छन्ति. 64. B माइ; T माउ for माइं in the Sūtra and Com. 65. KM अलाहि किं वाइएण लोहेण, अलं किं वाचिकेन लोभेन for अलाहि विसाएण, अलं विषादेन. 67. T अवकार: for अवतारः. KMT णहअले for णहत्थले.

उ ओ उपेः ॥ ६८ ॥

उप इत्युपसर्गः उ ओ इति द्विधा प्रयोक्तव्यः । उआरो ओआरो उपकारः ॥ ६८ ॥

प्रत्येकमः पडिएक्कं पाडिक्कं ॥ ६९ ॥

प्रत्येकमित्यस्यार्थे पाडिएक्कं पाडिक्कं इति तु प्रयोक्तव्यम् । पाडिएक्कं । पाडिक्कं ॥ पक्षे पच्चेअं ॥ ६९ ॥

स्वयमोऽर्थे अप्पणा ॥ ७० ॥

स्वयमित्यस्यार्थे अप्पणा इति तु प्रयोक्तव्यम् । विसअं विअसन्ति अप्पणा कमलसरा ॥ पक्षे । सअं च्चिअ मुणसि करणिज्जं, स्वयमेव जानासि करणीयम् ॥ ७० ॥

एक्कसरिअं झटिति संप्रति ॥ ७१ ॥

झटित्यर्थे संप्रत्यर्थे च एक्कसरिअं इति तु प्रयोज्यम् । एक्कसरिअं झटिति संप्रति वा ॥ पक्षे । झत्ति । संपइ ॥ ७१ ॥

इहरा इतरथा ॥ ७२ ॥

इहरा इति इतरथार्थे प्रयोज्यम् । इहरा नीसामन्नेहिं । पक्षे । इअरहा ॥ ॥ ७२ ॥

मुधा मोरउल्ला ॥ ७३ ॥

मुधार्थे मोरउल्ला इति तु प्रयोज्यम् । मोरउल्ला ॥ पक्षे मुहा ॥ ७३ ॥

अयि ऐ ॥ ७४ ॥

अयि इत्यर्थे ऐ इति तु प्रयोज्यम् । ऐ बीहेइ । ऐ उम्मत्तिए ॥ अत एव वचनादैकारस्यापि प्राकृते प्रयोगः ॥ ७४ ॥

---

69. पडिएक्कं for पाडिक्कं in the Sūtra and Com. 70. M स्वयं अप्पणो; T स्वयमप्पणा for the Sūtra. 72. BT णिसामतेहिं for नीसामन्नेहिं. 74. K बीहेमि for बीहेइ.

उअ पश्य ॥ ७५ ॥

पश्य इत्यर्थे उअ इति प्रयोज्यम्। उअ णिच्चलणिप्फन्दा। पक्षे ओअच्छादय: पश्यंत इत्यर्थ॥ उवह इति च दृश्यते। उवह गोट्ठनज्झम्मि ॥७५॥

इजेराः पादपूरणे ॥ ७६ ॥

इ जे र इत्येते पादपूरणे प्रयोज्याः। णअणा इ। अच्छी इ। अण्णेक्क इ। रूवं तु जे गब्भइ। कलमगोवी र॥ अहो हंहो हा नाम हे इत्यादय: संस्कृतसमत्वेन सिद्धाः ॥ ७६ ॥

प्याद्याः ॥ ७७ ॥

प्यादयो नियतार्थवृत्तयः प्राकृते प्रयोज्याः। पि अपीत्यर्थे ॥ ७७ ॥

इति श्रीमदर्हनन्दित्रैविद्यदेवश्रुतधरश्रीपादप्रसादासादितसमस्तविद्याप्रभाव-

श्रीमत्त्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ

द्वितीयाध्यायस्य प्रथमः पादः ॥

---

77. MT व्याद्याः for प्याद्याः in the Sūtra. M वि अपीत्यर्थे; T वि अप्यर्थे for पि अपीत्यर्थे. Colophon; BKM om. from °मदर्ह down to श्रीमत्. MT द्वितोयस्याध्यायस्य for द्वितीयाध्यायस्य.

द्वितीयः पादः ॥

वीप्सार्थाच्चदच्चि सुपो मस्तु ॥ १ ॥

वीप्सार्थात्पदात्परस्य सुपः स्थाने तदचि तस्य वीप्सार्थस्य संबन्धिन्यचि परे मो वा भवति । एकैकम् एक्कमेक्कं । एकैकेन एक्कमेक्केण । अङ्गे अङ्गे अङ्ग-मङ्गम्मि ॥ पक्षे । एक्केक्कं इत्यादि ॥ १ ॥

अमः ॥ २ ॥

सुप इत्यनुवर्तते । नाम्नः परस्य सुपः संबन्धिनोऽमः द्वितीयैकवचनस्य स्थाने मकारो भवति । वच्छं । मालं । गिरिं । गोरिं । गामणिं । तरुं । वहुं ॥ २ ॥

श्लुग्जश्शसोः ॥ ३ ॥

नाम्नः परयोर्जस् शस् इत्येनयोर्लुग्भवति । शित्त्वात्पूर्वस्याचो दीर्घः । वच्छा । माला । गिरी । गोरी । गामणी । तरू । वहू चिट्ठन्ति पेच्छ वा ॥ ॥ ३ ॥

णशामः ॥ ४ ॥

नाम्नः परस्य षष्ठीबहुवचनस्य आमः णश् इत्यादेशो भवति । शित्त्वा-त्पूर्वस्य दीर्घः । वच्छाण । वणाण । मालाण । गङ्गाण । गिरीण । दहीण । बुद्धीण । गामणीण । सुधीण । गोरीण । तरूण । महूण । वहूण ॥ ‘ क्त्वासु-पोस्तु सुणात् ’ [१·१·४३] इति वानुस्वारे वच्छाणं गिरीणं इत्यादि ॥४॥

---

1. M om. वा. KS भवति तु for वा भवति. KM om. एकैकेन. B अग्गे अग्गे अग्गमग्गम्मि for अङ्गे अङ्गे अङ्गमङ्गम्मि. S पक्षे एकमेक इत्यादि for पक्षे एक्केक्कं इत्यादि. 2. K गामिणिं for गामणिं. After वहुं K adds पेच्छ वा; S adds पेच्छ. 3. T om. श्लुक्. in the Sūtra. 4. MS ण for णश् in the Sūtra and Com. S om. आमः. M om. वहूण. KMS om. मालाण गङ्गाण; T om. मालाण. KM om. सुधीण; S बुद्धीण for सुधीण. After वच्छाणं KS add वणाणं गङ्गाणं.

हिं हिँ हि भिसः ॥ ५ ॥

नाम्नः परस्य भिसः सबिन्दुः सानुनासिकः केवलश्च हिर्भवति। वच्छेहिं वच्छेहिँ वच्छेहि। धणेहिं धणेहिँ धणेहि। मालाहिं मालाहिँ मालाहि। गिरीहिं गिरीहिँ गिरीहि। बुद्धीहिं बुद्धीहिँ बुद्धीहि। दहीहिं दहीहिँ दहीहि। गामणीहिं गामणीहिँ गामणीहि। गोरीहिं गोरीहिँ गोरीहि। तरूहिं तरूहिँ तरूहि। धेणूहिं धेणूहिँ धेणूहि। वहूहिं वहूहिँ वहूहि। महूहिं महूहिँ महूहि। इत्यादि ॥ ५ ॥

हिंतोत्तोदोदु ङसिस् ॥ ६ ॥

नाम्नः परो ङसिम् पञ्चमीविभक्तिः हिंतो, द्विरुक्तस्तो, दो, दु इति चतुर आदेशानापद्यते। वच्छाहिंतो 'भिस्भ्यस्सुपि' [२·२·२१] इत्येत्वे वच्छेहिंतो। वच्छत्तो। वच्छादो। वच्छादु। वृक्षात् वृक्षेभ्यो वा॥ दहीहिंतो दहित्तो। दहीदो। दहीदु॥ गोरीहिंतो। गोरित्तो। गोरीदो। गोरीदु॥ तरूहिंतो। तरुत्तो। तरूदो। तरूदु॥ महूहिंतो। महुत्तो। महूदो। महूदु॥ धेणूहिंतो। धेणुत्तो। धेणूदो। धेणूदु॥ दो दु इत्यत्र दकारो भाषान्तरार्थः। तेन शौरसेनीमागध्योः—मलअकेदूदो मलअकेदूदु मलयकेतोः। पैशाच्यां 'तल्तदोः' (३·२·४६) इति तकारार्थम्। गिरीतो॥ एवं धनमालागिरिबुद्धिग्रामणीतरुवधूप्रभृतयः ॥ ६ ॥

सुंतो भ्यसः ॥ ७ ॥

पञ्चमीबहुवचनस्य सुंतो इत्यादेशो भवति। वच्छासुंतो वच्छेसुंतो। धणासुंतो धणेसुंतो। मालासुंतो। गिरीसुंतो। दहीसुंतो। बुद्धीसुंतो। गामणीसुंतो। इत्यादि ॥ ७ ॥

---

5. KS सानुस्वारः; M अनुस्वारः for सबिन्दुः. KM use the sign for anunāsika here only, M om. धेणूहिं down to इत्यादि. 6. KMST भ्यस्येत्वे for भिस्भ्यस्सुपि इत्येत्वे. KMT वच्छाओ वच्छाउ and similraly for other words. for वच्छादो वच्छादु. T भाषान्तरार्थं for °रार्थः. T om. from पैशाच्यां down to प्रभृतयः. 7. KMT om. मालासुंतो. After गामणीसुंतो KM add गोरीसुंतो तरूसुंतो महूसुंतो वहूसुंतो K वच्छादु for वच्छाउ. K धणादु for धणाउ. K om. गोरीओ गोरित्तो गोरीउ गोरीहिंतो गोरीहि.

दिर्दोत्तोदु ङसौ ॥ ८ ॥

पञ्चम्यादेशेषु दो त्तो दु इत्येषु ङसि पञ्चम्येकवचने च परे पूर्वस्याचो दीर्घो भवति । वच्छाओ वच्छत्तो ॥ 'संयोगे' (१·२·४०) इति दीर्घेऽपि ह्रस्वः, तथापि तद्ग्रहणं भ्यसि एत्वबाधनार्थम् ॥ ङसिनैव सिद्धे दोदुग्रहणमप्येत्वापवादार्थैव ॥ वच्छाउ वच्छाहिंतो वच्छाहि ॥ धणाओ धणत्तो धणाउ धणाहिंतो धणाहि ॥ गिरीओ गिरित्तो गिरीउ गिरीहिंतो गिरीहि ॥ गोरीओ गोरित्तो गोरीउ गोरीहि ॥ दहीओ दहित्तो दहीउ दहीहिंतो दहीहि ॥ बुद्धीओ बुद्धित्तो बुद्धीउ बुद्धीहिंतो बुद्धीहि ॥ गामणीओ गामणित्तो गामणीउ गामणीहिंतो गामणीहि ॥ तरूओ तरुत्तो तरूउ तरूहिंतो तरूहि ॥ महूओ महुत्तो महूउ महूहिंतो महूहि ॥ धेणूओ धेणुत्तो धेणूउ धेणूहिंतो धेणूहि ॥ वहूओ वहुत्तो वहूउ वहूहिंतो वहूहि ॥ ८ ॥

सोर्लुक् ॥ ९ ॥

नाम्नः परस्य सोः प्रथमैकवचनस्य लुग्भवति । हे देव । हे गङ्गे । हे गोरि । हे लच्छि । हे गामणि । हे वहु ॥ ९ ॥

ङसोऽस्त्रियां सर् ॥ १० ॥

ङसः षष्ठ्येकवचनस्य स इत्यादेशो भवति, अस्त्रियां स्त्रीलिङ्गे न भवति । रित्वाद् द्वित्वम् । वच्छस्स । धणस्स । गिरिस्स । दहिस्स । गामणिस्स । तरुस्स । महुस्स ॥ अस्त्रियामिति किम् । गङ्गाए । गोरीए । धेणूए । वहूए ॥ १० ॥

ङेर्मिर् ॥ ११ ॥

नाम्नः परस्य सप्तम्येकवचनस्यास्त्रियां मिर् इत्यादेशो भवति । रित्वाद् द्वित्वम् । वच्छम्मि । धणम्मि । गिरिम्मि । दहिम्मि । तरुम्मि । महुम्मि ॥ अस्त्रियामित्येव । मालाए । बुद्धीए । धेणूए । वहूए ॥ ११ ॥

---

9. KS हे गङ्गा for हे गङ्गे. S अहो लच्छि for हे लच्छि. 10. M रस्, S सल् for सर् in the Sūtra. Before ङसः in Com. KM read नाम्नः परस्य. M om. धणस्स गिरिस्स. MS om. गोरीए and वहूए. T om. from Sūtra. 11 down to the and fo Com. on Sūtra 22. 11. S ङेर्मिल् for the Sūtra. MS वणम्मि for धणम्मि. MS om. वहूए.

अतो डो विसर्गः ॥ १२ ॥

अकारान्तात्परो विसर्गः डिदोकारो भवति । सर्वतः सव्वओ । पुरतः पुरओ । अग्रतः अग्गओ ॥ एवं सिद्धावस्थापेक्षया । भवतः भवओ । भवन्तः भवन्तो । सन्तः सन्तो । कुतः कुओ ॥ १२ ॥

सोः ॥ १३ ॥

अत इत्यनुवर्तते । अतः परस्य सोः स्थाने डो भवति । वच्छो । देवो ॥ १३ ॥

वैतत्तदः ॥ १४ ॥

अदन्ताभ्यामेतत्तद्भ्यां परस्य सोः डो वा भवति । एसो एस । सो स ॥ १४ ॥

ङसेः श्लुक् ॥ १५ ॥

वेत्यनुवर्तते । अतः परस्य ङसेः श्लुग्वा भवति । शित्त्वात्पूर्वस्य दीर्घः । वच्छा । धणा ॥ पक्षे । वच्छाहिंतो वच्छत्तो वच्छाओ वच्छाउ वच्छाहि ॥ १५ ॥

ङेर्डे ॥ १६ ॥

अतः परस्य सप्तम्येकवचनस्य डिदेत्वं वा भवति । वच्छे । धणे ॥ पक्षे । वच्छम्मि । धणम्मि ॥ १६ ॥

ङसिसो हि ॥ १७ ॥

अतः परस्य ङसिसः पञ्चम्या हि इति वा भवति । वच्छाहि । धणाहि ॥ भ्यासि एत्वे । वच्छेहि । धणेहि ॥ पक्षे हिंतोत्तोदोदु इत्येते च ॥ १७ ॥

टो डेणल् ॥ १८ ॥

अतः परस्य टावचनस्य डित एण इत्यादेशो भवति । लित्त्वान्नित्यम् ॥ वच्छेण । धणेण ॥ अनुस्वारे । वच्छेणं । धणेणं ॥ १८ ॥

---

12. M अकारात्परो for अकारान्तात्परो. After अग्गओ M adds मार्गतः मग्गओ. 15. M om. वच्छाहि. 16. KMS ङिवचनस्य for सप्तम्येकवचनस्य. M डित्वं for डिदेत्वं. 18. KS लित्त्वान्न विकल्पः for लित्त्वान्नित्यम्.

दिर्वा भ्यसि ॥ १९ ॥

अत इति पञ्चम्यन्तस्य षष्ठ्यन्तविभक्तिविपरिणामः । अतो भ्यसादेशे सति दिः दीर्घो वा भवति । वच्छाहिंतो वच्छेहिंतो । वच्छासुंतो वच्छेसुंतो । वच्छाहि वच्छेहि ॥ त्तोदोदुषु दीर्घ एव ॥ १९ ॥

शस्येत् ॥ २० ॥

अतः शसि परे एद्वा भवति । वच्छे वच्छा पेच्छ ॥ २० ॥

भिस्भ्यस्सुपि ॥ २१ ॥

भिस् भ्यस् सुप् इत्येतेषु परेष्वत एत्वं भवति । पृथग्योगान्नित्यम् ॥ भिसि । वच्छेहिं ॥ भ्यसि । वच्छेहिंतो वच्छेसुंतो । वच्छेहि ॥ त्तोदोदुषु दीर्घ एव ॥ सुपि । वच्छेसु ॥ २१ ॥

इदुतोर्दिः ॥ २२ ॥

भिस्भ्यस्सुपि परे इदुतोः दिः दीर्घो भवति । भिसि । गिरीहिं गिरीहि ॥ एवं बुद्धीहिं । तरूहिं । धेणूहिं । महूहिं ॥ भ्यसि । गिरीहिंतो । गिरीसुंतो । गिरीओ । गिरीउ ॥ एवं बुद्धीओ । गामणीओ । तरूओ । महूओ आअअं ॥ सुपि । गिरीसु । दहीसु । गामणीसु । तरूसु ठिअं ॥ क्वचिन्न भवति । दिअभूमिसु दाणजलद्दिआइं, द्विजभूमिषु दानजलार्द्रितानि ॥ इदुतोरिति किम् । वच्छेहि । वच्छेसुंतो । वच्छेसु ॥ २२ ॥

चतुरो वा ॥ २३ ॥

चतुःशब्दस्य उदन्तस्य भिस्भ्यस्सुपि परे दीर्घो वा भवति । चउहि चऊहि । चउहिंतो चऊहिंतो । चउसु चऊसु ॥ २३ ॥

---

19. KS भ्यस्यादेशे परे for भ्यसादेशे सति. 20. MS om. पेच्छ. 21. योगविभागान्नित्यं for पृथग्योगान्नित्यम्. K पक्षे दीर्घोपि; M पक्षे दीर्घः for त्तोदोदुषु दीर्घ एव. 22. KS °सुपि च परे for °सुपि परे. M इत्येतेषु परेषु for परे. After बुद्धीओ KS add दहीओ. After गिरीसु KS add बुद्धीसु. K दाणजलोल्लिआइं; S दोण° for दाणजलद्दिआइं.

पुंसो जसो डउडओ ॥ २४ ॥

इदुत इत्यस्य पञ्चम्यन्तपरिणामः । पुंलिङ्गादिदुतः परस्य जसः अउ अओ इत्येतौ डितौ वा भवतः । अग्गउ अग्गओ । वाअउ वाअओ ॥ पक्षे । अग्गी अग्गिणो । वाऊ वाउणो ॥ पुंसीति किम् । बुद्धीइ । दहीइ ॥ इदुत इत्येव । वच्छा ॥ २४ ॥

डवो उतः ॥ २५ ॥

पुंस इति वर्तते, जस इति च । पुंलिङ्गादुतः परस्य जसः डित् अवो इति वा भवति । वाअवो ॥ पक्षे । वाअओ वाऊ वाउणो ॥ उत इति किम् । वच्छा ॥ पुंस इति किम् । धेणूउ । वहूउ ॥ २५ ॥

णो शसश्च ॥ २६ ॥

योगविभागादिदुतौ गृह्येते । इदुतः परस्य जसः शसश्च णो इत्यादेशो भवति । गिरिणो तरुणो चिट्ठन्ति पेच्छ वा ॥ पक्षे । गिरी । तरू ॥ पुंस इत्येव । बुद्धी । धेणू । दहीइं । महूइं ॥ २६ ॥

नृनपि ङसिङसोः ॥ २७ ॥

पुंलिङ्गे नपुंसकलिङ्गे च वर्तमानादिदुतः परयोर्ङसिङसोर्णो इत्यादेशो वा भवति । गिरिणो तरुणो आगओ विआरो वा ॥ पक्षे ङसि–गिरीओ । तरूओ । दहीओ । महूओ ॥ ङस्–गिरिस्स । तरुस्स । दहिस्स । महुस्स ॥ नृनपीति किम् । बुद्धीए । धेणूए ॥ ङसिङसोरिति किम् । गिद्धा । समिद्धी । दिट्ठं ॥ इदुत इत्येव । कमले । कमलस्स ॥ २७ ॥

टो णा ॥ २८ ॥

पुंनपुंसके वर्तमानादिदुतः परस्य टावचनस्य णा भवति । गिरिणा । दहिणा । गामणिणा । तरुणा । महुणा । खलपुणा ॥ नृनपीत्येव । बुद्धीए । धेणूए ॥ इदुत इत्येव । कमलेण ॥ २८ ॥

---

24. K इत उतः for इदुतः K om. वाअउ वाअओ. KS बुद्धीओ धेणूओ for बुद्धीइ धेणूइ. M om. इदुत इत्येव । वच्छा. 25 M om. the Sūtra and Com. T पुंस इति किं । धेणू । महूइं for धेणूउ वहूउ. 26. T इतौ for इदुतौ. KMS परिगृह्येते for गृह्येते. 27. KMS बुद्धीअ धेणूअ for बुद्धीए धेणूए. 28. M om the Sūtra and Com. T om. the Sūtra. T पुंलिङ्गे नपुंसकलिङ्गे वा for पुंनपुंसके. T उतः for इदुतः.

श्लुगनपि सोः ॥ २९ ॥

इदुतः परस्य सोः शानुबन्धो लुग्भवति । अनपि नपुंसकलिङ्गे न भवति । गिरी । बुद्धी । तरू । धेणू ॥ अनपीति किम् । दहिं । महुं ॥२९॥

मङ्लुगसंबुद्धेर्नपः ॥ ३० ॥

इदुत इति निवृत्तम् । नपो नपुंसकलिङ्गात्परस्य सोर्मकारो ङानुबन्धो लुक् च भवति, असंबुद्धेः आमन्त्रणार्थस्य न भवति । वणं । दहिं । महुं ॥ दहि महु इति तु सिद्धावस्थापेक्षया ॥ बहुलाधिकारादकारान्तान्न लुक् ॥३०॥

श्भिंशिङ् जश्शसोः ॥ ३१ ॥

नप इत्यनुवर्तते । नपुंसकात्परौ जस् शस् इत्येतौ श्भि शिं शिङ् इति त्रीनादेशानापद्येते शानुबन्धान् । शकारो दीर्घार्थः । ङकारः सानुनासिकोच्चारणार्थः । वणाणि वणाइं वणाइँ । गुणाणि गुणाइं गुणाइँ चिट्ठन्ति पेच्छ वा ॥ एवं दहिमहुबिन्द्वादि ॥ नप इत्येव । वच्छा ॥ ३१ ॥

शोशु स्त्रियां तु ॥ ३२ ॥

जश्शसाविति वर्तते । स्त्रियां वर्तमानान्नाम्नः परौ जश्शसौ ओत्वमुत्वं च शितावापद्येते तु । मालाओ मालाउ । बुद्धीओ बुद्धीउ ॥ एवं महीधेणुवहू-प्रभृतयः ॥ पक्षे । माला । बुद्धी । मही । धेणू । वहू ॥ स्त्रियामिति किम् । वच्छा ॥ जश्शसाविति किम् । मालाए कअं ॥ ३२ ॥

आदीतः सोश्च ॥ ३३ ॥

स्त्रियामित्यनुवर्तते । स्त्रियामीकारान्तान्नाम्नः परस्य सोश्चकाराज्जश्शसोश्च आत्वं तु भवति । एसा हसन्तीआ ॥ जस् शस् । गोरीआ रोहन्ति पेच्छ वा ॥ पक्षे । हसन्तीओ । गोरीओ ॥ ३३ ॥

---

29. K नपुंसके for नपुंसकलिङ्गे. 30. After वणं K adds दहिं दहि मुहुं मुहु. S तणं for वणं. 31. KMS त्रीनादेशान्शानुबंधानापद्यते for त्रीनादेशानापद्यते शानुबन्धान्. 32. MS जस् शस् इति वर्तते for जश्शसाविति वर्तते. M om. तु in Com. MS जश्शसीति किं for जश्शसाविति किम् 33. KM गोरिआ रोहंति (चिट्ठंति) for गोरीआ रोहन्ति. T रोमंति for रोहन्ति.

ङसेः शशाशिशे ॥ ३४ ॥

स्त्रियां वर्तमानान्नाम्नः परस्य ङसेः अ आ इ ए इति चत्वार आदेशाः शितो भवन्ति तु । मालाअ मालाइ मालाए । गोरीअ गोरीआ गोरीइ गोरीए । एवं धेणू । वहू ॥ पक्षे । मालाहिंतो । मालत्तो । मालाओ । मालाउ ॥ एवं बुद्धीहिंतो इत्यादि ॥ ३४ ॥

टाङिङसाम् ॥ ३५ ॥

शशाशिशे इत्यनुवर्तते । स्त्रियां नाम्नः परेषां टा ङि ङस् इत्येतेषां स्थाने अ आ इ ए इत्येते आदेशाः शितो भवन्ति । योगविभागान्नित्यम् । जाआअ जाआइ जाआए कअं ठिअं मुहं वा ॥ कप्रत्यये । जाइआअ जाइआइ जाइआए । बुद्धिआअ बुद्धिआआ बुद्धिआइ बुद्धिआए ॥ कप्रत्ययाभावे । बुद्धीअ बुद्धीआ बुद्धीइ बुद्धीए कअं ठिअं वअणं वा ॥ स्त्रियामिति किम् । वच्छेण । वच्छम्मि । वच्छस्स ॥ ३५ ॥

नातः शा ॥ ३६ ॥

स्त्रियां वर्तमानानां नाम्नः परेषां टा ङि ङस् इत्येतेषां प्राप्तः शा इति शित् आकारः आकारान्तान्न भवति । मालाअ मालाइ मालाए कअं ठिअं मुहं वा ॥३६॥

पुंसोऽजातेर्ङीब्वा ॥ ३७ ॥

अजातिवाचिनः पुंलिङ्गात् स्त्रियां वर्तमानात् ङीप्रत्ययो वा भवति । नीली नीला । काली काला । हसमाणी हसमाणा । सुप्पणही सुप्पणहा । इमीए इमाए । इमीणं इमाणं । एईए एआए । एईणं एआणं ॥ अजातेरिति किम् । अआअ अआइ अआए ॥ अप्राप्ते विभाषाविधिरयम् । तेन गौरी कुमारी इत्यादौ संस्कृतवदेव नित्यम् ॥ ३७ ॥

---

34. T सालाअ etc. for मालाअ. All Mss. add मालाआ (T साळाआ) after मालाअ against the Sūtra नातः शा below. 35. After जाआअ all Mss. add जाआआ; After जाइआअ all Mss. add जाइआआ against 2.2.36 below. K वअणं व for वअणं वा. After वअणं वा M adds एवं बहूअ इत्यादि. M स्त्रियामित्येव for स्त्रियामिति किम्. 36. KMS मुहं वा for मुहं वा. 37. B सहमाणी सहमाणा; T भसमाणा भसमाणा for हसमाणी हसमाणा. BKM अआआ for अआअ. T अआ अजा । एलआ एलका for अआअ ...अआए. K अप्राप्ते विधिरयं for अप्राप्ते विभाषाविधिरयम्.

ङीप्प्रत्यये ॥ ३८ ॥

वेत्यनुवर्तते। 'टिड्ढाणञ्' [पा० ४·१·१५] इत्यादिसूत्रेण प्रत्ययनिमित्तो यो ङीप्प्रत्ययो विहितः स स्त्रियां वर्तमानान्नाम्नो वा भवति। साहणी साधनी। कुरुअरी॥ पक्षे विकल्पसामर्थ्यादेव टाप्। साहणा। कुरुअरा ॥ ३८ ॥

इरिद्राच्छाये ॥ ३९ ॥

अनयोः ङीप् वा भवति। हलद्दी हलद्दा। छाही छाहा ॥ ३९ ॥

किंयत्तदोऽस्वमामि सुपि ॥ ४० ॥

सु-अम्-आम् वर्जिते सुपि परे किंयत्तद्भ्यः स्त्रियां ङीप् वा भवति। कीओ काओ। कीए काए। कीसु कासु॥ जीओ जाओ। जीए जाए। जीसु जासु॥ तीओ ताओ। तीए ताए। तीसु तासु॥ अस्वमामीति किम्। का। जा। सा॥ कं। जं। तं॥ काणं। जाणं। ताणं॥४०॥

स्वस्रादेर्डा ॥ ४१ ॥

स्वस्रादेः स्त्रियां वर्तमानात् आप्रत्ययो डिद्भवति। लित्वान्नित्यम्। ससा। णणन्दा। दुहिआ। दुहिआहि। दुहिआसु ॥ ४१ ॥

डोश्लुकौ तु संबुद्धेः ॥ ४२ ॥

'सोः' [२·२·१३] इति यः प्राप्तो डो, यश्च 'श्लुगनपि सोः' [२·२·२९] इति श्लुग् विहितः, तौ संबुद्धेरामन्त्रणार्थस्य सोः तु भवतः। हे देव, हे देवो॥ हे अज्ज, हे अज्जो॥ श्लुक्। हे हरि, हे हरी। हे गुरु, हे गुरू। हे बुद्धि, हे बुद्धी। हे वहु, वहू॥ जाइविसुद्धेण पहू, जातिविशुद्धेन प्रभो॥ संबुद्धेरिति किम्। दे कासवा। दे गोअरा। रेरे पिलिआ। रेरे णिग्घणिआ॥ ४२ ॥

---

38. Bp om. ङीप् in the Sūtra; T सी for ङीप् in the Sūtra. ST अणादिसूत्रेण for टिड्ढाणञ् इत्यादिसूत्रेण. B सहमाणी for साहणी. K कुलरी for कुरुचरी. KMST कुरुचरा for कुरुअरा. 39. KS हरिद्राच्छाया for the Sūtra. KS ङि for ङीप्. 42. KS हे कासवा, हे गोअमा, रे रे पिप्पला; T हे गे अम्मा, रे रे पञ्वळ-आ, रे रे णिग्घणिआ for दे ...ग्घणिआ.

ऋदन्ताड्ः ॥ ४३ ॥

संबुद्धेरित्यनुवर्तते। ऋदन्तान्नाम्नः परस्य संबुद्धेः डित् अत्वं तु भवति। हे पितः हे पिअ। हे दातः हे दाअ ॥ ४३ ॥

नाम्नि डरम् ॥ ४४ ॥

नाम्नि संज्ञायां ऋदन्तात्परस्य संबुद्धेर्डित् अरं इति तु भवति। हे पितः हे पिअरं। पक्षे हे पिअ ॥ नाम्नीति किम्। हे कत्तार ॥ ४४ ॥

टापो डे ॥ ४५ ॥

टाबन्तात्परस्य संबुद्धेर्डित् एत्वं तु भवति। हे माले। हे अज्जे ॥ पक्षे। हे माला। हे अज्जू इत्यादि ॥ टाप इति किम्। हे पिउच्छा। हे माउच्छा ॥ बहुलाधिकारात्कचिदोत्वमपि। अम्मो भणामि भणिए ॥ ४५ ॥

ह्रस्वलीदूतः ॥ ४६ ॥

संबुद्धिनिमित्तयोरीदूतोर्ह्रस्वो लिद्भवति। हे णइ। हे लच्छि। हे वहु ॥ ४६ ॥

क्विपः ॥ ४७ ॥

संबुद्धेरिति निवृत्तम्। क्विबन्तयोरीदूतोर्ह्रस्वो भवति। गामणिणा। खलपुणा। गामणिसुंतो। खलपुहिं ॥ ४७ ॥

---

43. M om. the Sūtra and Com. KS हे पिअ हे पिअरं हे मातः हे माअ हे माअरं for हे पिअ. 44. M om. the Sūtra and Com. K हे पिअरं हे पिअ for हे पिअरं. T पिदरं for पिअरं. 45. M om. the Sūtra and Com. After हे अज्जे K adds हे पुत्तिए. K हे मालि for हे माला. S om. हे अज्जू. T क्वचिदेत्वमपि। अत्ते भणामि भणिए for क्वचिदोत्वमपि अम्मो भणामि भणिए. 46. M om. the Sūtra and Com. 47, K क्विबः for the Sūtra. K खलपुण. KT गामणिमुओ for गामणिसुंतो. K खलपुमुहं; T खळपुअहं for खलपुहिं.

उद्दतां त्वस्वमामि ॥ ४८ ॥

ऋदन्तानामुत्वं भवति तु, अस्वमामि सु-अम्-आम्-वर्जिते, अर्थात्सुपि परे ॥ जसि । भत्तू भत्तुणो भत्तओ भत्तउ । पक्षे भत्तारा ॥ शसि । भत्तू भत्तुणो । पक्षे भत्तारा ॥ टा । भत्तुणा भत्तारेण ॥ भिस् । भत्तूहिं । पक्षे भत्तारेहिं ॥ ङसि । भत्तूहिंतो भत्तुत्तो भत्तूओ भत्तूउ भत्तुणो । पक्षे भत्ताराहिंतो भत्तारत्तो भत्ताराउ भत्तारा भत्ताराहि ॥ ङस् । भत्तुणो भत्तुस्स ॥ पक्षे भत्तारस्स ॥ ङौ । भत्तुम्मि । पक्षे भत्तारे ॥ सुप् । भत्तूसु । पक्षे भत्तारेसु ॥ बहुवचनं व्याप्त्यर्थम्, तेन यथादर्शनं नाम्नि उत्वं वा भवति ॥ जश्शस्ङसिङस्सु । पिउणो । जामाउणो ॥ टा । भाउणा ॥ भिस् । पिऊहिं ॥ सुप् । पिऊसु ॥ पक्षे पिआर इत्यादि ॥ अस्वमामीनि किम् । सु । पिआ ॥ अम् । पिअरं ॥ आम् । पिअराणं ॥ ४८ ॥

आरः सुपि ॥ ४९ ॥

ऋदन्तस्य सुपि परे आर इत्यादेशो वा भवति । भत्तारो । भत्तारा । भत्तारं । भत्तारे । भत्तारेणं । भत्तारेहिं ॥ एवमन्यत्राप्युदाहार्यम् ॥ लुप्तविभक्त्यपेक्षया भत्तारविहिअं ॥ ४९ ॥

मातुरा अरा ॥ ५० ॥

मातृशब्दस्य आ अरा इत्यादेशौ भवतः । माआ माअरा । माआओ माअराओ । माआइ माअराइ । माअं माअरं ॥ बहुलाधिकाराज्जनन्यर्थस्य आ, देवतार्थस्य अरा । माआए कुच्छिआए । णमो माअराणं ॥ 'इदुन्मातुः' [१·२·८२] इत्युत्वे माउणि । 'उद्दतां त्वस्वमामि' [२·२·४८] इत्युत्वे तु माऊण माऊए ॥ समत्तिअं वन्दे ॥ सुपीत्येव । माइदेवो । माइगणो ॥५०॥

---

48. KST om. ङौ भत्तुम्मि। पक्षे भत्तारे. 50. After मातृशब्दस्य KS add ऋतः सुपि परे. K om. माआइ माअराइ. K माईण for माऊण. B समेत्तिअं; T समत्तअं for समत्तिअं.

संज्ञायामरः ॥ ५१ ॥

ऋदन्तस्य संज्ञायां सुपि परे अर इत्यादेशो भवति। पिअरा पिअरो। पिअरं पिअरे। पिअरेण पिअरेहिं ॥ जामाअरो जामाअरा। जामाअरं जामाअरे। जामाअरेण जामाअरेहिं ॥ ५१ ॥

आ सौ वा ॥ ५२ ॥

ऋदन्तस्य सौ परे आत्वं वा भवति। पिआ। माआ। जामाआ। भाआ। भत्ता। कत्ता ॥ पक्षे। पिअरो। माअरो। जामाअरो। भाअरो। भत्तारो। कत्तारो ॥ ५२ ॥

राज्ञः ॥ ५३ ॥

वेत्यनुवर्तते। राजन्शब्दस्य नलोपे सति अन्त्यस्य सौ परे आत्वं वा भवति। राआ। हे राआ ॥ पक्षे आणादेशे। राआणो। हे राआणो ॥ हे राअं इति शौरसेन्याम् ॥ ५३ ॥

टो णा ॥ ५४ ॥

राज्ञ इत्यनुवर्तते। राजन्शब्दात्परस्य टावचनस्य णा इत्यादेशो वा भवति। राइणा रण्णा ॥ पक्षे राएण कअं ॥ ५४ ॥

जश्शस्ङसिङसां णोश् ॥ ५५ ॥

राज्ञः परेषां जस् जस् ङसि ङस् इत्येतेषां णो इत्यादेशः शिद्भवति वा। जस्—राआणो चिट्ठन्ति। पक्षे राआ ॥ शस्—राआणो पेच्छ। पक्षे राआ ॥ ङसि—राइणो रण्णो आअओ। पक्षे राआहिंतो राअत्तो राआओ राउआ राआ राआहिं ॥ ङस्—राइणो रण्णो धणं। पक्षे राअस्स ॥ ५५ ॥

---

51. M संज्ञायां रः for the Sūtra. 52. M सौ वा for the Sūtra. KM om. भत्तारो. 53. K om. वेत्यनुवर्तते. S om. इति. KMT om. हे राआणो. 54. °शब्दात्परस्य for °शब्दस्य. K राआणो for राइणा. M om. पक्षे. 55. T राइत्तो for राअत्तो. BM राणो; S राआणो for राइणो

णोणाङ्विद्विदना जः ॥ ५६ ॥

राजन्शब्दसंबन्धिनो जकारस्य अना सहितस्य णो णा इत्यादेशयोः **द्विवचने** च परे इकारो वा भवति । राइणो चिट्ठन्ति पेच्छ आअओ **धणं** वा । राइणा कअं । राइम्मि ठिअं ॥ पक्षे । राआणो । रण्णा । राएण । राअम्मि ॥ ॥ ५६ ॥

इणममामा ॥ ५७ ॥

अना ज इत्यनुवर्तते । राजन्शब्दसंबन्धिनो जकारस्य अना सहितस्य अम् आम् इत्येताभ्यां सह इणं इत्यादेशो वा भवति । राइणं पेच्छ **धणं** वा । पक्षे । राअं । राआणं ॥ ५७ ॥

भिस्भ्यसाम्सुप्स्वीत् ॥ ५८ ॥

राजन्शब्दस्य अना सहितस्य जस्य भिस् भ्यस् आम् सुप् इत्येतेषु परेषु ईकारो वा भवति । भिस्—राईहिं ॥ भ्यस्—राईहिंतो । राईसुंतो । राईहि ॥ आम्—राईणं ॥ सुप्—राईसु ॥ पक्षे । राएहिं इत्यादि ॥ ५८ ॥

ङस्ङसिटां णोणोर्ङण् ॥ ५९ ॥

राजन्शब्दस्य अना सहितस्य जस्य ङस्ङसिटावचनानां यौ **णो** णा इत्यादेशौ तयोः परयोः ङित् अण् इत्यादेशो वा भवति । रण्णो राइणो **धणं** आअओ वा । रण्णा राइणा कअं ॥ ङस्ङसिटामिति किम् । राआणो चिट्ठन्ति पेच्छ वा ॥ णोणोरिति किम् । राअस्स । राअओ । राएण ॥ ५९ ॥

---

56. T णो णा इत्यादिषु द्विद्वचनपरे for णो णा इत्यादेशयोः **द्विवचने च परे**. T om. धणं. 58. M जस्यना सहितस्य for अना सहितस्य **जस्य**. T राआहिं for राएहिं. 59. T om. जस्य. KMT कअं for **धणं**.

पुंस्याणो राजवच्चानः ॥ ६० ॥

पुंलिङ्गे वर्तमानस्य अन् इत्यस्य स्थाने आण इत्यादेशो वा भवति । पक्षे यथादर्शनं राजवत्कार्यं च भवति । आणादेशे च 'सोः' [२·२·१३] इत्यादयः प्रवर्तन्ते । पक्षे तु राजवत् 'टो णा' [२·२·५४], 'जश्शस्ङसिङसां णोश्' [२·२·५५], 'इणममामा' [२·२·५७] इति प्रवर्तन्ते । अप्पाणो अप्पाणा । अप्पाणं अप्पाणे । अप्पाणेण अप्पाणेहिं । अप्पाणाओ अप्पाणासुंतो । अप्पाणस्स अप्पाणाणं । अप्पाणम्मि अप्पाणेसु ॥ पक्षे राजवत् । अप्पा अप्पो । दे अप्पा दे अप्पो । अप्पाणो चिट्ठन्ति पेच्छ वा । अप्पणा अप्पेहिं । अप्पाहिंतो अप्पत्तो अप्पाओ अप्पाउ अप्पा अप्पाहि अप्पासुंतो आअओ । अप्पाणो अप्पाणं । अप्पम्मि अप्पेसु ॥ राआणो राआणा । राआणं राआणे । राआणेण राआणाहिं । राआणासुंतो राआणाहिंतो । राआणस्स राआणाणं । राआणम्मि राआणेसु ॥ पक्षे राआ इत्यादि ॥ एवं युवन्-जुवाणो जुवाणा जुवा ॥ ब्रह्मन्—बम्हाणो बम्हा ॥ अध्वन्—अद्धाणो अद्धा ॥ उक्षन्—उच्छाणो उच्छा ॥ ग्रावन्—गावाणो गावा ॥ पूषन्—पूसाणो पूसा ॥ तक्षन्—तक्खाणो तक्खा ॥ मूर्धन्—मुद्धाणो मुद्धा ॥ श्वन्—साणो सा । सुकर्मन्-सुकम्माणो सुकम्मा । पेच्छइ स कहं सुकम्माणो, पश्यति स कथं सुकर्मा ॥ पुंसीति किम् । शर्मन्—सम्मं ॥ ६० ॥

टो वात्मनो णिआ णइआ ॥ ६१ ॥

आत्मनः परस्य टावचनस्य णिआ णइआ इत्यादेशौ वा भवतः । पुनर्वाग्रहणादुत्तरत्र न विकल्पः ॥ अप्पणिआ अप्पणइआ ॥ पक्षे अप्पाणेण अप्पेण ॥ ६१ ॥

---

60. KST om. युवन्. BM बंहाणो बंहा for बम्हाणो बम्हा. T om. बम्हाणो बम्हा. 61. T परस्यैव for परस्य.

सर्वादेर्जसोऽतो डे ॥ ६२ ॥

सर्वादेरदन्तात्परस्य जस एत्वं डिद्भवति । सव्वे । अण्णे । जे । ते । के । इअरे । अवरे । एए ॥ अत इति किम् । सव्वाओ ॥ ६२ ॥

ङेस्त्थस्सिम्मि ॥ ६३ ॥

सर्वादेरित्यनुवर्तते, अत इति च । सर्वादेरदन्तात्परस्य ङेः स्थाने त्थ स्सिं म्मि इति त्रय आदेशा भवन्ति । सव्वत्थ सव्वस्सिं सव्वम्मि । अण्णत्थ अण्णस्सिं अण्णम्मि ॥ एवं सर्वत्र ॥ अत इत्येव । अमुम्मि ॥ ६३ ॥

अनिदमेतदस्तु कियत्तदः स्त्रियां च हिं ॥ ६४ ॥

इदमेतद्वर्जितात्सर्वादेः परस्य ङेः हिं इत्यादेशो भवति तु । किंयत्तद्भ्यः स्त्रियामपि । सव्वहिं । अण्णहिं । जहिं । तहिं । कहिं ॥ पक्षे सव्वत्थ सव्वस्सिं सव्वम्मि इत्यादि ॥ स्त्रियां किम् । किंयत्तदः—काहिं । जाहिं । ताहिं ॥ बाहुलकादेव 'किंयत्तदोऽस्वमामि सुपि' [२·२·४०] इति ङीप् वा भवति । काए कीए इत्यादि ॥ अनिदमेतद इति किम् । इमस्सिं । अस्सिं ॥ ६४ ॥

आमां डेसिं ॥ ६५ ॥

त्वित्यनुवर्तते । सर्वादेः परस्यामः डित् एसिं इत्यादेशो भवति तु । सव्वेसिं । अण्णेसिं । एसिं । इमेसिं । एएसिं । जेसिं । तेसिं । केसिं ॥ पक्षे । सव्वाणं । अण्णाणं । इत्यादि ॥ आमामिति बहुवचनात्स्त्रीविषयस्यापि ॥ सर्वासाम् सव्वेसिं ॥ एवं अण्णेसिं । जेसिं । तेसिं ॥ ६५ ॥

कितद्भ्यां सश् ॥ ६६ ॥

कितद्भ्यां परस्यामः शित् सकारो वा भवति । कास । तास ॥ पक्षे । केसिं । तेसिं ॥ ६६ ॥

---

62. T ले for डे. T एत्वं लिद्भवति for एत्वं डिद्भवति. 63. T वर्तते for अनुवर्तते. 64 After कीए M adds काए जीए ताए तीए. 65. KM सर्वादेरतः परस्य; T सर्वादेः परेषां for सर्वादेः परस्य. 66. MS शस् for सश्.

किंयत्तद्भ्यो ङस् ॥ ६७ ॥

सश् इत्यनुवर्तते। किंयत्तद्भ्यः परो यो ङस् तस्य सश् इत्यादेशो वा भवति। कास। जास। तास॥ पक्षे। कस्स। जस्स। तस्स॥ बहुलाधिकारात् किंयत्तद्भ्यः स्त्रियामपि। कस्याः कास। यस्याः जास। तस्याः तास॥ पक्षे। काए। जाए। ताए॥६७॥

ईतः सेसार् ॥ ६८ ॥

ङस् इति वर्तते। ईकारान्तेभ्यः किंयत्तद्भ्यः परस्य ङसः से सार् इति वा भवतः। सार् इत्यस्य रित्त्वाद् द्वित्वम्। कीसे। किस्सा॥ पक्षे। कीअ। कीआ। कीइ। कीए॥ जीसे। जिस्सा। जीअ। जीआ। जीइ। जीए॥ तीसे। तिस्सा। तीअ। तीआ। तीइ। तीए॥ ६८॥

ङिरिआ डाहे डाला काले ॥ ६९ ॥

कालेऽभिधेये किंयत्तद्भ्यः परो ङिः इआ इत्यादेशं आहे आला इत्येतौ च डितावापद्यते वा। कइआ काहे काला॥ जइआ जाहे जाला॥ तइआ ताहे ताला॥ ताला जाअन्ति गुणा जाला ते सहिअएहि घेप्पन्ति (विषमबाणलीला), तदा जायन्ते गुणाः यदा ते सहृदयैर्गृह्यन्ते॥ पक्षे। कहिं कत्थ कस्सिं कम्मि इत्यादि॥ ६९॥

म्हा ङसेः ॥ ७० ॥

किंयत्तद्भ्यः परस्य ङसेः म्हा इत्यादेशो भवति तु। कम्हा। जम्हा। तम्हा॥ पक्षे। काओ। जाओ। ताओ॥ ७०॥

किमो डीस डिणो ॥ ७१ ॥

किमः परस्य ङसेः ईस इणो इत्यादेशौ डितौ भवतः। कीस किणो॥ पक्षे। कम्हा। काओ॥ ७१॥

डो तदस्तु ॥ ७२ ॥

तदः परस्य ङसेः डिदोत्वं तु भवति। तो। तम्हा॥ ७२॥

---

67. After तास KM add वर्ण. 68. M ईकः सेसार्; S ईशः से सात्; T ईतः से सा for the Sūtra. KM परो for परस्य. 72. MT डो तदः for the Sūtra.

इदमेतत्किंयत्तद्भ्यष्टो डिणा ॥ ७३ ॥

एभ्यः सर्वादिभ्योऽदन्तेभ्यः परस्य टावचनस्य इणा इति डित् भवति तु । इमिणा इमेण । एदिणा एदेण । किणा केण । जिणा जेण । तिणा तेण ॥ ७३ ॥

क्वचित्सुपि तदो णः ॥ ७४ ॥

सुपि परे तच्छब्दे णो भवति तु, क्वचिल्लक्ष्यानुसारेण । णं पेच्छ, तं पश्य ॥ स्त्रियामपि । हत्थुण्णामिअमुही भणइ णं तिअडा, हस्तोन्नामितमुखी भणति तां त्रिजटा ॥ णेण भणिअं, तेन भणितम् ॥ णीए तया ॥ णेहिं कअं, तैः कृतम् । णाहि कअं, ताभिः कृतम् ॥ ७४ ॥

त्रतसि च किमो ल्कः ॥ ७५ ॥

सुपीत्यनुवर्तते । किंशब्दस्य त्रतसोः सुपि च परे लित् को भवति । को के । कं के । केण केहिं ॥ त्र—कत्थ कस्सिं ॥ तस्—कत्तो कदो ॥ ७५ ॥

इदम इमः ॥ ७६ ॥

इदमः सुपि परे इम इत्यादेशो भवति । इमो इमे । इमं इमे । इमेण इमेहिं ॥ स्त्रियामपि । इमा ॥ ७६ ॥

पुंसि सुना त्वयं स्त्रियामिमिआ ॥ ७७ ॥

इदमः सुना सहितस्य पुंलिङ्गे अयमिति स्त्रियां इमिआ इति तु भवति । अयं कअकज्जो । इमिआ सण्णिअमाआ ॥ पक्षे । इमो । इमा ॥ ७७ ॥

अत्सुस्सिंहिस्से ॥ ७८ ॥

इदमः सुप् ङि भिस् ङस् इत्येतेषु सु स्सिं हि स्स इत्यादेशेष्वापन्नेषु अत्वं तु भवति । एसु । अस्सिं । एहि । अस्स ॥ पक्षे । इमेसु । इमस्सिं । इमेहिं । इमाहिं । इमस्स ॥ ७८ ॥

---

74. B हत्था णमिअमुही for हत्थुण्णामिअमुही. After तेन भणितम् T adds भणिअं च णाए. 77. KM स्त्रीलिङ्गे for स्त्रियां.

टासमि णः ॥ ७९ ॥

टास् इति तृतीयाविभक्तिः, अस् इति द्वितीयाविभक्तिः, तयोः परयोरिदमः स्थाने ण इत्यादेशो भवति तु । णेण णेहि कअं । णं णे पेच्छ ॥ पक्षे । इमेण इमेहिं । इमं इमे ॥ ७९ ॥

इहेणं ङ्यमः ॥ ८० ॥

ङि अम् इत्याभ्यां सहितस्य इदमः स्थाने इह इणं इत्येतौ क्रमेण तु भवतः । ङि—इह । अम्—इणं ॥ पक्षे । इमस्सिं । इमम्मि । इमं ॥ ८० ॥

न त्थः ॥ ८१ ॥

इदमः परस्य ङिवचनस्य 'ङेस्त्थस्सिंमम्मि' [२·२·६३] इति प्राप्तः त्थो न भवति । इह । इमस्सिं । इमम्मि ॥ ८१ ॥

क्लीबे स्वमेदमिणमिणमो ॥ ८२ ॥

नपुंसके वर्तमानस्य इदमः सु अम् इत्याभ्यां सहितस्य इदं इणं इणमो इति त्रय आदेशा भवन्ति । इदं इणं इणमो चिट्ठइ पेच्छ वा ॥ ८२ ॥

किं किं ॥ ८३ ॥

क्लीबे, स्वमेति च वर्तते । क्लीबे वर्तमानः किंशब्दः स्वमा सहितः किं इत्येव भवति । किं कुलं । किं भणसि ॥ ८३ ॥

तदिदमेतदां सेसिं तु ङसामा ॥ ८४ ॥

तद् इदम् एतद् इत्येतेषां स्थाने ङस् आम् इत्याभ्यां सह यथासंख्यं से सिं इत्यादेशौ तु भवतः । तद्—से गुणा, तस्य गुणाः तस्या वा ॥ सिं उच्छाहो, तेषामुत्साहः, तासां वा ॥ इदम्—से सीलं, अस्य शीलम्, अस्या वा ॥ सिं गुणा, एषां गुणाः, आसां वा ॥ एतद्—से हिअअं, एतस्य हृदयम्, एतस्या वा ॥ सिं गुणा, एतेषां गुणाः, एतासां वा ॥ पक्षे । तस्स । तेसिं । ताण ॥ इमस्स । इमस्सिं । इमाण ॥ एअस्स । एअस्सिं । एआण ॥ तदेतदोरमा सह से सिं इति आदेशं केचिदिच्छन्ति ॥ ८४ ॥

---

82. KMS नपुंसकलिङ्गे for नपुंसके. T om. चिट्ठइ पेच्छ वा. 83. KMT किमेव भवति for किं इत्येव भवति. KT किं भणासि for किं भणसि. 84. B इत्येषां for इत्येतेषां. KM कश्चिदिच्छति for केचिदिच्छन्ति.

एत्तो एत्ताहे ङसिनतदः ॥ ८५ ॥

त्वित्यनुवर्तते । एतदो ङसिना सह एत्तो एत्ताहे इत्यादेशौ तु भवतः । एत्तो एत्ताहे आगओ ॥ पक्षे । एआहिंतो एअत्तो एआओ एआहि एआउ एआ ॥ ८५ ॥

र्थे डेल् ॥ ८६ ॥

एतदः स्थाने रानुबन्धे थकारे परे डानुबन्धो लानुबन्धश्च एत् भवति । एत्थ ॥ ८६ ॥

एतदो म्मावदितौ वा ॥ ८७ ॥

सप्तम्येकवचनादेशे म्मौ परे एतद एकारस्य अ इ इत्यादेशौ वा भवतः । अअम्मि इअम्मि ॥ पक्षे । एअम्मि ॥ ८७ ॥

सुनैस इणमो इणं ॥ ८८ ॥

एतदः सुना सह एस इणमो इणं इत्यादेशा वा भवन्ति । एस सहाओ चिअ ससहरस्स, एष स्वभाव एव शशधरस्य ॥ एस गई, एषा गतिः । सव्वस्स वि एस गई, सर्वस्याप्येषा गतिः ॥ एस सरं, एतत्सरः ॥ इणमो । इणं ॥ पक्षे । एसा । एओ । एअं ॥ ८८ ॥

तस्सौ सोऽक्लीबे तदश्च ॥ ८९ ॥

तदश्चकारादेतदश्च तकारस्य सौ परे सकारो भवति, अक्लीबे अनपुंसके । सो पुरिसो । सा महिला ॥ एसो पिओ । एसा पिआ । एसा मुद्धा ॥ सौ इत्येव । ते, एए चिट्ठन्ति । ताओ, एआओ महिलाओ ॥ अक्लीब इति किम् । तं, एअं वणं ॥ ८९ ॥

---

88. T सरभस्स for ससहरस्स. KMT om. एस गई एषा गतिः; T om. एस सरं एतत्सरः; KMS एस सिरं एतच्छिरः.

सुप्यदसोऽमुः ॥ ९० ॥

अदसः स्थाने सुपि परे अमु इत्यादेशो भवति। अमू पुरिसो। अमुणो पुरिसा। अमुं वणं। अमूइं वणाइं। अमू महिला। अमूओ महिलाओ॥ टा–अमुणा। अमूहिं॥ ङसि–अमूहिंतो अमूओ अमूहि अमूउ अमुत्तो॥ भ्यस्–अमूहिंतो अमूसुंतो॥ ङस्–अमुणो अमुस्स॥ आम्–अमूणं॥ ङि–अमुम्मि॥ सुप्–अमूसु॥ ९०॥

अहद्वा सुना ॥ ९१ ॥

अदसः सुना सह अहदित्यादेशो भवति तु। तकारस्तावन्मात्रदर्शनार्थः, तेन स्त्रियामात्वं न भवति। अह पुरिसो। अह महिला। अह वणं। अह णे हसइ हिअएण मारुअतणओ, असावस्मान् हसति हृदयेन मारुततनयः॥ पक्षे। अमू पुरिसो। अमू महिला। अमुं वणं॥ ९१॥

इआऔ म्मौ ॥ ९२ ॥

अदसो ङिवचनादेशे म्मौ परे इअ अअ इत्यादेशौ तु भवतः। इअम्मि। अअम्मि॥ ९२॥

॥ इति श्रीमदर्हनन्दित्रैविद्यदेवश्रुतधरश्रीपादप्रसादासादितसर्वविद्याप्रभाव-
श्रीमत्त्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ
द्वितीयाध्यायस्य द्वितीयः पादः॥

---

90. KMT om. अमूओ महिलाओ. Colophon: KMS om. from °मदर्ह° down to श्रीमत् T has इति द्वितीयाध्यायस्य द्वितीयः पादः। श्रीत्यागेशाय नमः.

तृतीयः पादः ॥

युष्मत्सुना तुवं तुं तुमं तुह ॥ १ ॥

युष्मच्छब्दः सुना सहितः तुवं तुं तुमं तुह इत्यादेशांश्चतुरः प्राप्नोति। तुवं तुं तुमं तुह दिट्ठो सि ॥ १ ॥

अमा तुमे तुए च ॥ २ ॥

युष्मदित्यनुवर्तते। युष्मच्छब्दोऽमा सह तुमे तुए इत्येतौ, चकारात् तुमादिचतुष्टयं चापद्यते। तुमे। तुए ॥ पक्षे। तुवं तुं तुमं तुह वन्दामि ॥ तं इति तु त्वामित्यस्य सिद्धावस्थायां वलोपे ह्रस्वे च ॥२॥

जसा भे तुब्भे तुय्हे उय्हे तुब्भ ॥ ३ ॥

युष्मच्छब्दो जसा सह भे तुब्भे तुय्हे उय्हे तुब्भ इति पञ्चादेशानापद्यते। भे तुब्भे तुम्हे उय्हे तुब्भ चिट्ठह। 'वा ब्भो म्हज्झौ' [२·३·१४] इति वचनात् तुम्हे तुज्झे तुम्ह तुज्झ इति नव रूपाणि ॥ ३ ॥

शसा वो च ॥ ४ ॥

युष्मच्छब्दः शसा सह वो इति, चकारात् भे इत्यादींश्चादेशानापद्यते। वो भे तुब्भे तुम्हे उय्हे तुब्भ तुम्हे तुज्झे तुम्ह तुज्झ इति दश रूपाणि ॥४॥

---

1. M om. तुं in the Sūtra and Com. T तुहि for तुह in the Sūtra and Com. KS इति चतुर आदेशानाप्नोति for इत्यादेशांश्चतुरः प्राप्नोति. After दिट्ठो सि KS add तं इति तु सिद्धावस्थायां त्वमित्यस्य वलोपे; MT तुं इति सिद्धावस्थायां वलोपे. 2. M तुमादिचतुष्टयं for तुवमादिचतुष्टयं. K om. सिद्धावस्थायां. MT तुं इति तु त्वामित्यस्य वलोपे ह्रस्वे च. S ह्रस्वश्च for ह्रस्वे च. 3. KMST हे for भे in the Sūtra and Com. here and elsewhere almost regularly. MT तुम्हे उम्हे for तुब्भे in the Sūtra. T षडादेशान् for पञ्चादेशान्. S ओ म्हो मज्झौ च for वा ब्भो म्हज्झौ. 4. T तुय्भे तुम्हे almost everywhere. S ओ for वो in the Sūtra and Com. KMST युष्मत् for युष्मच्छब्द. KMS हे for भे almost everywhere. T इत्यादेशान् for इत्यादींश्चादेशान्. After कअं KS add एवं दश रूपाणि. M एवं for इति.

टा मे ते दे दि तुमं तुमइ ॥ ५ ॥

युष्मच्छब्दः टावचनेन सह मे ते दे दि तुमं तुमइ इति षडादेशानापद्यते । मे ते दे दि तुमं तुमइ कअं ॥ ५ ॥

ङिटाभ्यां तुमए तुइ तुए तुमाइ तुमे ॥ ६ ॥

युष्मच्छब्दः ङिटाभ्यां सह तुमए तुइ तुए तुमाइ तुमे इति पञ्च रूपाण्याप्नोति । तुमए तुइ तुए तुमाइ तुमे ठिअं कअं वा ॥ ६ ॥

तुब्भ तुहिंतो तुम्ह ङसिना ॥ ७ ॥

युष्मच्छब्दः ङसिना सह तुब्भ तुहिंतो तुम्ह इति त्रीणि रूपाण्यापद्यते । तुब्भ तुहिंतो तुम्ह वा आगओ । 'वा ब्भो म्हज्झौ' [२·३·१४] इति वचनात् तुम्ह तुज्झ ॥ इति पञ्च रूपाणि ॥ ७ ॥

तु तुइ ङिप्ङसौ ॥ ८ ॥

ङिप् सप्तमीविभक्तिः, ङसिः पञ्चम्येकवचनम्, तयोः परयोर्युष्मच्छब्दो यथासंख्यं तु तुइ इत्येतावादेशावापद्यते । सप्तमीङस्योर्यथाप्राप्तमेव । सप्तम्यां तु तुम्मि तुसु ॥ ङसौ—तुइ तुइत्तो तुईहिंतो तुईओ तुईउ आगओ ॥ ८ ॥

तुव तुम तुह तुब्भ ॥ ९ ॥

ङिप्ङसावित्यनुवर्तते । ङिपि ङसौ च परे युष्मद् तुव तुम तुह तुब्भ इति चत्वारि रूपाण्यापद्यते । ङिप्ङस्योर्यथाप्राप्तमेव । ङिपि—तुवम्मि तुमम्मि तुहम्मि तुब्भम्मि । 'वा ब्भो म्हज्झौ' [२·३·१४] इति वचनात् तुम्हम्मि तुज्झम्मि। सुपि—तुवेसु तुमेसु तुहेसु तुब्भेसु तुम्हेसु तुज्झेसु ठिअं। 'क्त्वासुपोस्तु

---

5. M om. तुमइ in the Sūtra but has it in Com. MT पञ्च रूपाण्यापद्यते for षडादेशानाप°. 6. KMST युष्मत् for युष्मच्छब्दः. KS रूपाणि प्राप्नोति for रूपाण्याप्नोति. 7. T तुम्ह for तुब्भ in the Sūtra and Com. T तुय्भ for तुम्ह in the Sūtra and Com. T युष्मत् for युष्मच्छब्दः. 8. M ङिम्ङसोः. for ङिप्ङसौ in the Sūtra. M ङिप्ङसोः for सप्तमीङस्योः. T ङिपि for सप्तम्यां तु. KS om. सप्तम्यां तु. After तुवेसु KS add तुमेसु. K दोदुदुकहि एष्वपि for दोडुहिंतसुतेष्वपि.

सुणात्' [१·१·४३] इत्यनुस्वारे तुवेसुं इत्यादि। ङसौ—तुवाहिंतो तुमाहिंतो तुहाहिंतो तुब्भाहिंतो। 'वा ब्भो म्हज्झौ' [२·३·१४] इति वचनात् तुम्हाहिंतो तुज्झाहिंतो॥ एवं तुवत्तो तुमत्तो तुहत्तो तुब्भत्तो तुम्हत्तो तुज्झत्तो। इति दोदुहिंतसुंतेष्वप्युदाहार्यम्॥ तत्तो इति तु त्वत्त इत्यस्य वलोपे॥ ९॥

भिसा मेतुब्भेहुब्भेहुय्हेहितुय्हेहि॥ १०॥

युष्मद् भिसा सह मे तुब्भेहि उब्भेहि उय्हेहि तुय्हेहि इति पञ्च रूपाण्यापद्यते। मे तुब्भेहि उब्भेहि उय्हेहि तुय्हेहि कअं॥ 'वा ब्भो म्हज्झौ' [२·३·१४] इति वचनात् तुम्हेहि तुज्झेहि उम्हेहि उज्झेहि। एवं नव रूपाणि॥ १०॥

उम्होय्हतुय्हतुब्भ भ्यसि॥ ११॥

भ्यसि परे युष्मद् उम्ह उय्ह तुय्ह तुब्भ इति चत्वारि रूपाण्यापद्यते। भ्यसस्तु यथाप्राप्तमेव। उम्हाहिंतो उय्हाहिंतो तुय्हाहिंतो तुब्भाहिंतो आगओ॥ 'वा ब्भो म्हज्झौ' [२·३·१४] इति वचनात् तुम्हाहिंतो तुज्झाहिंतो। उम्हत्तो उय्हत्तो तुय्हत्तो तुब्भत्तो तुम्हत्तो तुज्झत्तो इत्यादि॥ एवं दोदुहिंतसुंतेष्वप्युदाहार्यम्॥ ११॥

तुब्भोब्भोय्हतइतुहंतुहतुम्हंतुवतुमतुमेतुमाइतुमोदेतेदितुइए ङसा॥ १२॥

युष्मद् ङसा सह तुब्भ उब्भ उय्ह तइ तुहं तुह तुम्हं तुव तुम तुमे तुमाइ तुमो दे ते दि ति तु इ ए इत्यष्टादशादेशानापद्यते। 'वा ब्भो म्हज्झौ' [२·३·१४]इति वचनात् तुम्ह तुज्झ उम्ह उज्झ इति द्वाविंशतिरूपाणि॥ १२॥

तुम्हाणतुब्भंतुब्भाणतुमाणतुवाणतुहाणतुब्भवोमे त्वामा॥ १३॥

युष्मदामा सह तुम्हाण तुब्भं तुब्भाण तुमाण तुवाण तुहाण तुब्भ वो मे त्वा इति दशादेशानापद्यते। तुम्हाण तुब्भं। 'वा ब्भो म्हज्झौ' [२·३·१४] इति वचनात् तुम्हं तुज्झं तुब्भाण तुम्हाण तुज्झाण तुब्भ तुम्ह तुज्झ वो मे त्वा॥ 'क्त्वासुपोस्तु सुणात्' [१·१·४३] इत्यनुस्वारे तुम्हाणं तुब्भाणं तुज्झाणं तुमाणं तुवाणं तुहाणं॥ एवं त्रयोविंशतिरूपाणि॥ १३॥

---

11. MS तुम्हो for उम्हो in the Sūtra and Com. 12. KS तुब्भ तुम्ह उब्भ उम्ह for तुब्भ उम्ह उय्ह. After ए KS add धर्ण.

वा भ्मो म्हज्झौ ॥ १४ ॥

युष्मदादेशसंबन्धिनो द्विरुक्तस्य भकारस्य म्ह ज्झ इत्यादेशौ वा भवतः। तत्र यथास्थानमुदाहृतमेव ॥ १४ ॥

अस्मत्सुना अम्हिहमहअमहमहम्म्यम्मि ॥ १५ ॥

अस्मच्छब्दः सुना प्रथमैकवचनेन सह अम्हि हं अहअं अहं अहम्मि अम्मि इति षडादेशानाप्नोति । अम्मि करेमि, अहं करोमि । तेण हं दिट्ठो, तेनाहं दृष्टः । अहअं जप्पामि, अहं जल्पामि । अहं गमिस्सं, अहं गमिष्यामि । अज्ज अहम्मि हासिआ, अद्याहं हासिता । न अम्मि कुविआ, नाहं कुपिता ॥ १५ ॥

मो भे वअं जसा ॥ १६ ॥

अस्मदित्यनुवर्तते । जसा महास्मच्छब्दः मो भे वअं इति त्रीनादेशानापद्यते । मो भणामो इत्यादि ॥ १६ ॥

अम्हे अम्हो अम्ह ॥ १७ ॥

अस्मच्छब्दः जसा सह अम्हे अम्हो अम्ह इति त्रीनादेशानापद्यते । योगविभाग उत्तरार्थः ॥ अम्हे इत्यादि ॥ १७ ॥

णे च शसा ॥ १८ ॥

शसा सहास्मच्छब्दः णे इति, चकारात अम्हे इत्यादि त्रीनादेशाश्चापद्यते । णे अम्हे पेच्छ इत्यादि ॥ १८ ॥

मं णे णं मि मिमं ममम्मि अहं मम्हाम्ह अमा ॥ १९ ॥

अस्मच्छब्दः अमा सह मं णे णं मि मिमं ममं अम्मि अहं मम्ह अम्ह इति दशादेशानापद्यते ॥ मं पेच्छ इत्यादि ॥ १९ ॥

---

14. After उदाहृतमेव S adds in margin: अस्मच्छब्दः. 15. KS सहितः for सह. KS °देशानापद्यते for °देशानाप्नोति. KS अज्जम्मि हासिआ for अज्ज अहम्मि हासिआ. 16. M मो हे वअं भणिमो for मो भणामो इत्यादि. 17. KM अस्मज्जसा सह for अस्मच्छब्दः जसा सह. KMS अम्हे अम्हो अम्ह पेच्छामो for अम्हे पेच्छामो इत्यादि. 18. KM इत्यादेशाश्चापद्यते for इत्यादि त्रीनादेशानापद्यते. After णे KM add अम्हो अम्ह. 19. KS णं मे etc पेच्छ for मं पेच्छ इत्यादि.

मि मइ ममाइ मए मे ङिटा ॥ २० ॥

ङिवचनेन टावचनेन सहास्मच्छब्दः मि मइ ममाइ मए मे इति पञ्चा-देशानापद्यते। मि ठिअं कअं वा इत्यादि ॥ २० ॥

ममं णे मआइ ममए टा ॥ २१ ॥

टावचनेन सहास्मच्छब्दः ममं णे मआइ ममए इति चतुर आदेशा-नापद्यते । ममं कअं इत्यादि ॥ २१ ॥

णेऽम्हेह्यम्हाह्यम्हेऽम्ह भिसा ॥ २२ ॥

भिसा सहास्मच्छब्दः णे अम्हेहि अम्हाहि अम्हे अम्ह इति पञ्चा-देशानापद्यते । णे कअं इत्यादि ॥ २२ ॥

मइ मम मह मज्झ ङसौ ॥ २३ ॥

ङसौ पञ्चम्येकवचने परे अस्मच्छब्दः मइ मम मह मज्झ इति चतुर आदेशानापद्यते । ङसेस्तु यथाप्राप्तमेव । मईहिंतो मइत्तो मईओ मईउ । एवं ममाहिंतो ममत्तो ममाउ ममाहि ममा ॥ एवं महाहिंतो महत्तो मज्झाहिंतो मज्झत्तो इत्यादि ॥ २३ ॥

अम्ह मम भ्यसि ॥ २४ ॥

भ्यसि पञ्चमीबहुवचने परे अस्मच्छब्दः अम्ह मम इत्यादेशावापद्यते । अम्हाहिंतो अम्हेहिंतो अम्हत्तो अम्हाओ अम्हाउ अम्हासुंतो अम्हेसुंतो अम्हाहिं अम्हेहिं । ममाहिंनो ममेहिंतो ममत्तो ममाओ ममाउ ममासुंतो ममाहिं ॥ २४ ॥

अम्हं मज्झं मज्झ मइ मह महं मे च ङसा ॥ २५ ॥

ङसा सह अस्मच्छब्दः अम्हं मज्झं मज्झ मइ मह महं मे इति सप्ता-देशान्, चकारादम्हममौ चापद्यते ॥ अम्हं इत्यादि ॥ २५ ॥

---

24. KMS om. अम्हेहिंतो.

अम्हे अम्हो अम्हाण ममाण महाण मज्झाण मज्झाम्हाम्हं णे णो आमा ॥ २६ ॥

आमा सह अस्मच्छब्दः अम्हे अम्हो अम्हाण ममाण महाण मज्झाण मज्झ अम्ह अम्हं णे णो इत्येकादशादेशानाप्नोति। अम्हे धणं इत्यादि। 'क्त्वासुपोस्तु सुणात्' [१·१·४३] इत्यनुस्वारे। अम्हाणं ॥ एवं पञ्चदश रूपाणि ॥ २६ ॥

अम्ह मम मज्झ मह ङिपि ॥ २७ ॥

सप्तमीविभक्तौ परतः अस्मच्छब्दः अम्ह मम मज्झ मह इति चतुर आदेशानापद्यते। ङिपो यथाप्राप्तमेव; ङि—अम्हम्मि ममम्मि मज्झम्मि महम्मि ॥ सुप्—अम्हेसु ममेसु मज्झेसु महेसु ॥ एत्वविकल्पमते अम्हसु ममसु मज्झसु महसु ॥ आत्वमपीच्छन्त्यन्ये। अम्हासु ममासु मज्झासु महासु ॥ 'क्त्वासुपोस्तु सुणात्' [१·१·४३] इत्यनुस्वारे। अम्हेसुं ममेसुं मज्झेसुं महेसुं। अम्हसुं ममसुं मज्झसुं महसुं। अम्हासुं ममासुं मज्झासुं महासुं ॥ एवमष्टादश रूपाणि ॥ २७ ॥

चतुरो जश्शस्भ्यां चउरो चत्तारो चत्तारि ॥ २८ ॥

चतुश्शब्दस्य जश्शस्भ्यां सह चउरो चत्तारो चत्तारि इति त्रय आदेशा भवन्ति। चउरो चतारो चतारि चिट्ठन्ति पेच्छ वा ॥ २८ ॥

तिण्णि त्रेः ॥ २९ ॥

जश्शस्भ्यामिति वर्तते। त्रिशब्दस्य जश्शस्भ्यां सह तिण्णि इत्यादेशो भवति। तिण्णि पुरिसा महिला वणाणि वा चिट्ठन्ति पेच्छ वा ॥ २९ ॥

दोण्णि दुवे बेण्णि द्वे ॥ ३० ॥

द्विशब्दस्य जश्शस्भ्यां सह दोण्णि दुवे बेण्णि इति त्रय आदेशा भवन्ति। दोण्णि दुवे बेण्णि महिला चिट्ठन्ति पेच्छ वा ॥ 'संयोगे' [१·२·४०] इति ह्रस्वे। दुण्णि। बिण्णि ॥ ३० ॥

---

27. KS read ङिपि before सप्तमीविभक्तौ. K आत्वमिच्छन्त्यन्ये; S आत्वमपीच्छत्यन्यः for आत्वमपीच्छन्त्यन्ये. 29. KMS अनुवर्तते for वर्तते. 30. S om. पेच्छ वा.

दो बे टादौ च ॥ ३१ ॥

द्वेरिति वर्तते । द्विशब्दस्य टादौ तृतीयादौ विभक्तौ परतः दो बे इत्यादेशौ भवतः । चकाराज्जश्शस्भ्यां सहितस्य च । दोहिं बेहिं कअं । दोहिंतो बेहिंतो आगओ । दोण्णं बेण्णं धणं । दोसु बेसु ठिअं ॥ जश्शस्भ्याम् । दो बे ठिआ पेच्छ वा ॥ ३१ ॥

ति त्रेः ॥ ३२ ॥

टादावित्यनुवर्तते । त्रिशब्दस्य टादौ परे ति इत्यादेशो भवति । तिहिं कअं, त्रिभिः कृतं तिसृभिर्वा । तिहिंतो आगओ, त्रिभ्यः तिसृभ्यो वा आगतः । तिणं धणं, त्रयाणां तिसृणां वा धनम् । तिसु ठिअं, त्रिषु तिसृषु वा स्थितम् ॥ ३२ ॥

ण्ह ण्हं संख्याया आमोऽविंशतिगे ॥ ३३ ॥

संख्याशब्दात्परस्यामः ण्ह ण्हं इत्यादेशौ भवतः, अविंशतिगे विंशत्यादीन्वर्जयित्वा । दोण्ह तिण्ह । दोण्हं तिण्हं । चउण्ह चउण्हं । पञ्चण्ह पञ्चण्हं । छण्ह छण्हं । सत्तण्ह सत्तण्हं । अट्ठण्ह अट्ठण्हं । नवण्ह नवण्हं । दसण्ह दसण्हं । पण्णारहण्ह पण्णारहण्हं । अट्ठारहण्ह अट्ठारहण्हं । कइण्ह कइण्हं । कतीनाम् ॥ अविंशतिगे इति किम् । वीसाणं । तिसाणं ॥३३॥

द्विवचनस्य बहुवचनम् ॥ ३४ ॥

सर्वासां विभक्तीनां स्यादीनां तिङादीनां च द्विवचनस्य स्थाने बहुवचनं भवति । दोण्णि कुणन्ति, द्वौ कुरुतः । दोहिं । दोसुंतो । दोण्हं दोसु ॥ दो पाआ, द्वौ पादौ । दोण्णि हत्था, द्वौ हस्तौ । दुवे णअणा, द्वे नयने । बेण्णि कण्णा, द्वौ कर्णौ ॥ ३४ ॥

ङेसो ङम् ॥ ३५ ॥

ङेस् चतुर्थी विभक्तिः, ङम् षष्ठीविभक्तिः । ङेसः स्थाने ङम् भवति । मुणिस्स, मुणीणं भोअणं देहि ॥ णमो देवस्स, देवाणं ॥ ३५ ॥

---

31. K दो दे टादौ च; S दो बे दावौ च for the Sūtra. 33. KM अट्ठरसण्हं समसाहसाण कइण्हं for अट्ठारहण्हं कइण्हं.

तादर्थ्ये ङेस्तु ॥ ३६ ॥

तादर्थ्ये विहितस्य ङेः चतुर्थ्येकवचनस्य स्थाने ङस् षष्ठी तु भवति । देवस्स देवाअ, देवार्थमित्यर्थः ॥ ङेरिति किम् । देवाणं ॥ ३६ ॥

वधाड्डाइ च ॥ ३७ ॥

त्वित्यनुवर्तते । वधशब्दात्परस्य ङेःस्थाने डित् आइ इत्यादेशः षष्ठी चतुर्थी च भवति । वहाइ वहस्स वहाअ । वधार्थमित्यर्थः ॥ ३७ ॥

क्वचिदसादेः ॥ ३८ ॥

अस् द्वितीयाविभक्तिः । असादीनां विभक्तीनां स्थाने षष्ठीविभक्तिः क्वचिद्भवति । सीमंधरस्स वन्दे, सीमंधरं वन्दे । तिस्सा मुहस्स भरिमो, तस्या मुखं स्मरामः । अत्र द्वितीयायाः ॥ धणस्स लद्धं, धनेन लब्धम् । तेसिमेस-मणाइण्णं, तैरेतदनाचीर्णम् । अत्र तृतीयायाः ॥ चोरस्स बीहइ, चोराद्बिभेति । इमाण पाअन्तमहिआण इअराइं लहुअक्खराइं नि, एभ्यः पादान्त-सहितेभ्य इतराणि लघ्वक्षराणि । अत्र पञ्चम्याः ॥ वणसिरिपट्टीए कबरि व्व, वनश्रीपृष्ठे कबरीव । अत्र सप्तम्याः ॥ ३८ ॥

अस्टासोर्ङिप् ॥ ३९ ॥

अस् द्वितीया, टास् तृतीया, तयोः स्थाने ङिप् सप्तमी क्वचिद्भवति तु । गामे वहामि, णअरे णआमि, ग्रामं वहामि, नगरं नयामि । अत्र द्वितीयायाः ॥ तेसुं अलंकिआ पुहवी, तैरलंकृता पृथिवी । अत्र तृतीयायाः ॥ ३९ ॥

---

37. S डायि for डाइ in the Sūtra. 38. KS तिस्सा मुहस्स सरिमो; M तिस्सा मुहं सरिमो for तिस्सा मुहस्स भरिमो. KS धणस्स लद्धो for धणस्स लद्धं. After लद्धं KMS add चिरस्स मुक्का चिरेण मुक्ता. KMS इअ-राण जाण लहुअक्खराइं पाअन्तिमिल्लसहिआण, इतरेभ्यः एभ्यः पादान्तेन सहितेभ्यः इतराणि लघ्वक्षराणि for इमाण...लघ्वक्षराणि. S लघ्वक्षराणीत्यर्थः. M वणसि-रिवट्ठीअ for °वट्ठीए. 39. S ङिस् for ङिप् in the Sūtra. KS तिह तेसु अलंकिआ पुहुवी for तेसुं अलंकिआ पुहवी.

ङसिसष्टाश्च ॥ ४० ॥

ङसिसः पञ्चम्याः स्थाने टास् तृतीया, चकारात्सप्तमी च क्वचिद्भवति। चोरेण बीहइ, चोराद्बिभेति। अन्तेउरे रमिअ आगओ, अन्तःपुराद्रन्त्वागतः ॥ ४० ॥

ङिपोऽम् ॥ ४१ ॥

ङिपः सप्तम्याः स्थाने अम् द्वितीया क्वचिद्भवति। विज्जुज्जोअं भरइ रइं, विद्युद्द्योते स्मरति रतिम् ॥ ४१ ॥

लुक्क्यङोर्यस्य तु ॥ ४२ ॥

क्यङन्तस्य द्विवचनात् क्यषन्तस्य च संबन्धिनो यस्य लुग् भवति तु। क्यङ्—गुरूअइ गुरूइ, अगुरुर्गुरुर्भवति, गुरुरिवाचरति वा ॥ क्यष्—धमधमाअइ धमधमाइ। लोहिआअइ लोहिआइ ॥ ४२ ॥

॥ इति श्रीमदर्हन्नन्दित्रैविद्यदेवश्रुतधरश्रीपादप्रसादासादितसमस्तविद्याप्रभाव-
श्रीमत्त्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ
द्वितीयाध्यायस्य तृतीयः पादः ॥

---

41. S ङसोप् for the Sūtra. S हरइ for भरइ. 42. KMS गुरुआइ गुरुआअइ for गुरूअइ गुरूइ. Colophon: KSM om. from °मदर्ह down to श्रीमत्. KMST द्वितीयस्याध्यायस्य for द्वितीयाध्यायस्य.

चतुर्थः पादः ॥

लटस्तितावि(?)जेच् ॥ १ ॥

लट् वर्तमानं तत्संबन्धिनः प्रथमपुरुषस्य एकत्वे वर्तमानौ यौ परस्मै-पदात्मपदत्वेन विहितौ तिप् तङ् इत्येतौ प्रत्येकं इच् एच् च इत्येतौ भवतः । चकारौ 'इुरचिति'[३·१·५]इति विशेषणार्थौ । हसइ हसए । रमइ रमए ॥ १ ॥

सिप्थास्सेसि ॥ २ ॥

लट इत्यनुवर्तते । परस्मैपदात्मनेपदयोर्मध्यमपुरुषस्य एकत्वे वर्तमानौ सिप् थास् इत्येतौ प्रत्येकं से सि इत्येतौ तु भवतः । हससे हससि । रमसे रमसि ॥ २ ॥

मिर्मिबिटौ ॥ ३ ॥

लटः परस्मैपदात्मनेपदोत्तमपुरुषैकवचनत्वे वर्तमानौ मिप् इट् इत्येतौ प्रत्येकं मि इति भवतः । हसामि । रमामि ॥ बहुलाधिकारात् मिबिटोरादे-शस्य मेरिकारस्य लोपश्च । बहु वण्णिउं न सक्कं, बहु वर्णितुं न शक्नोमि । न मरं, न म्रिये ॥ ३ ॥

झिझौ न्ति न्ते इरे ॥ ४ ॥

लटः प्रथमपुरुषस्य बहुत्वे वर्तमानौ झि झ इत्येतौ प्रत्येकं न्ति न्ते इरे इति त्रीनादेशानापद्येते । हसन्ति हसन्ते । रमन्ति रमन्ते । हसिज्जन्ति हसिज्जन्ते । रमिज्जन्ति रमिज्जन्ते । गज्जन्ते खे मेहा । उप्पज्जन्ते कइ-हिअअसाअरे कव्वरअणाइं । दोण्णि वि ण पहुप्पिरे बाहू, द्वावपि न प्रभवतो बाहू ॥ कचिदेकत्वे इरे । सूसइरे ताण तारिसो कण्ठो, शुष्यति तासां तादृशः कण्ठः ॥ ४ ॥

---

1. MST इचेच् for इजेच् in the Sūtra. T वर्तमानात् for वर्तमानं. MST त for तङ्. T इत्यादेशौ for इत्येतौ. S एच्च भवतः for एच्च इत्येतौ भवतः. S विशेषणार्थः for विशेषणार्थौ. 2. KM मध्यमपुरुषैकत्वे for °षस्य एकत्वे. After वर्तमानौ M adds यौ. M इत्यादेशौ for इत्येतौ. M om. तु. 3. ST मि for मिर् in the Sūtra and Com. T om. प्रत्येकं. M इकारलोपश्च for इकारस्य लोपश्च. After सक्कं M adds आइं दीसंति सरअपिढाइं. 4 BT om. दोण्णि वि ण and द्वावपि न. S om. रमन्ति रमन्ते. T om. कइ...णाइं. K om. तारिसो. T कर्णः for कण्ठः.

थध्वमित्थाहचौ ॥ ५ ॥

लटो मध्यमपुरुषबहुत्वे वर्तमानौ थ ध्वम् इत्येतौ प्रत्येकं इत्था हच् इत्यादेशावापद्येते । हसित्था हसह । रमित्था रमह ॥ बहुलाधिकारात् इत्था अन्यत्रापि । जं जं ते रोइत्था, यद्यत्ते रोचते ॥ हच् इति चकारः 'इहहचोः' [३.२.५] इति विशेषणार्थः ॥ ५ ॥

मो म मु मस्महिङ् ॥ ६ ॥

लट उत्तमपुरुषबहुत्वे वर्तमानौ मस् महिङ् इत्येतौ प्रत्येकं मो म मु इति त्रीनादेशानापद्येते । हसामो हसाम हसामु । रमामो रमाम रमामु ॥ ६ ॥

अत एवैच् से ॥ ७ ॥

लटः प्रथमपुरुषस्य एकत्वे य एच्, यश्च मध्यमपुरुषैकत्वे विहितः से, तौ अकारान्तादेव भवतः, नान्यस्मात् । हसए हससे । तुवरए तुवरसे । करए करसे ॥ अत इति किम् । ठाइ ठासि । वसुआइ वसुआसि । होइ होसि ॥ ७ ॥

त्वस्तेर्म्हम्होम्हि ममोमिना ॥ ८ ॥

अस्तेर्धातोः स्थाने म मो मि इत्येतैः सह यथासंख्यं म्ह म्हो म्हि इत्यादेशा भवन्ति तु । गअ म्ह गअ म्हो गअ म्हि, गताः स्मः । एस म्हि, एषोऽस्मि । मुकारस्याग्रहणादप्रयोग एव तस्येत्यवसीयते । पक्षे । अत्थि अम्हे । अत्थि अहं ॥ ८ ॥

सिना ल्सि ॥ ९ ॥

अस्तेरित्यनुवर्तते । अस्तेर्धातोः सिना मध्यमपुरुषैकवचनादेशेन सह सि इत्यादेशो लिद्भवति । णिट्ठुरो जं सि, निष्ठुरो यदसि ॥ सिनेति किम् । सेआदेशे सति । अत्थि तुमं ॥ ९ ॥

---

5. S हसेत्था for हसित्था. B जं ते for जं जं ते; B यत्ते for यद्यत्ते. 6. S °पुरुषस्य बहुत्वे for पुरुषबहुत्वे. 7. After एकत्वे S adds विहितो. B वसुआइ वसुआसि; S वसुआइ for वसुआइ वसुआसि. After वसुआसि K adds उद्दाइ उद्दासि; S adds उद्दासि; T adds उट्टाइ उट्टासि. 8. K इत्यादेशाः for इत्येतैः M om. तु. 9. M सिनाल् for the Sūtra.

तिङास्थि ॥ १० ॥

अस्तेर्स्तिङा तिबादिना सह अत्थि इत्यादेशो भवति । अत्थि सो । अत्थि ते । अत्थि तुमं । अत्थि तुम्हे । अत्थि अहं । अत्थि अम्हे ॥ १० ॥

णिजदेदावावे ॥ ११ ॥

धातोः प्रेरणार्थे विहितो यो णिच्प्रत्ययः, सः अत् एत् आव आवे इति चतुर आदेशानाप्नोति । तकारस्तावन्मात्रत्वप्रदर्शनार्थः । अत्—दरिसइ॥ एत्—कारेइ ॥ आव—कारावइ ॥ आवे—कारावेइ ॥ हासावइ हासइ हासावेइ हासेइ ॥ उवसमावइ उवसमेइ ॥ बहुलाधिकारात्क्वचिदेत्नास्ति । जाणइ जाणावइ जाणावेइ ॥ क्वचिदावे नास्ति । धावइ धावेइ धावावइ ॥ ११ ॥

शुष्यादेरविर्वा ॥ १२ ॥

णिजित्यनुवर्तते । शुष्यादिणिचः अविः इति वा भवति । शोषितं सोसाविअं सोसिअं ॥ तोषितं तोसाविअं तोसिअं ॥ १२ ॥

भ्रमेराडः ॥ १३ ॥

भ्रमेर्धातोः परो णिच् आड इति वा भवति । भमाडइ ॥ पक्षे । भामइ भामेइ भमावइ भमावेइ ॥ १३ ॥

लुगाविल् भावकर्मक्ते ॥ १४ ॥

भावकर्मविहिते प्रत्यये क्तप्रत्यये च परे णिच् लुक् आवि इत्यादेशावाप्नोति । लित्त्वान्न विकल्पः॥ भावकर्मणोः । कारिअइ काराविअइ कारिज्जइ काराविज्जइ । हासिअइ हासाविअइ हासिज्जइ हासाविज्जइ ॥ क्ते । कारिअं काराविअं । हासिअं हासाविअं । खामिअं खामाविअं ॥ १४ ॥

---

10. M तिङा अत्थि for the Sūtra. 11. S तावन्मात्रदर्शनार्थः for तावन्मात्रत्वप्रदर्शनार्थः. M करावेइ for कारावइ. After उवसमावइ K adds उवसमावेइ. K आणावेइ for जाणइ जाणावेइ. B थावइ थावेइ थावावइ for धावइ धावेइ. M om. धावावइ. 12. S शुष्यादिः in the Sūtra. M शुष्यादिर्णिच् for शुष्यादिणिचः. 13. MS om. भामइ भामेइ. 14. MS om. क्तप्रत्यये. MST लुकं for लुक्. KMS इत्यादेशं चाप्नोति for इत्यादेशावाप्नोति. M कारीअइ करावीअइ for कारिअइ काराविअइ. MS हसाविअइ for हासा°. S खमविअं for खामाविअं.

अदेल्लुक्यादेरत आः ॥ १५ ॥

अत् एत् लुक् इत्येतेषु णिचः स्थाने विहितेषु खोरादेरतः अकारस्य आत् आत्वं भवति । अत्—पाडइ । मारइ ॥ एत्—कारेइ । मारेइ । खामेइ ॥ लुक्—कारिअइ कारिज्जइ । खामिअइ खामिज्जइ । अदेल्लुगिति किम् । काराविअं कारिअं । काराविअइ काराविज्जइ ॥ खोरिति किम् । संगामेइ ॥ इह व्यवहितस्य मा भूत् ॥ कारिअं । इह अन्त्यस्य मा भूत् ॥ अत इति किम् । आसेइ ॥ केचित्तु आवे आवि इत्येनयोरपि आदेरत आत्वमिच्छन्ति । कारवेइ । हासाविओ जणो सामलङ्गीए ॥ १५ ॥

तु मौ ॥ १६ ॥

अत इत्यनुवर्तते आदिति च । अदन्ताद्धातोः मौ लडुत्तमपुरुषैकवचनादेशे परे सति आद्भवति तु । हसामि हसमि । जाणामि जाणमि । लिहामि लिहमि ॥ अत इत्येव । होमि ॥ १६ ॥

मोमुमस्विच्च ॥ १७ ॥

त्वित्यनुवर्तते । आकारान्ताद्धातोः मो म मु इत्येतेषु परेषु अत इत्वं चकारादात्वं च भवति तु । भणिमो भणामो । भणिम भणाम । भणिमु भणामु ॥ पक्षे । भणमो भणम भणमु ॥ 'वा लड्लोट्‌छतृषु' [२·४·२०] इत्येत्वे तु । भणेमो भणेम भणेमु ॥ अत इत्येव । होमो ॥ १७ ॥

क्ते ॥ १८ ॥

इदित्यनुवर्तते । क्तप्रत्यये परे अत इत्वं भवति । हसिअं । पढिअं नमिअं ॥ हासिअं । पाढिअं । नामिअं ॥णअं गअं इत्यादि तु सिद्धावस्थापेक्षया ॥ अत इत्येव । दूअं । हूअं ॥ १८ ॥

---

15. KMS कराविज्जइ कराविअइ for कारा°. M om. लुक्-कारिअइ; S लुक्-कारावइ कारेज्जइ. B संगामइ for संगामेइ. KMS कारावइ; T काराबेइ for कारवेइ. M दूसेइ for आसेइ. 16. M om. तु in the Sūtra. M om. परे सति. M om. तु in Com. M जाणेमि for जाणमि. 17. KS भणिमु for भणेमो भणेम भणेमु. 18. BT पसिअं for पढिअं; B पासिअं; T पसिअं for पाढिअं. B नअअं; M णाअं; T भअं for णअं.

एच्च क्त्वातुंतव्यभविष्यति ॥ १९ ॥

क्त्वातुंतव्येषु भविष्यत्कालविहिते च प्रत्यये परतः अत एत्वं चकारादित्वं च भवति । क्त्वा—हसेऊण हसिऊण ॥ तुम्—हसेउं ॥ तव्य—हसेअव्वं हसिअव्वं ॥ भविष्यत्—हसेहिइ हसिहिइ । अत इत्येव । जाऊण । काऊण ॥ १९ ॥

वा लट्लोट्छतृषु ॥ २० ॥

एदित्यनुवर्तते । लट् वर्तमानं, लोट् पञ्चमी, तयोः शतृप्रत्यये च परतः अत एत्वं वा भवति । लट्—हसेइ हसइ । हसेम हसिम ॥ लोट्—हसेउ हसउ । सुणेउ सुणउ ॥ शतृ—हसेन्तो ॥ क्वचिन्न भवति । जअइ ॥ क्वचिदात्वमपि । सुणाइ ॥ २० ॥

ज्जा ज्जे ॥ २१ ॥

ज्जा ज्ज इत्येतयोः परयोरत एत्वं भवति । हसेज्जा हसेज्ज ॥ अत इत्येव । होज्जा होज्ज ॥ २१ ॥

भूतार्थस्य सी हीअ ही ॥ २२ ॥

भूतार्थे विहितो योऽनद्यतनादिप्रत्ययः स भूतार्थः, लुङ् लङ् लिट्, तस्य स्थाने सी हीअ ही इति त्रय आदेशा भवन्ति । उत्तरत्र 'हल ईअ' (२·२·२३) इति विधानात्स्वरान्तादेवायं विधिः । कासी काहीअ काही, अकार्षीत् अकरोत् चकार वा ॥ एवं ठासी ठाहीअ ठाही ॥ २२ ॥

हल ईअ ॥ २३ ॥

भूतार्थस्येत्यनुवर्तते । हलन्ताद्धातोः परस्य भूतार्थस्य लुङादिप्रत्ययस्य ईअ इत्यादेशो भवति । भुवीअ, अभूत् अभवत् बभूव वा ॥ एवं आसीअ, आसिष्ट आस्त आसांचक्रे वा ॥ गहीअ, अग्रहीत् अगृह्णात् जग्राह वा ॥ २३ ॥

---

19. K om. काऊण. KST om. जाऊण. 20. S वर्तमाना; T वर्तमानो for °मानं. KS जलइ for जअइ. 21. S om अतः. 22. BS सि हिअ हि for सी हीअ ही in the Sūtra. K makes no distinction between short and long इ. KMS लुङादिप्रत्ययः; B अनद्यतनादिः प्रत्ययः for अनद्यतनादिप्रत्ययः. KS make no distinction between short and long इ in the verbal forms under this Sūtra. After चकार B om. वा. 23. M om. भूतार्थस्य. B हुईअ for भुवीअ. M गेण्हीअ for गहीअ.

अहेस्यासी तेनास्तेः ॥ २४ ॥

अस्तेर्धातोः तेन भूतार्थेन प्रत्ययेन सह अहेसि आसि इत्यादेशौ भवतः । अहेसि सो तुमं अहं वा । जे अहेसि, ये आसन् । एवं आसि ॥ ॥ २४ ॥

भविष्यति हिरादिः ॥ २५ ॥

भविष्यदर्थविहितप्रत्यये परतः तस्यैवादिः हि इति प्रयोक्तव्यः । होहिइ, भविष्यति भविता वा । होहिन्ति । होहिसि होहित्था । होहिम । हसिहिइ । काहिइ ॥ २५ ॥

हा सा मिमोमुमे वा ॥ २६ ॥

भविष्यतीत्यनुवर्तते आदिरिति च । भविष्यत्यर्थे उत्तमपुरुषादेशेषु परेषु तेषामेवादिः हा सा इत्येतौ वा प्रयोक्तव्यौ । पक्षे हिरपि । होहामि होस्सामि । होहामो होस्सामो । होहामु होस्सामु । होहाम होस्साम । होहिमो होहिमु होहिमि होहिम ॥ क्वचित्तु हा न भवति । हसिहिमो हसिस्सामो । हसिहिमु हसिस्सामु । हसिहिम हसिस्साम ॥ २६ ॥

हिस्सा हित्था मुमोमस्य ॥ २७ ॥

वेत्यनुवर्तते । भविष्यति काले मु मो म इत्येतेषां स्थाने हिस्सा हित्था इत्येतौ धातोः परतो वा प्रयोक्तव्यौ । होहिस्सा होहित्था ॥ पक्षे । होहिमु होहिमो होहिम ॥ क्वचित्तथा न भवति । होस्सामो इत्यादि ॥ २७ ॥

---

25. KS om. परतः; M परे for परतः. K होहिमि for होहिम. After होहिम K adds होहिमो. 26. KST हास्सा; M हा सा for हा सा in the Sūtra and Com. K भविष्यदर्थे for भविष्यत्यर्थे. K इत्येतावादेशौ for इत्येतौ. MS om. from हसिस्सामो down to हसिस्साम. 27. After होहित्था KM add हसिहिस्सा हसिहित्था. M om. क्वचित् तथा न भवति । होस्सामो इत्यादि. S om. इत्यादि.

इच्छ दशिगम इजादौ हिलुक्च वा ॥ २८ ॥

दृश् गम् इत्याभ्यां धातुभ्यां भविष्यदादिषु इच् इत्यादिषु परेषु डित् अच्छ इत्ययं वा भवति, हेश्च लुग्वा भवति। डित्त्वादन्त्याजादेर्लुक् ॥ दच्छिइ दच्छिहिइ। दच्छिन्ति दच्छिहिन्ति। दच्छिसि दच्छिहिसि। दच्छित्था दच्छिहित्था। दच्छिह दच्छिहिह। दच्छिमि दच्छिहिमि। दच्छिहामि दच्छिस्सामि। दच्छिस्सं दच्छिहिस्सं। दच्छिमो दच्छिहिमो। दच्छिहामो दच्छिस्सामो। दच्छिहिस्सा दच्छिहित्था। दच्छिम दच्छिहिम। दच्छिहाम दच्छिस्साम। दच्छिमु दच्छिहिमु। दच्छिहामु दच्छिस्सामु॥ एवं गच्छिइ गच्छिहिइ। गच्छिन्ति गच्छिहिन्ति। गच्छिसि गच्छिहिसि। गच्छित्था गच्छिहित्था। गच्छिह गच्छिहिह। गच्छिमि गच्छिहिमि। गच्छिहामि गच्छिस्सामि। गच्छिस्सं गच्छिहिस्सं। गच्छिमो गच्छिहिमो। गच्छिहामो गच्छिस्सामो। गच्छिहिस्सा गच्छिहित्था। गच्छिम गच्छिहिम। गच्छिहाम गच्छिस्साम। गच्छिमु गच्छिहिमु। गच्छिहामु गच्छिस्सामु॥ २८॥

भिदिविदिच्छिदो ऍच्छ ॥ २९ ॥

हिलुक् च वेत्यनुवर्तते, इजादाविति च। भिद् विद् छिद् इत्येतेभ्यो धातुभ्यो भविष्यदर्थेषु तिबाद्यादेशेषु परेषु डित् एच्छ इत्ययं वा भवति, हिलुक् च वा। भिदि—भेच्छिहि भेच्छिहिइ। भेच्छिन्ति भेच्छिहिन्ति। भेच्छिसि भेच्छिहिसि। भेच्छित्था भेच्छिहित्था। भेच्छिह भेच्छिहिह। भेच्छिम भेच्छिहिम। भेच्छिमि भेच्छिहिमि। भेच्छिहामि भेच्छिस्सामि। भेच्छिस्सं भेच्छिहिस्सं। भेच्छिमो भेच्छिहिमो। भेच्छिहामो भेच्छिस्सामो। भेच्छिहिस्सा भेच्छिहित्था॥ एवं मम्वोरपि॥ विदि—वेच्छिहि वेच्छिहिइ। वेच्छिन्ति वेच्छि-

---

28. KS इजादिषु परेषु for इच् इत्यादिषु परेषु. S अंत्याचादेः for अन्त्याजादेः. KS दच्छिस्सि दच्छिहिस्सि for दच्छिसि दच्छिहिसि. KMS दच्छं; T दच्छि for दच्छिहिस्सं. S दच्छिहामु for दच्छिहिमु. MST गच्छं for गच्छिहिस्सं. See under Sūtra 31 below. 29. The Mss. use ह and म promiscuously. K om. भेच्छिहिस्सं; MS भेच्छं for भेच्छिहिस्सं. KMST वेच्छं for वेच्छिहिस्सं.

हिन्ति । वेच्छिसि वेच्छिहिसि । वेच्छित्था वेच्छिहित्था । वेच्छिह वेच्छिहिह ।
वेच्छिमि वेच्छिहिमि । वेच्छिहामि वेच्छिस्सामि । वेच्छिस्सं वेच्छिहिस्सं ।
वेच्छिमो वेच्छिहिमो । वेच्छिहिमो । वेच्छिहामो वेच्छिस्सामो । वेच्छिहिस्सा
वेच्छिहित्था ॥ एवं मम्वोरपि ॥ छिदिर्—छेच्छिहि छेच्छिहिइ । छेच्छिन्ति छेच्छि-
हिन्ति । छेच्छिसि छेच्छिहिसि । छेच्छित्था छेच्छिहित्था । छेच्छिह छेच्छिहिह ।
छेच्छिम छेच्छिहिम । छेच्छिमि छेच्छिहिमि । छेच्छिहामि छेच्छिस्सामि ।
छेच्छिस्सं छेच्छिहिस्सं । छेच्छिमो छेच्छिहिमो । छेच्छिहामो छेच्छिस्सामो ।
छेच्छिहिस्सा छेच्छिहित्था ॥ एवं एम्वोरपि ॥ २९ ॥

डोच्छ वचिमुचिरुदिश्रुभुजः ॥ ३० ॥

वचि मुचि रुदि श्रु भुजि इत्येतेभ्यो धातुभ्यो भविष्यदर्थेषु तिबाद्या-
देशेषु इजादिषु परेषु डित् ओच्छ इति वा भवति, हिलुक् च वा। वचि—
वोच्छिइ वोच्छिहिइ । वोच्छिन्ति वोच्छिहिन्ति । वोच्छिसि वोच्छिहिसि ।
वोच्छित्था वोच्छिहित्था । वोच्छिह वोच्छिहिह । वोच्छिमि वोच्छिहिमि ।
वोच्छिहामि वोच्छिस्सामि । वोच्छिस्सं वोच्छिहिस्सं । वोच्छिमो वोच्छिहिमो ।
वोच्छिहामो वोच्छिस्सामो । वोच्छित्था वोच्छिहित्था ॥ एवं मम्वोरपि ॥ मुचि—
मोच्छिहि मोच्छिहिइ । मोच्छिन्ति मोच्छिहिन्ति । मोच्छिसि मोच्छिहिसि ।
मोच्छित्था मोच्छिहित्था । मोच्छिह मोच्छिहिह । मोच्छिमि मोच्छिहिमि ।
मोच्छिहामि मोच्छिस्सामि । मोच्छिस्सं मोच्छिहिस्सं । मोच्छिमो मोच्छिहिमो ।
मोच्छिहामो मोच्छिस्सामो । मोच्छित्था मोच्छिहित्था ॥ एवं मम्वोरपि ॥ रुदि—
रोच्छिहि रोच्छिहिइ । रोच्छिन्ति रोच्छिहिन्ति ॥ एवं स्सादिष्वपि ॥ श्रु—
सोच्छिहि सोच्छिहिइ । सोच्छिन्ति सोच्छिहिन्ति । सोच्छिसि सोच्छिहिसि ॥
एवमिडादिष्वपि ॥ भुजि—भोच्छिहि भोच्छिहिइ । भोच्छिन्ति भोच्छिहिन्ति ।
भोच्छिसि भोच्छिहिसि ॥ एवमिडादिष्वपि ॥ ३० ॥

KMS om. वेच्छिहिमो. KS छेच्छं for छेच्छिहिस्सं. M om. from छेच्छित्था down to the end of this Sūtra. 30. KMT वोच्छं; S ओच्छं for वोच्छिहिस्सं. KMST मोच्छं for मोच्छिहिस्सं. KMST छेच्छं for छेच्छिहिस्सं. 31. S उत्तमपुरुषादेक° for °पुरुषैक°. S om. तु. K वा for तु. M om. गच्छं गमिष्यामि.

हं मेश्छात्तः ॥ ३१ ॥

भविष्यति दृशादिभ्यो धातुभ्यः परतः पूर्वसूत्रैस्त्रिभिरुक्तानां दच्छवेच्छ-वोच्छानां यश्छकारः ततः परस्य मेः उत्तमपुरुषैकवचनादेशस्य स्थाने ङित् वं इत्यादेशस्तु भवति । दच्छं द्रक्ष्यामि । गच्छं गमिष्यामि । संगच्छं संगंस्ये । मेच्छं भेत्स्यामि । वेच्छं वेदिष्यामि । छेच्छं छेत्स्यामि । वोच्छं वक्ष्यामि । मोच्छं मोक्ष्यामि । रोच्छं रोदिष्यामि । सोच्छं श्रोष्यामि । भोच्छं भोक्ष्ये ॥ पक्षे दच्छिमि दच्छिहिमि दच्छिहामि दच्छिस्सामि दच्छिस्सं ॥ एवं गमादिष्व-प्युदाहार्यम् ॥ छात्तत इति किम् । हि हा स्सा इत्येतेभ्यः परो मा भूत् । गच्छिहिमि गच्छिहामि गच्छिस्सामि ॥ ३१ ॥

कृदो हं ॥ ३२ ॥

मेरित्यनुवर्तते । करोतेर्ददातेश्च परतो भविष्यति विहितस्य मेः स्थाने हं इति वा प्रयोक्तव्यः। काहं । दाहं ॥ पक्षे काहिमि दाहिमि इत्यादि ॥३२॥

सं ॥ ३३ ॥

धातोः परो भविष्यति काले मेः स्थाने सं इति वा भवति ॥ रित्वाद् द्वित्वम् । होस्सं हविस्सं ॥ पक्षे होहिमि होहामि होस्सामि इत्यादि ॥३३॥

त्विज्जालिङः ॥ ३४ ॥

लिङ् सप्तम्यादेशात् जा इत्यस्मात्परः इकारः तु प्रयोक्तव्यः । होज्जा होज्जाइ भवेत् ॥ वाधिकारे पुनस्तुग्रहणादुत्तरत्र न विकल्पः ॥ ३४ ॥

एकस्मिन् प्रथमादेर्विध्यादिषु दु सु मु ॥ ३५ ॥

विध्यादिषु विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु वर्तमानानां प्रथ-मादेः प्रथमादिपुरुषाणामेकत्वे वर्तमानानां प्रत्ययानां स्थाने यथासंख्यं दु सु मु इत्यादेशाः स्युः । हसउ सा । हससु तुमं । हसामु अहं । पेच्छउ पेच्छसु पेच्छामु ॥ दकारोच्चारणं भाषान्तरार्थम् ॥ ३५ ॥

---

32. M भविष्यति काले for भविष्यति. 33. M om. the Sūtra. K सए; S सस् for the Sūtra. MT सं; K सए; S स for सं. After हासिस्सं MT add कित्तइस्सं. 34. KS होज्जइ होज्जे; M होज्जइ होज्ज for होज्जा होज्जाइ.B विकल्पः for न विकल्पः.35.S एकस्तु for एकस्मिन् in the Sūtra. KM भवन्ति for स्युः. M हसउ सो for हसउ सा.

बहौ न्तु ह मो ॥ ३६ ॥

विध्यादिष्वर्थेषु विहितानां प्रथममध्यमोत्तमपुरुषाणां बहुत्वे वर्तमानानां प्रत्ययानां स्थाने यथासंख्यं न्तु ह मो इत्यादेशा भवन्ति । हसन्तु, हसन्तु हसेयुर्वा ॥ हसह, हसत हसेत वा ॥ हसामो, हसाम हसेम वा ॥ एवं तुवरन्तु तुवरह तुवरामो ॥ एवं सर्वधातुष्वप्युदाहार्यम् ॥ ३६ ॥

सोस्तु हि ॥ ३७ ॥

विध्यादिष्वर्थेषु सोर्मध्यमपुरुषैकवचनस्य स्थाने हि इत्यादेशः स्यात् तु । देहि देसु । होहि होसु ॥ ३७ ॥

लुगिज्जहीज्जस्विज्जेऽतः ॥ ३८ ॥

सोरित्यनुवर्तते त्विति च । अतः अकारात्परस्य सोः स्थाने लुक् इज्जहि इज्जसु इज्जे इति त्रयश्चादेशा भवन्ति तु ॥ हस हसिज्जइ हसिज्जसु हसिज्जे ॥ पक्षे हससु । अत इति किम् । होसु । ठाहि ॥ ३८ ॥

लड्लटोश्च जर्जारौ ॥ ३९ ॥

लड्लटोर्वर्तमानभविष्यतोश्चकाराद्विध्यादिषु च विहितस्य प्रत्ययस्य स्थाने ज जा इत्येतौ रितौ तु भवतः॥ रित्वाद् द्वित्वम् । लट्—हसेज्ज हसेज्जा । पढेज्ज पढेज्जा । सुणेज्ज सुणेज्जा ॥ पक्षे हसइ । पढइ । सुणइ ॥ लट्—पढेज्ज पढेज्जा । सुणेज्ज सुणेज्जा ॥ पक्षे पढिहिइ । सुणिहिइ ॥ विध्यादिषु--हसेज्ज हसेज्जा, हसतु हसेद्वा ॥ पक्षे हसउ ॥ एवं सर्वत्र पुरुषेषु वचनेषु च अन्येषामपि लकाराणामिच्छन्ति ॥ होज्ज होज्जा, भवति भवेत् भवतु अभवत् अभूत् बभूव भूयात् भविता भविष्यति अभविष्यद्वेत्यर्थः ॥३९॥

---

36. T om. एवं सर्वधातुष्वप्युदाहार्यम्. KMS ऊह्यम् for उदाहार्यम्. 37. KMS सेस्तु for सोस्तु in the Sūtra. KMS से: for सोः. S भवति तु for स्यात्तु. 38. K सेरित्यनुवर्तते; MS सेरिति वर्तते for सोरित्यनुवर्तते. KMS सेः for सोः. K त्रय आदेशा भवन्ति तु for त्रयश्चादेशा भवन्ति 39. M जर्जार्; S जल् जाल् for जर्जारौ in the Sūtra. KS सर्वपुरुषेषु for सर्वत्र पुरुषेषु. KM om. होज्ज होज्जा.

मध्ये चाजन्तात् ॥ ४० ॥

जर्जारावित्यनुवर्तते । अजन्ताद्धातोः प्रकृतिप्रत्यययोर्मध्ये चकारात्प्रत्ययानां च स्थाने जर् जार् इत्येतौ भवतः लड्लृटोर्विध्यादिषु च । **होज्जइ होज्जाइ** । होज्ज होज्जा । होज्जहिमि होज्जाहिमि ॥ विध्यादिषु—**होज्जइ होज्जाइ** । होज्ज होज्जा । भवतु भवेद्वा ॥ पक्षे होइ ॥ अजन्तादिति किम् । हसेज्ज हसेज्जा । तुवरिज्ज तुवरिज्जा ॥ ४० ॥

माणन्तौल् च लङः ॥ ४१ ॥

लङः क्रियातिपत्तेः यौ तिप्तौ तत्स्थाने माण न्त इत्येतौ चकारात् जर्जारौ च भवतः ॥ लित्त्वान्न विकल्पः ॥ **होमाणो होन्तो होज्ज होज्जा** । अभविष्यदित्यर्थः ॥ ४१ ॥

शतृशानचोः ॥ ४२ ॥

माणन्तौ इत्यनुवर्तते । शतृ शानच् इत्येतयोः प्रत्यययोः स्थाने **माण न्त** इत्येतौ प्रत्येकं भवतः । शतृ—हसमाणो हसन्तो । शानच्—**सहमाणो सहन्तो** ॥ ४२ ॥

स्त्रियामी च ॥ ४३ ॥

स्त्रियां वर्तमानयोः शतृशानचोः स्थाने ईत्वं चकारान्माणन्तौ च भवतः। हसई हसमाणा हसन्ती ॥ वेवई वेवमाणा वेवन्ती ॥ ४३ ॥

---

40. S जल् जाल् इत्यनुवर्तते for जर्जारावित्यनु°. After **होज्जाहिमि** KMT add होज्ज होज्जा होज्जहामि **होज्जस्सामि होज्जस्सं** होहिमि इत्यादि. KMST तुवरेज्ज तुवरेज्जा for तुवरिज्ज तुवरिज्जा. 41. B क्रियादिवृत्तेः for °तिपत्तेः. K जल्जालौ; M जर् जार् इति; S जल्जाल्; T जजार् for जर्जारौ. M om. यौ तिप्तौ तत्. M लित्त्वाद्विकल्पम्. S om. from होमाणो down to °त्यर्थः. After होन्तो M adds **हसमाण हसंत हसेज्ज हसेज्जा अहसिष्यत्**. 42. KST शतृशानचः for **the** Sūtra. KS om. Com. on this Sūtra. 43. KS om. the Sūtra and स्त्रियां in Com.

घेत् तुंतव्यक्त्वासु ग्रहेः ॥ ४४ ॥

तुंतव्यक्त्वाप्रत्ययेषु परतो ग्रहेर्धातोर्घेत् इति भवति। तुम्—घेत्तुं ॥ तव्य—घेत्तव्वं ॥ क्त्वा—घेत्तुआण घेत्तूण ॥ क्वचिन्न भवति। गहिउं। गेण्हिअ ॥ ४४ ॥

अन्त्यस्य वचिमुचिरुदिश्रुभुजां डोत् ॥ ४५ ॥

तुंतव्यक्त्वास्वित्यनुवर्तते। वचि मुचि रुदि श्रु भुजि इत्येतेषां धातूनामन्त्यस्य तुंतव्यक्त्वाप्रत्ययेषु ओत् इत्यादेशो डित् भवति ॥ वचि—वोत्तुं। वोत्तव्वं। वोत्तुआण वोत्तूण ॥ मुचि—मोत्तुं। मोत्तव्वं। मोत्तुआण। मोत्तूण ॥ रुदि—रोत्तुं। रोत्तव्वं। रोत्तुआण रोत्तूण ॥ श्रु—सोत्तुं। सोत्तव्वं। सोत्तुआण सोत्तूण ॥ भुजि—भोत्तुं। भोत्तव्वं। भोत्तुआण भोत्तूण ॥ ४५ ॥

ता ट्ठो दृशः ॥ ४६ ॥

अन्त्यस्येत्यनुवर्तते। दृशो धातोरन्त्यस्य तुंतव्यक्त्वासु परतः तेषामेव प्रत्ययानामादिना तकारेण सह द्विरुक्तष्ठकारो भवति दट्ठुं। दट्ठव्वं। दट्ठुआण दट्ठूण ॥ ४६ ॥

आ भूतभविष्यति च कृञः ॥ ४७ ॥

कृञोऽन्त्यस्य आ इत्यादेशो भवति भूतभविष्यत्प्रत्यये, चकारात् तुंतव्यक्त्वासु च परतः। काहीअ, अकार्षीत् अकरोत् चकार वा ॥ काहिइ, करिष्यति कर्ता वा ॥ तुम्—काउं ॥ तव्य—काअव्वं ॥ क्त्वा—काउआण काऊण ॥ ४७ ॥

---

44. T गृह्धिधातुः for ग्रहेर्धातोः. MS वा भवति for भवति. T घेत्ताण for घेत्तूण. M om. गहिउं. S गिह्हिउं for गहिउं. KMS om. गेण्हिअ; T गण्हिअ. 45. MS °क्त्वा इत्यनुवर्तते for °क्त्वास्वित्यनु°. After प्रत्ययेषु M adds परेषु. B om. from श्रु down to सोत्तूण. 46. T ठा for ट्ठो in the Sūtra. KM दृशेर्धातोः for दृशो धातोः. 47. KS काहि for काहीअ.

नमोद्विजरुदां वः ॥ ४८ ॥

नमतेः उद्विजतेः रुदेश्च अन्त्यस्य वकारो भवति । णवइ । उव्विवइ उव्वेइ । रुवइ रोवइ ॥ ४८ ॥

चर् नृतिमदिव्रजाम् ॥ ४९ ॥

नृत मद व्रज इत्येतेषां धातूनामन्त्यस्य चकारो भवति ॥ रित्वाद् द्वित्वम् ॥ णच्चइ । मच्चइ । वच्चइ ॥ ४९ ॥

छर् गमिष्यमासाम् ॥ ५० ॥

गम इष यम आस इत्येतेषामन्त्यस्य छो भवति ॥ रित्वाद् द्वित्वम् ॥ गच्छइ । इच्छइ । जच्छइ । अच्छइ ॥ ५० ॥

रुधो न्धम्भौ ॥ ५१ ॥

रुधेरन्त्यस्य न्ध म्भ इत्येतौ भवतः । रुन्धइ । रुम्भइ ॥ ५१ ॥

युधबुधगृधक्रुधसिधमुहां च ज्झः ॥ ५२ ॥

युध बुध गृध क्रुध सिध मुह इत्येतेषां चकाराद्रुधेश्चान्त्यस्य द्विरुक्तो झकारो भवति । जुज्झइ । बुज्झइ । गिज्झइ । कुज्झइ । सिज्झइ । मुज्झइ । रुज्झइ ॥ ५२ ॥

जर् स्विदाम् ॥ ५३ ॥

स्विदिप्रकाराणां धातूनामन्त्यस्य जो भवति ॥ रित्वाद् द्वित्वम् ॥ सिज्जइ ॥ सव्वङ्गसिरीए संपज्जइ, सर्वाङ्गश्रिया संपद्यते ॥ खिज्जइ ॥ बहुवचनं प्रयोगानुसरणार्थम् ॥ ५३ ॥

---

48. MT रोदितेः; S रुदितेः for रुदेः. T उप्पिइ उप्पेओ for उव्विवइ उव्वेइ. KS रवइ for रुवइ. 49. MT चर् नृतमदव्रजां for the Sūtra. S चल् for चर् in the Sūtra. M चकारो रिद् भवति for चकारो भवति. M om. रित्वाद् द्वित्वम्. 50. S छल्; T छरि for छर् in the Sūtra. T इत्येषां for इत्येतेषां. After इत्येतेषां K adds धातूनाम्. M छकारो रिद् भवति for छो भवति. M om. रित्वाद् द्वित्वम्. KT यच्छइ for जच्छइ. 51. S रुदो न्तो for the Sūtra. 52. T₁ प्रध for गृध in the Sūtra. T₂ द्रुहां for °मुहां in the Sūtra and Com. M झर् for ज्झः in the Sūtra. M झो for झकारो. 53. T जरि स्विदां for the Sūtra. S जल् for जर् in the Sūtra. M जो रिद् भवति for जो भवति. M om. रित्वाद् द्वित्वम्. K सव्वंगसिरिए for °सिरीए.

छिदिभिदो न्दः ॥ ५४ ॥

छिदिभिदोरन्त्यस्य न्द इत्यादेशो भवति । छिन्दइ । भिन्दइ ॥५४॥

ढः कथिवर्धाम् ॥ ५५ ॥

कथतेर्वर्धतेश्चान्त्यस्य ढत्वं भवति । कढइ । वड्ढइ ॥ बहुवचनाद् वृधेः कृतगुणस्य वर्धेश्चाविशेषेण ग्रहणम् ॥ ५५ ॥

वेष्टेः ॥ ५६ ॥

ढ इति वर्तते । वेष्ट वेष्टने इत्यस्य धातोः 'कगटड' [१·४·७७] इत्यादिना षलोपे टस्य ढो भवति । वेढइ । वेढिज्जइ ॥ ५६ ॥

समुदो लर् ॥ ५७ ॥

सम् उद् इत्युपसर्गाभ्यां परस्य वेष्टेरन्त्यस्य ल्कारो रित् भवति । संवेल्लइ । उव्वेल्लइ ॥ बहुलाधिकारादुतः परस्यापि वा ढः । उव्वेल्लइ ॥ उव्वेढइ ॥ ५७ ॥

खादधावि लुक् ॥ ५८ ॥

खादतौ धावतौ चान्त्यस्य लुग्भवति । खाइ खाअइ ॥ खाओ खाइओ॥ धाइ धाअइ ॥ धाओ धाइओ ॥ बहुलाधिकाराद्वर्तमानभविष्यद्विध्याद्येकवचन एव भवति । तेनेह न भवति । खादन्ति । धावन्ति ॥ क्वचित् 'धावइ पुरओ' इति च दृश्यते ॥ ५८ ॥

---

54. MT ड: for न्दः in the Sūtra. and Com. 55. M ढर् कृषिवर्ध्योः; T ढः कथवर्धाम् for the Sūtra. S ठः for ढः in the Sūtra and Com. KM कड्ढइ for कढइ. M अविशेषग्रहणं for अविशेषेण ग्रहणम्. 56. S ठ इति for ढ इति. M अन्त्यस्य for टस्य. S वेडइ for वेढइ. 57. M रत्; S ल्ल् for लर् in the Sūtra. MS लिद् for रिद्. S om. वा. S डः for ढः. 58. M खादधाव्योर्लुक् for the Sūtra. M खादतेर्धावतेश्च for खादतौ धावतौ च. K om. खाइओ. After खाअइ MT add खाहिइ खाउ. After धाअइ MT add धाहिइ धाउ. MT क्वचित्तु for क्वचित्.

रः सृजि ॥ ५९ ॥

सृजिधातावन्त्यस्य रत्वं भवति । विसरइ । ओसरइ । ओसरामि ॥ ॥ ५९ ॥

डः सीदपति ॥ ६० ॥

सीदतौ पततौ च अन्त्यस्य डत्वं भवति । सडइ पडइ ॥ ६० ॥

मीलेः प्रादेर्द्वे तु ॥ ६१ ॥

प्रादेरुपसर्गात्परस्य मीलेरन्त्यस्य द्वे रूपे तु भवतः । पमिल्लइ। पमीलइ। निमिल्लइ निमीलइ । संमिल्लइ । संमीलइ । उम्मिल्लइ उम्मीलइ ॥ प्रादेरिति किम् । मीलइ ॥ ६१ ॥

चलस्फुटे ॥ ६२ ॥

द्वे इत्यनुवर्तते । चलतौ स्फुटतौ च अन्त्यस्य द्वे रूपे तु भवतः। चल्लइ चलइ । फुट्टइ फुडइ ॥ ६२ ॥

शकगे ॥ ६३ ॥

शकादिषु धातुष्वन्त्यस्य द्वे रूपे भवतः ॥ योगविभागान्नित्यम् ॥ शक—सक्कइ । मग—मग्गइ । लग—लग्गइ । सिच—सिच्चइ । अट—अट्टइ । लुट—लुट्टइ । त्रुट—तुट्टइ । कुप—कुप्पइ । जिम—जिम्मइ । णश—णस्सइ । इत्यादि ॥ ६३ ॥

---

59. T नीसरइ वोसरइ वोसिरामि for विसरइ ओसरइ ओसिरामि. 60. M डः सदपति for the Sūtra. M सीदतेः पततेश्च for सीदतौ पततौ च. 61. S मिलेः for मीलेः in the Sūtra, Com. and illustrations. T om. तु in the Sūtra. M पमलइ for पमिल्लइ. M om. संमिल्लइ संमीलइ. 62. MST चलस्फुटि for the Sūtra. M द्वेतिवर्तते for द्वे इत्यनुवर्तते. M द्वित्वं भवति for द्वे रूपे भवतः. B स्फुटितौ for स्फुटतौ. BM फुड्इ for फुट्टइ. 63. M द्वित्वं भवति द्वे for रूपे भवतः. KS तस तस्सइ for णश-णस्सइ. S वच वंचइ for सिच सिञ्चइ. T कुट-कुट्टइ for त्रुट तुट्टइ. T जम-जम्मइ for जिम जिम्मइ.

उवर्णस्यावः ॥ ६४ ॥

धातोरन्त्यस्य उवर्णस्य अव इत्यादेशो भवति । ह्नु—निन्हवइ । च्यु—चवइ । रु—रवइ । कु—कवइ । सु—सवइ । पसवइ ॥ ६४ ॥

य्वोरेङ् ॥ ६५ ॥

इश्च उश्च युः तस्य। तयोर्धात्वोरिवर्णोवर्णयोः एङ् एदोतौ यथासंख्यं भवतः । इवर्णस्य एकारः, उवर्णस्य ओकारः। जेऊण जित्वा । नेऊण नीत्वा। नेइ नयति । उड्डेइ उड्डयति । सोऊण श्रुत्वा ॥ कचिन्न भवति । नीओ । उड्डीणो ॥ ६५ ॥

अर उः ॥ ६६ ॥

ऋवर्णस्य धातोरन्त्यस्य अर इत्यादेशो भवति । करइ । धरइ । वरइ । सरइ । भरइ । मरइ । तरइ । जरइ ॥ ६६ ॥

अरि वृषाम् ॥ ६७॥

वृषप्रकाराणा धातूनामृवर्णस्य अरि इत्यादेशो भवति । वृष—वरिसइ॥ मृष—मरिसइ ॥ कृष- करिसइ ॥ हृष—हरिसइ ॥ बहुवचनं प्रयोगानुसरणार्थम ॥ ६७ ॥

रुषगेऽचो दिः ॥ ६८ ॥

रुषादिधातुष्वचो दीर्घो भवति । रुष—रूसइ ॥ शुष—सूसइ ॥ दुष—दूसइ ॥ तुष—तूसइ ॥ पुष—पूसइ ॥ शिष—सीसइ ॥ इत्यादि ॥ ६८ ॥

---

64. T उवर्णस्य वा for the Sūtra. 65. M योरेदोत् for the Sūtra. M om. एङ्. M om इवर्णस्य एकारः, उवर्णस्य ओकारः. T ओ for ओकारः. S चेऊग चेत्वा for जेऊग जित्वा. T नेंति उड्डेंति for नयति उड्डयति. 66. T अर इ. for the Sūtra. T रीवर्णस्य for ऋवर्णस्य. 68. MS रुषगे दिः; T रुषगे चोदितः for the Sūtra. K दिर्दीर्घो for दीर्घो.

हलोऽक् ॥ ६९ ॥

हलन्ताद्धातोः परः अगागमो भवति ॥ ककारोऽन्तविध्यर्थः ॥ हसइ । भमइ । रमइ । गच्छइ । मुज्जइ । उवसमइ । पावइ । सिञ्चइ । रुन्धइ । मुसइ । वहइ । सहइ ॥ शसूप्रभृतीनां प्रायः प्रयोगो न भवति ॥ ६९ ॥

त्वनतः ॥ ७० ॥

अगिति वर्तते । अकारान्तवर्जिताद्धातोः परः अगागमो भवति तु । पाअइ पाइ । ठाअइ ठाइ । वाअइ वाइ । धाअइ धाइ । जाअइ जाइ । झाअइ झाइ । भाअइ भाइ, बिभेति भाति वा । जम्भाअइ जम्भाइ, जम्भते । उव्वाअइ उव्वाइ, उद्वाति । मिलाअइ मिलाइ, म्लायते । विक्केअइ विक्केइ, विक्रीणीते ॥ अनत इति किम् । चिइच्छइ चिकित्सते ॥ ७० ॥

अचोऽचाम् ॥ ७१ ॥

धातुषु अचां स्थाने अचो बहुलं भवन्ति । हवइ हिवइ । चिणइ चुणइ । सद्दहणं सद्दहाणं । धावइ धुवइ । रुवइ रोवइ ॥ कचिन्नित्यम् । जेइ । चेइ । देइ । लेइ । विहेइ । नासइ ॥ ७१ ॥

णो ह्रश्च चिजिपूश्रुधूस्तुहुलूभ्यः ॥ ७२ ॥

चि जि पू श्रु धू स्तु हु लू इत्येतेभ्यः परो ण इत्यागमो भवति, तत्संनियोगेन ह्रश्च, दीर्घस्य च ह्रस्वः । चिणइ । जिणइ । पुणइ । सुणइ । धुणइ । थुणइ । हुणइ । लुणइ ॥ बहुलाधिकारात् कचिद्विकल्पः ॥ उच्चेणइ उच्चेइ । जिणिऊण जेऊण । जिणइ जेणइ । सुणिऊण सोऊण ॥ ७२ ॥

---

69. S om. भुज्जइ. T भवइ for वहइ. 70. MT अकारान्तवर्जितादजन्ताद्धातोः for °वर्जिताद्धातोः. S om. तु T om. ठाअइ ठाइ. K काअइ काइ for झाअइ झाइ. KS विक्कोअइ विक्कोइ for विक्केअइ विक्केइ. T om. from अनत इति down to स्थाने under the next Sūtra. After चिइच्छइ M adds जुउच्छइ. M om. चिकित्सते. 71. BS धवइ for धावइ. ST om. जेइ चेइ. T om. नासइ. K देहि लेहि for देइ लेइ. 72. MT इत्येभ्यः for इत्येतेभ्यः. ST °संनियोगे for °योगेन. M उच्चिणइ for उच्चेणइ. T om. from पुणइ down to जेणइ. K अणइ for जेणइ. S om. from थुणइ down to the end of the Sūtra.

भावकर्मणि तु वर्यग्लुक् च ॥ ७३ ॥

भावे कर्मणि च वर्तमानेभ्यः चिजिपूश्रुधूस्तुडुल्भ्यः परो वकारागमो भवति तु । तत्संनियोगेन यक्प्रत्ययस्य लुक् ॥ रित्वाद् द्वित्वम् ॥ चिव्वइ चिणिज्जइ । जिव्वइ जिणिज्जइ । पुव्वइ पुणिज्जइ । सुव्वइ सुणिज्जइ । धुव्वइ धुणिज्जइ । एवं भविष्यति चिव्वहिइ चिणिज्जहिइ । इत्यादि ॥७३॥

मश्चेः ॥ ७४ ॥

भावकर्मणीत्यनुवर्तते । चिनोतेः परो भावकर्मणि मागमो रिद् भवति । तत्संनियोगेन यग्लुक् च । चिम्मइ । पक्षे चिव्वइ चिणिज्जइ ॥ भविष्यति— चिम्महिइ, चिव्वहिइ, चिणिज्जहिइ ॥ ७४ ॥

अन्त्यस्य हनखनोः ॥ ७५ ॥

मरिति वर्तते । हन खन इत्येतयोः अन्त्यस्य भावकर्मणि मागमो रिद् भवति तु ।तत्संनियोगेन यग्लुक् च । हम्मइ हणिज्जइ । खम्मइ खणिज्जइ॥ भविष्यति—हम्मिहिइ हणिज्जहिइ । खम्मिहिइ खणिज्जहिइ ॥बहुलाधिकारात् हन्तेः कर्तर्यपि । हम्मइ, हन्तीत्यर्थः॥ क्वचिन्न भवति । हन्तव्वं । हन्तूण । हओ ॥७५॥

दुहलिहवहरुहां भरत उच्च ॥ ७६ ॥

दुह लिह वह रुह इत्येषामन्त्यस्य भकारो रिद् भवति तु । तत्संनियोगेन यग्लुक् च । वहेरतः उकारश्च । दुब्भइ दुहिज्जइ । लिब्भइ लिहिज्जइ । वब्भइ वहिज्जइ । रुब्भइ रुहिज्जइ ॥ भविष्यति—दुब्भिहिइ दुहिज्जहिइ । इत्यादि ॥ ७६ ॥

---

73. S om. the Sūtra. K वर्माबकर्मणि तु यग्लुक्; M वर्भावकर्मणि यग्लुक् च for the Sūtra. T यत् लुक् for यग्लुक् in the Sūtra and Com. here and elsewhere under the following Sūtras upto Sūtra 90. S om. भावे. K om. च. M om. from तत्संनियोगे down to पुणिज्जइ. T तत्संनियो for तत्संनियोगेन. 74. T मञ्चोः for the Sūtra. MST तत्संनियोगे for °योगेन under this Sūtra and elsewhere up to Sūtra 82. KMS चिम्मिहिइ; T चिब्भिहइ for चिम्महिइ. KM om. चिव्वहिइ. 75. K अनुवर्तते for वर्तते. MS om. रिद्. After भवति तु K adds रित्वाद् द्वित्वम्. 76. M हर् for भर् in the Sūtra. KMS वहतेः for वहेः. K उकारश्च for उकारश्च.

दहेर्झर् ॥ ७७ ॥

अन्त्यस्येत्यनुवर्तते । दहेरन्त्यस्य भावकर्मणि झकारो रिद् भवति तु । तत्संनियोगेन यग्लुक् च । डज्झइ डहिज्जइ ॥ भविष्यति—डज्झिहिइ डहिज्जहिइ ॥ ७७ ॥

बन्धो न्धः ॥ ७८ ॥

झरित्यनुवर्तते । बन्धेर्धातोः न्ध इत्यस्य भावकर्मणि झर् इत्यादेशो भवति तु । तत्संनियोगेन यग्लुक् च । बज्झइ बन्धिज्जइ ॥ भविष्यति--बन्धिहिइ बन्धिज्जहिइ ॥ ७८ ॥

रुध उपसमनोः ॥ ७९ ॥

उप सम् अनु इत्येतेभ्यः परस्य रुन्धेरन्त्यस्य भावकर्मणि झर् भवति तु । तत्संनियोगेन यग्लुक् च । उवरुज्झइ । संरुज्झइ । अणुरुज्झइ ॥ पक्षे उवरुन्धिज्जइ । संरुन्धिज्जइ । अणुरुन्धिज्जइ ॥ भविष्यति—उवरुज्झहिइ । संरुज्झहिइ । इत्यादि ॥ ७९ ॥

द्वे गमिगे ॥ ८० ॥

गमादौ धातोरन्त्यस्य भावकर्मणि द्वे रूपे भवतः । तत्संनियोगेन यक्प्रत्ययस्य लुक् च । गम—गम्मइ गमिज्जइ ॥ हस—हस्सइ हसिज्जइ ॥ भण—भण्णइ भणिज्जइ ॥ लुभ—लुब्भइ लुभिज्जइ ॥ कथ—कत्थइ कहिज्जइ ॥ कुप—कुप्पइ कुविज्जइ ॥ भुज—भुज्जइ भुजिज्जइ ॥ रुद—रुव्वइ रुविज्जइ ॥ 'नमोद्विजरुदाम्' [२·४·४८] इति कृतवकारादेशो रुदिरत्र पठ्यते ॥ भविष्यति—गम्मिहिइ गच्छिज्जहिइ । इत्यादि ॥ ८० ॥

---

77. S झल् for झर् in the Sūtra. 78. KMS झरिति भवति for झर् इत्यादेशो भवति. K बज्झिहिइ बंधिज्जिहिइ for बन्धिहिइ बन्धिज्जहिइ. 79. KM रुधेः. for रुन्धेः.K उवरुज्झिहिइ for उवरुज्झहिइ. KS om. संरुज्झहिइ. 80. KS om. लुब्भ इ लुभिज्जइ. M लुभइ for लुब्भइ. BK om. पठ्यते.

ईर हृकृतॄज्ञाम् ॥ ८१ ॥

हृञ् कृञ् तॄ ज़ॄ इत्येतेषामन्त्यस्य भावकर्मणि ईर इत्यादेशो भवति तु । तत्संनियोगेन यग्लुक् च । हीरइ हरिज्जइ । कीरइ करिज्जइ । तीरइ तरिज्जइ । जीरइ जरिज्जइ ॥ ८१ ॥

अर्जेर्विढप्पः ॥ ८२ ॥

अन्त्यस्येति निवृत्तम् । अर्जेर्विढप्प इत्यादेशो भावकर्मणि भवति तु । तत्संनियोगेन यग्लुक् च । विढप्पइ । पक्षे अज्जिज्जइ विढप्पिज्जइ ॥ ८२ ॥

आरभ आढप्पः ॥ ८३ ॥

आरभतेर्भावकर्मणि आढप्प इत्यादेशो भवति तु, यग्लुक् च । आढप्पइ । पक्षे आरभिज्जइ आढप्पिज्जइ ॥ ८३ ॥

णप्पणज्जौ ज्ञः ॥ ८४ ॥

जानातेर्भावकर्मणि णप्प णज्ज इत्यादेशौ तु भवत, यग्लुक् च । णप्पइ । णज्जइ ॥ पक्षे जाणिज्जइ । मुणिज्जइ ॥ 'ज्ञम्नोः' [१·४·३७] इति णत्वे णाज्जइ ॥ नञ्पूर्वस्य अणाइज्जइ ॥ ८४ ॥

सिप्पः सिचस्निहोः ॥ ८५ ॥

सिञ्चतेः स्निह्यतेश्च भावकर्मणि सिप्प इत्यादेशो भवति तु, यग्लुक् च । सिप्पइ सिच्यते स्निह्यते वा ॥ पक्षे सिञ्चिज्जइ । णेहिज्जइ ॥ ८५ ॥

वाहिप्पो व्याहृः ॥ ८६ ॥

व्याहरतेर्भावकर्मणि वाहिप्प इत्यादेशो भवति तु, यग्लुक् च । वाहिप्पइ ॥ पक्षे वाहरिज्जइ ॥ ८६ ॥

---

81. K हृञ्कृञ् for हृकृ in the Sūtra. S हिरज्जइ for हरिज्जइ. K जिरिज्जइ for जरिज्जइ. 82. BK विडप्पः for विढप्पः in the Sūtra. T om. विढप्पिज्जइ. K विडविज्जइ for विढप्पिज्जइ. 83. MS आडप्पः for आढप्पः in the Sūtra and Com. KS आरम्भेः for आरभतेः. T आरंभिज्जइ आढविज्जइ for आरभिज्जइ आढप्पिज्जइ. 84. T om. तु. T जणिज्जइ for मुणिज्जइ. 85. M om. the Sūtra and Com., but gives illustrations. KMST om. पक्षे सिञ्चिज्जइ णेहिज्जइ. B णिहुहिज्जइ for णेहिज्जइ 86. KS वाहिप्पिज्जइ for पक्षे वाहरिज्जइ T om. पक्षे.

ग्रहेर्घेप्पः ॥ ८७ ॥

ग्रहेर्भावकर्मणि घेप्प इत्यादेशो भवति तु, यग्लुक् च । घेप्पइ ॥ पक्षे गेण्हिज्जइ ॥ ८७ ॥

छिप्पः स्पृशतेः ॥ ८८ ॥

स्पृशतेर्भावकर्मणि छिप्प इत्यादेशो भवति तु, यग्लुक् च । छिप्पइ ॥ पक्षे छिविज्जइ ॥ ८८ ॥

दीसल् दृशेः ॥ ८९ ॥

दृशेर्भावकर्मणि दीस इत्यादेशो लिद् भवति, यग्लुक् च । दीसइ ॥ ॥ ८९ ॥

वचेरुञ्चः ॥ ९० ॥

वचेर्भावकर्मणि उञ्च इत्यादेशो भवति तु, यग्लुक् च । उच्चइ ॥ पक्षे वइज्जइ ॥ ९० ॥

ईअइज्जौ यक् ॥ ९१ ॥

अपवादनिमित्तोऽयं विधिः । भावकर्मणि विहितो यो यक्प्रत्ययः स ईअ इज्ज इत्यादेशावापद्यते । हसीअइ हसिज्जइ । हसीअन्तो हसिज्जन्तो । हसीअमाणो हसिज्जमाणो ॥ पढीअइ पढिज्जइ । होईअइ होइज्जइ ॥ बहुलाधिकारात् क्वचिद् यगपि विकल्पेन भवति । तेण लहिज्ज । तेण लहिज्जेज्ज ॥ मए णवेज्ज । मए णविज्जेज्ज ॥ तेण अच्छिज्ज । तेण अच्छिज्जेज्ज । तेण अच्छीअइ ॥ ९१ ॥

---

87. KST om. पक्षे. 88. T चिप्पः for छिप्पः in the Sūtra, Com.and illustrations. KS om. पक्षे. KMS छिप्पिज्जइ for छिविज्जइ. 90. K पचेरुर्वञ्चं; M पचेः पुंचः; S पचेल् श्रंचः; T वचेर्वुञ्च for the Sūtra. KMS पचतेः for वचेः. K उञ्च; M पुंच; T वुञ्च for उञ्च. K उच्चइ; M पुंचइ; T वुञ्चइ for उञ्चइ. KMST om. पक्षे वइज्जइ. 91. Bp इअइज्जौ यक्; M ईयज्जौ यक् for the Sūtra. Bp KS अपवादनिर्मुक्तः; M °वादविर्निर्मुक्तः for अपवादनिमित्तः. B पटीअइ पटिज्जइ; K पढिअइ पढिज्जइ for पढीअइ पढिज्जइ. K om. मए णवेज्ज.

स्पृहद्रुओः सिहदूमौ णिचोः ॥ ९२ ॥

णिजन्तयोः स्पृहद्रुओ धात्वोः सिह दूम इत्यादेशौ यथासंख्यं भवतः । सिहइ । दूमइ ॥ ९२ ॥

निवृपतोर्णिहोडो वा ॥ ९३ ॥

णिचोरित्यनुवर्तते । निपूर्वस्य वृञः पतेश्च धात्वोर्णिजन्तयोः स्थाने णिहोड इत्यादेशो वा भवति । णिहोडइ निवारयति पातयति वा । पक्षे णिवारेइ । पाडेइ ॥ ९३ ॥

धवलोद्घटोर्दुमोग्गौ ॥ ९४ ॥

वेत्यनुवर्तते । धवलयतेरुत्पूर्वस्य घटयतेश्च णिजन्तयोर्दुम उग्ग इत्यादेशौ यथासंख्यं भवतो वा । दुमइ । उग्गइ ॥ पक्षे धवलेइ । उग्घाडेइ ॥ 'अचोऽचाम्' [२·४·७१] इति दुमोऽत्वे दमिअं धवलिअं ॥ ९४ ॥

भ्रमवेष्टयोस्तालिअण्टपरिआलौ ॥ ९५ ॥

भ्रमयतिवेष्टयत्योर्णिजन्तयोः तालिअण्ट परिआल इत्येतौ यथासंख्यं वा भवतः । तालिअण्टइ ॥ पक्षे भमाडइ । भमाडेइ । भामइ । भामावइ । भामावेइ ॥ वेष्टेः—परिआलइ ॥ पक्षे । वेढइ ॥ ९५ ॥

रावो रञ्जयतेः ॥ ९६ ॥

रञ्जयतेर्णिजन्तस्य राव इत्यादेशो वा भवति । रावेइ । पक्षे रञ्जेइ ॥९६॥

---

92. Bp स्पृहधूञोः; M स्पृहदशोः in the Sūtra, Com. and illustrations; T स्पृहदशोः in the Sūtra and Com. for स्पृहद्रुओः in the Sūtra. S धूमेइ for दूमइ. 93. M निवृञ्धोर्निवो धो वा for the Sūtra. 94. MS वा भवतः यथासंख्यं for यथासंख्यं वा भवतः. S om. from दुमइ down to the end of the Sūtra. M दुम्मइ; T दुग्गइ for दुमइ. T दुमेरित्वे for दुमोऽत्वे. T उद्दूमिअं for दमिअं. 95. S om. the Sūtra. KM इत्यादेशौ for इत्येतौ. T भमडेइ for भमाडेइ. KT भमावइ भमावेइ for भामावइ भामावेइ. K वरिआलइ वरिआलइ वेडेइ for परिआलइ॥ पक्षे वेढइ. 96. T om. वा. MST om. पक्षे.

तुलिडोल्योरोहामरवखोलौ ॥ ९७ ॥

णिजन्तयोः तुलयतिदोलयत्योश्च नामधात्वोर्यथासंख्यम् ओहाम रवखोल इत्येतौ वा भवतः । ओहामइ । रवखोलइ । पक्षे तुलइ ॥ डोलइ ॥ ९७ ॥

आसंघः संभावेः ॥ ९८ ॥

संभावयतेर्णिजन्तस्य आसंघ इति वा भवति । आसंघइ ॥ पक्षे संभावेइ, संभावयति ॥ ९८ ॥

अर्पेरल्लिवपणामचच्चुप्पाः ॥ ९९ ॥

णिजन्तस्यार्पयतेः अल्लिव पणाम चच्चुप्प इति त्रय आदेशा वा भवन्ति । अल्लिवइ । पणामइ । चच्चुप्पइ ॥ पक्षे अप्पेइ ओप्पेइ ॥ ९९ ॥

गुलुगुच्छोत्थङ्घोव्वेल्लोल्लाला उन्नमेः ॥ १०० ॥

णिजन्तस्य नमेरुत्पूर्वस्य गुलुगुच्छ उत्थङ्घ उव्वेल्ल उल्लाल इति चत्वार आदेशा भवन्ति तु । गुलुगुच्छइ । उत्थङ्घइ उव्वेल्लइ उल्लालइ ॥ पक्षे उण्णवेइ ॥ १०० ॥

प्रकाशेर्णुव्वः ॥ १०१ ॥

णिजन्तस्य प्रकाशेर्णुव्व इति वा भवति । णुव्वइ ॥ पक्षे पआसेइ ॥ ॥ १०१ ॥

णिहुवः कमेः ॥ १०२ ॥

कमेः स्वार्थे णिजन्तस्य णिहुव इत्यादेशो वा भवति । णिहुवइ ॥ पक्षे कामेइ ॥ १०२ ॥

---

97. M तुलिदोलो°; S तुरिदोलो°; T₁ तुलिरोलो°; T₂ तुलिलोरो° for तुलिडोल्यो° in the Sūtra. M तुलयतेदोलयतेश्च for तुलयतिदोलयत्योश्च. S om. पक्षे तुलइ. T तोलइ for डोलइ. 98. K इत्यादेशो वा; M इत्यादेशो for इति वा. K om. संभावेइ; MS om. पक्षे संभावेइ. 99. MT₂ °चुञ्चुप्पाः for चच्चुप्पाः in the Sūtra and Com. S °चंचप्पाः; T₁ °चंचुप्पाः in the Sūtra. M om. वा. 100. S गुलुगुंद°; T₁ गुलगुंच° for गुलुगुच्छ° in the Sūtra. K नमयतेः for नमेः. M om. तु. KS उन्नावइ; T उन्नामइ for उण्णवेइ. 101. T णुप्पः for णुव्वः in the Sūtra and Com. ST om. पक्षे. 102. M भुवः कमेः; T₁ णिभुवः कामे for the Sūtra. T₂ कामेः for कमेः in the Sūtra. MS om. पक्षे. T कमेइ for कामेइ.

नशेर्विप्पगालनासवपलावहारवविउडाः ॥ १०३ ॥

नाशयतेर्णिजन्तस्य विप्पगाल नासव पलाव हारव विउड इति पञ्चादेशा वा भवन्ति। विप्पगालइ। नासवइ। पलावइ। हारवइ। विउडइ॥ पक्षे णासेइ ॥ १०३ ॥

वल आरोपे ॥ १०४ ॥

णिजन्तस्यारोपेर्वल इत्यादेशो वा भवति। वलइ ॥ पक्षे आरोवेइ ॥ ॥ १०४ ॥

विरेचेरोल्लुङ्डोल्लुङ्डपल्लत्थाः ॥ १०५ ॥

विरेचयतेर्णिजन्तस्य ओल्लुङ्ड उल्लुङ्ड पल्लत्थ इति त्रय आदेशा वा भवन्ति। ओल्लुङ्डइ। उल्लुङ्डइ। पल्लत्थइ ॥ पक्षे विरेअइ ॥ १०५ ॥

कम्पेर्विच्छोलः ॥ १०६ ॥

कम्पयतेर्णिजन्तस्य विच्छोल इति वा भवति। विच्छोलइ ॥ पक्षे कम्पेइ ॥ १०६ ॥

रोमन्थेरोग्गालवग्गालौ ॥ १०७ ॥

रोमन्थेर्नामधातोर्णिजन्तस्य ओग्गाल वग्गाल इत्यादेशौ वा भवतः। ओग्गालइ। वग्गालइ ॥ पक्षे रोमन्थइ ॥ १०७ ॥

प्लावेरोव्वालपव्वालौ ॥ १०८ ॥

प्लावयतेर्णिजन्तस्य ओव्वाल पव्वाल इत्यादेशौ वा भवतः। ओव्वालइ। पव्वालइ ॥ पक्षे पाविइ ॥ १०८ ॥

---

103. T om. पक्षे. 104. S आलोपे; T आलोपो for आरोपेः in the Sūtra. S आलोपेः for आरोपेः. KMT om. पक्षे. M om. आरोवेइ. 105. M om. the Sūtra and Com. upto णिजन्तस्य. T ओल्लुंडोल्लुंड° in the Sūtra and Com. T om. पक्षे. 107. MS om. पक्षे. T om. पक्षे. T om. पक्षे रोमन्थेइ. 108. S प्लावेः; T प्लवयतेः for प्लावयतेः. ST om. पक्षे.

मिश्रेर्मीसालमेलवौ ॥ १०९ ॥

मिश्रयतेर्णिजन्तस्य मीसाल मेलव इत्यादेशौ वा भवतः । मीसालइ । मेलवइ ॥ पक्षे मीसेइ ॥ १०९ ॥

छादेर्नूमनुमोव्वालडक्कपव्वालसंतुमाः ॥ ११० ॥

छादयतेर्णिजन्तस्य नूम नुम उव्वाल डक्क पव्वाल संतुम इति षडादेशा वा भवन्ति । नूमइ नुमइ ॥ णत्वे णूमइ णुमइ ॥ उव्वालेइ । डक्केइ । पव्वालेइ । संतुमइ ॥ पक्षे छाएइ ॥ ११० ॥

अच्चुक्कवोक्कौ विज्ञापेः ॥ १११ ॥

विज्ञापेर्णिजन्तस्य अच्चुक्क वोक्क इत्यादेशौ वा भवतः । अच्चुक्कइ वोक्कइ ॥ पक्षे विण्णावेइ ॥ १११ ॥

परिवाडो घटेः ॥ ११२ ॥

घटयतेर्णिजन्तस्य परिवाड इत्यादेशो वा भवति । परिवाडेइ ॥ पक्षे घडेइ ॥ ११२ ॥

दृशेर्दावदक्खवदंसाः ॥ ११३ ॥

दर्शयतेर्णिजन्तस्य दाव दक्खव दंस इति त्रय आदेशा वा भवन्ति । दावइ । दक्खवइ । दंसइ ॥ पक्षे दरिसइ ॥ ११३ ॥

प्रस्थापेः पेट्ठवपेड्डवौ ॥ ११४ ॥

प्रस्थापयतेर्णिजन्तस्य पेट्ठव पेड्डव इत्यादेशौ वा भवतः । पेट्ठवइ । पेड्डवइ ॥ पक्षे पट्ठावेइ ॥ ११४ ॥

---

109. Bp KS विलास॰; M वालास° for मीसाल in the Sūtra and Com. KS विलासइ for मीसालइ. T om. पक्षे. KST मिस्सेइ for मीसेइ. 110. T_2 ॰ढक्क॰ for डक्क in the Sūtra. KS T om. पक्षे. BT छअइ for छाएइ. 111. KMS विज्ञतेः for विज्ञापेः in the Sūtra and Com. T अपुक्कपोक्कौ for अच्चुक्कवोक्कौ in the Sūtra, Com. and illustrations. KMST om. पक्षे. B विण्णावेइ;T विण्णवइ for विण्णावेइ. 112. T परिवाढो for परिवाडो in the Sūtra, Com. and illustrations. T om. पक्षे. T घटेइ for घडेइ. 113. T ॰दस्साः in the Sūtra and Com. T om. पक्षे. 114. M पेड्डव॰; T पेण्डव॰ for पेड्डव॰ in the Sūtra,Com.and illustrations. KS पट्ठावइ for पट्ठावेइ.

यापेर्जवः ॥ ११५ ॥

यापयतेर्णिजन्तस्य जव इत्यादेशो वा भवति । जवइ ॥ पक्षे जावेइ ॥ ॥ ११५ ॥

विकोशेः पक्खोडः ॥ ११६ ॥

विकोशयतेर्नामधातोर्णिजन्तस्य पक्खोड इत्यादेशो वा भवति । पक्खोडइ ॥ पक्षे विओसेइ ॥ ११६ ॥

गुण्ठ उध्दूलेः ॥ ११७ ॥

उध्दूल्यतेर्णिजन्तस्य गुण्ठ इत्यादेशो वा भवति । गुण्ठइ ॥ पक्षे उध्दूलेइ ॥ ११७ ॥

तडेराहोडविहोडौ ॥ ११८ ॥

ताडयतेर्णिजन्तस्य आहोड विहोड इत्यादेशौ वा भवतः । आहोडइ । विहोडइ ॥ पक्षे ताडेइ ॥ ११८ ॥

ह्लादेरवअच्छलणिचश्च ॥ ११९ ॥

ह्लादयतेर्णिजन्तस्याणिजन्तस्य च अवअच्छ इत्यादेशो लिद् भवति । अवअच्छइ, ह्लादते ह्लादयति वा ॥ ११९ ॥

निर्मेर्निम्मवनिम्माणौ ॥ १२० ॥

निर् पूर्वस्य मिमीतेर्धातोः निम्मव निम्माण इत्यादेशौ वा भवतः । निम्मवइ । निम्माणइ ॥ 'आदेस्तु' [१·३·५३] इति णत्वे णिम्मवइ । णिम्माणइ ॥ पक्षे णिम्मइ ॥ १२० ॥

---

115. KMST om. पक्षे. T जावइ for जावेइ. 116. T विक्रोशेः for विकोशेः in the Sūtra. T विक्रोशयतेः for विकोशयतेः. KMST om. पक्षे here and also elsewhere promiscuously. The variants are no longer recorded. 117. K गुट्ठइ for गुण्ठइ. K उद्धूलइ; T उद्धूलइ for उद्धूलेइ. 118. T om. पक्षे ताडेइ. 120. S निर्मोः; T निम्मोः for निर्मेः in the Sūtra. T om. णिम्माणइ. KST om. पक्षे णिम्मइ.

आल्लीङोल्लिः ॥ १२१ ॥

आङ्पूर्वस्य लीयतेः अल्लि इत्यादेशो भवति । अल्लिइ । अल्लिअइ ॥ अल्लीणो ॥ १२१ ॥

क्रियः कीणः ॥ १२२ ॥

क्रीणातेः कीण इत्यादेशो भवति । कीणइ ॥ १२२ ॥

केर् च वेः ॥ १२३ ॥

वीत्युपसर्गात्परस्य क्रीणातेः केर् इति भवति । चकारात् कीणश्च ॥ रित्वाद् द्वित्वम् ॥ विक्केइ । विक्कीणइ ॥ १२३ ॥

स्त्यः समः खा ॥ १२४ ॥

स्त्यै ष्टै शब्दसंघातयोः इत्यस्य स्त्यायतेः संपूर्वस्य खा इत्यादेशो भवति । संखाइ । संखाअइ । संखाअं ॥ १२४ ॥

ध्मो धुमोदः ॥ १२५ ॥

ध्मा शब्दाग्निसंयोगयोः इत्यस्य धातोः उदः परस्य धुमा इत्यादेशो भवति । उद्धुमाइ ॥ १२५ ॥

स्थष्ठकुकुरौ ॥ १२६ ॥

उदः परस्य ष्ठा गतिनिवृत्तौ इत्यस्य धातोः ठ कुकुर इत्यादेशौ भवतः । उट्ठइ । उक्कुरइ ॥ १२६ ॥

---

121. T आल्लीङोऽल्ली for the Sūtra. M अल्ली for अल्लिः in the Sūtra and Com. T अल्लां for अल्लि. MT अल्लीइ अल्लीअइ for अल्लिइ अल्लिअइ. B आल्लिणो for अल्लीणो. 122. T क्रीयः for क्रियः in the Sūtra. MS किणः in the Sūtra, Com. and illustrations. 123. T om. the Sūtra and Com.

निरप्पथक्कठाचिट्ठाः ॥ १२७ ॥

स्थ इत्यनुवर्तते। तिष्ठतेः निरप्प थक्क ठा चिट्ठा इति चत्वार आदेशा भवन्ति। निरप्पइ॥ णत्वे णिरप्पइ॥ थक्कइ। ठाइ। चिट्ठाइ। ठाणं। पट्ठाओ। उट्ठाओ। पट्ठाविओ। उट्ठाविओ। चिट्ठिऊण॥ बहुलाधिकारात् थिअं। थाणं। पत्थिओ। उत्थिओ। थाऊण॥ १२७॥

विस्मरः पम्हसवीसरौ ॥ १२८ ॥

विस्मरतेः पम्हस वीसर इत्यादेशौ भवतः। पम्हसइ। वीसरइ॥ पक्षे विम्हइ॥ 'श्मष्म' [१-४-६७] इति स्मस्य म्हत्वे 'अर उः' [२-४-६६] इति ऋवर्णस्य रादेशे च सेत्स्यति॥ १२८॥

कृपौ णिजवहः ॥ १२९ ॥

कृप कृपायामित्यस्य धातोः अवह इत्यादेशो णिजन्तो भवति। अवहावेइ, कृपां करोतीत्यर्थः॥ १२९॥

जाणमुणौ ज्ञः ॥ १३० ॥

ज्ञा अवबोधने इत्यस्य धातोः जाण मुण इत्यादेशौ भवतः। जाणइ। मुणइ॥ बहुलाधिकारात्क्वचिद्विकल्पः। जाणिअं मुणिअं णाअं ज्ञातम्॥ जाणिऊण णाऊण ज्ञात्वा। जाणणं णाणं ज्ञानम्॥ मणइ इति तु मन्यतेरेव। ॥ १३०॥

धो दह श्रदः ॥ १३१ ॥

श्रदित्यव्ययात्परस्य डुधाञ् धारणपोषणयोः इत्यस्य धातोः दह इत्यादेशो भवति। सद्दहइ। सद्दहमाणो जीवो। सद्दहणं होइ सम्मत्तं॥१३१॥

---

127. K °ठक्क°; S °डक्क° for °थक्क in the Sūtra and Com. K तिष्ठतेर्धातोः for तिष्ठतेः. K ठक्कइ; S डंकइ for थक्कइ. KM पट्ठिओ for पट्ठाओ. M उट्ठिओ for उट्ठाओ. 128. S विस्मरः पम्हिरवीसरौ; T विस्मुः पम्हुसवीसरौ for the Sūtra. 129. T अवहवेइ for अवहावेइ. 130. KMST om. मुणिअं.

स्पृशश्छिवालुक्खफरिसफासफंसालिहच्छिहान् ॥ १३२ ॥

स्पृश स्पर्शने इत्ययं स्पृशतिः छिव आलुक्ख फरिस फास फंस आलिह छिह इति सप्तादेशानापद्यते । छिवइ । आलुक्खइ । फरिसइ । फासइ । फंसइ । आलिहइ । छिहइ ॥ १३२ ॥

फक्कस्थक्कः ॥ १३३ ॥

फक्कतेः थक्क इत्यादेशो भवति । थक्कइ ॥ १३३ ॥

श्लाघः सलाहः ॥ १३४ ॥

श्लाघृ कत्थने इत्यस्य धातोः सलाह इत्यादेशो भवति । सलाहइ ॥ १३४ ॥

थिप्पस्तृपः ॥ १३५ ॥

तृप प्रीणने इत्यस्य धातोः थिप्प इत्यादेशो भवति । थिप्पइ ॥ १३५ ॥

भियो भाविहौ ॥ १३६ ॥

ञिभी भये इत्यस्य धातोः भा विह इत्यादेशौ भवतः । भाइ भाअइ । भाइअं ॥ बिहइ । बिहिअं ॥ भीअं इति तु सिद्धावस्थायाम् ॥ १३६ ॥

भुजिरण्णभुञ्जकम्मसमाणचमडचड्डजेमजिमान् ॥ १३७ ॥

भुज पालनाभ्यवहारयोः इत्ययं धातुः अण्ण भुञ्ज कम्म समाण चमड चड्ड जेम जिम इत्यष्टादेशानापद्यते । अण्णइ । भुञ्जइ । कम्मइ । समाणइ । चमडइ । चड्डइ । जेमइ । जिमइ ॥ १३७ ॥

---

132. T आलुंख° for आलुक्ख° in the Sūtra. S °फस्स° for °फंस° in the Sūtra, Com. and illustrations. B om. छिहइ. 133. MS पक्कः for फक्कः in the Sūtra. 134. S सलाघः for सलाहः in the Sūtra. 135. Bp KS छिप्पस्तृपः for the Sūtra. BM इत्यस्माद्धातोः for इत्यस्य धातोः. K छिप्प; S छप्प for थिप्प. K छिप्पइ for थिप्पइ. 137. MST अण्ह° for अण्ण° in the Sūtra, Com. and illustrations.

जृम्भेऽवेर्जम्भा ॥ १३८ ॥

जृभी गात्रविनामे इत्यस्य धातोः जम्भा इत्यादेशो भवति । अवेः वि इत्युपसर्गात्परस्य न भवति । जम्भाइ । जम्भाअइ ॥ अवेरिति किम् । केलिपसरो विअम्भइ ॥ १३८ ॥

जुञ्जजुज्जजुप्पा युजेः ॥ १३९ ॥

युजिर्योगे इत्यस्य धातोः जुञ्ज जुज्ज जुप्प इति त्रय आदेशा भवन्ति । जुञ्जइ । जुज्जइ । जुप्पइ ॥ १३९ ॥

जनो जाजम्मौ ॥ १४० ॥

जनी प्रादुर्भावे इत्यस्य जा जम्म इत्यादेशौ भवतः । जाइ । जाअइ । जम्मइ ॥ १४० ॥

उत्थल उच्चलेः ॥ १४१ ॥

उत्पूर्वस्य चल गतावित्यस्य धातोः उत्थल इत्यादेशो भवति । उत्थल्इ ॥ १४१ ॥

घूर्णेर्घुम्मपहल्लघोलघुलाः ॥ १४२ ॥

घूर्ण भ्रमणे इत्यस्य धातोः घुम्म पहल्ल घोल घुल इति चत्वार आदेशा भवन्ति । घुम्मइ । पहल्लइ । घोलइ । घुलइ ॥ १४२ ॥

लिम्पो लिपः ॥ १४३ ॥

लिपेर्धातोः लिम्प इत्यादेशो भवति । लिम्पइ ॥ १४३ ॥

शदेर्झडपक्खोडौ ॥ १४४ ॥

शद्लृ शातने इत्यस्य झड पक्खोड इत्यादेशौ भवतः । झडइ । पक्खोडइ ॥ १४४ ॥

---

138. KMS जृम्भोऽवेर्जंभा; T जृंभोवेर्जंभा for the Sūtra. KS विर्जंभइ for विअम्भइ. 140. After इत्यस्य S adds धातोः. 141. S उच्छल उच्छलेः for the Sūtra. BKM उत्थलेः for उच्चलेः in the Sūtra. S शल गतौ for चल गतौ. S उच्छलइ for उत्थलइ. 143. S लिम्पो लिपः for the Sūtra. S लिप्पइ for लिम्पइ. 144. S षदेः for शदेः in the Sūtra.

नेः सदेर्मज्जः ॥ १४५ ॥

निपूर्वस्य षद्लृ विशरणगत्यवसादने इत्यस्य मज्ज इत्यादेशो भवति। अत्ता एत्थ णुमज्जइ, श्वश्रूरत्र निषीदति ॥ १४५ ॥

पुच्छः पृच्छेः ॥ १४६ ॥

पृच्छतेः पुच्छ इत्यादेशो भवति । पुच्छइ ॥ १४६ ॥

गण्ठो ग्रन्थेः ॥ १४७ ॥

ग्रन्थेर्गण्ठ इत्यादेशो भवति । गण्ठइ ॥ १४७ ॥

तुवरजअडौ त्वरेः ॥ १४८ ॥

त्वरेः तुवर जअड इत्यादेशौ भवतः । तुवरइ । जअडइ । तुवरन्तो । जअडन्तो ॥ १४८ ॥

अतिङि तुरः ॥ १४९ ॥

त्वरेरित्यनुवर्तते । तिङ्वर्जिते प्रत्यये परतः त्वरेः तुर इत्यादेशो भवति । तुरिओ । तुरन्तो ॥ अतिङीति किम् । तुवरइ ॥ १४९ ॥

तूरः शतृतिङि ॥ १५० ॥

शतृप्रत्यये तिङि च परे त्वरतेः तूर इत्यादेशो भवति । तूरन्तो । तूरइ ॥ १५० ॥

पर्यसः पल्लट्टपल्लोट्टपल्हत्थाः ॥ १५१ ॥

परिपूर्वः असु क्षेपणे इत्ययं धातुः पल्लट्ट पल्लोट्ट पल्हत्थ इति त्रीनादेशानापद्यते । पल्लट्टइ । पल्लोट्टइ । पल्हत्थइ ॥ १५१ ॥

---

145. S शदेः for सदेः in the Sūtra. B om. the Com. on the Sūtra. M अत्था for अत्ता. 147. After गण्ठइ KMS adds गंठी. 148. MT °जअढौ for °जअडौ in the Sūtra, Com. and illustrations. 150. S शतृतिङोः for शतृतिङि in the Sūtra. 151. B पर्यसेः for पर्यसः in the Sūtra. B पलोट्ट for पल्लोट्ट° in the Sūtra. K पर्यसः for परिपूर्वः असु क्षेपणे इत्ययं धातुः. KM om. त्रीन्.

मृद्नातेर्मलपरिहट्टखुड्डपन्नाडचड्डमड्डमडाः ॥ १५२ ॥

मृद्नातेः मल परिहट्ट खुड्ड पन्नाड चड्ड मड्ड मड इति सप्तादेशा भवन्ति। मलइ। परिहट्टइ। खुड्डइ। पन्नाडइ। चड्डइ। मड्डइ। मडइ ॥ १५२ ॥

दृशिरोअक्खणिअच्छावअच्छचज्जावअज्झपुलअपुलोअदेक्खावअक्ख-पेच्छावआसपासणिअसच्चवावक्खान् ॥ १५३ ॥

दृशिर् प्रेक्षणे इत्ययं धातुः ओअक्ख णिअच्छ अवअच्छ चज्ज अवअज्झ पुलअ पुलोअ देक्ख अवअक्ख पेच्छ अवआस पास णिअ सच्चव अवक्ख इति पञ्चदशादेशानापद्यते। ओअक्खइ। णिअच्छइ। अवअच्छइ। चज्जइ। अवज्झइ। पुलअइ। पुलोअइ। देक्खइ। अवअक्खइ। पेच्छइ। अवआसइ। पासइ। णिअइ। सच्चवइ। अवअक्खइ। णिज्झअइ इति तु निपूर्वस्य ध्यायतेर्दर्शनार्थस्य ॥१५३॥

झरपज्झरपच्चड्डखिरणिड्डुअणिव्वलाः क्षरेः ॥ १५४ ॥

क्षरतेः झर पज्झर पच्चड्ड खिर णिड्डुअ णिव्वल इति षडादेशा भवन्ति। झरइ। पज्झरइ। पच्चड्डइ। खिरइ। णिड्डुअइ। णिव्वलइ ॥१५४॥

कासेरवाद्वासः ॥ १५५ ॥

अवात्परस्य कासेः वास इत्यादेशो भवति। ओवासइ ॥ १५५ ॥

न्यसेर्णिमणुमौ ॥ १५६ ॥

अस्यतेर्निपूर्वस्य णिम णुम इत्यादेशौ भवतः। णिमइ। णुमइ ॥१५६॥

---

152. S om. the Sūtra. KT °खुट्ट° for °खुड्ड° in the Sūtra. T खुट्ट खुट्टइ for खुड्ड खुड्डइ. M मडइ for मडइ. 153. T दृश प्रेक्षणे for दृशिर प्रेक्षणे. K अवअज्झइ for अवअच्छइ 154. T °पच्छड्ड° for °पच्चड्ड° in the Sūtra, Com. and illustrations. K °णिद्दुअ° for °णिड्डुअ° in the Sūtra and Com. M °णीदुअ° for °णिड्डुअ° in the Sūtra. M णिद्दुअइ for णिड्डुअइ. 155. T कासेः for कासेः in the Sūtra, and Com. 156. MST न्यसो for न्यसेः in the Sūtra.

ग्रहेर्णिरुवारगेण्हबलहरपग्गाहिपच्चुआः ॥ १५७ ॥

ग्रह उपादाने इत्यस्य धातोः णिरुवार गेण्ह बल हर पग्ग अहिपच्चुअ इति षडादेशा भवन्ति। णिरुवारइ। गेण्हइ। बलइ। हरइ। पग्गइ। अहिपच्चुअइ ॥१५७॥

॥ इति श्रीमदर्हनन्दित्रैविद्यदेवश्रुतधरश्रीपादप्रसादासादितसर्वविद्याप्रभाव-

श्रीमत्त्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ

द्वितीयाध्यायस्य चतुर्थः पादः ॥

द्वितीयोऽध्यायः समाप्तः ॥

---

157. T °पह° for °पग्ग° in the Sūtra, Com. and illustrations. M अहिवच्चअइ for अहिपच्चुअइ. Colophon : KST om. from °मदर्ह down to श्रीमत्. S °व्याकरणे वृत्तौ. T द्वितीयस्याध्यायस्य.

तृतीयोऽध्यायः ॥

प्रथमः पादः ॥

होहुवहवा भुवेस्तु ॥ १ ॥

भुवेर्धातोः हो हुव हव इति त्रय आदेशा भवन्ति तु । होइ । होन्ति । हुवइ हुवन्ति । हवइ हवन्ति ॥ पक्षे भवइ ॥ परिहीणविहवो भविउं पभवइ ॥ परिभवइ । संभवइ ॥ क्वचिदन्यदपि । उभअहुत्तं ॥ १ ॥

पृथक्स्पष्टे णिव्वडः ॥ २ ॥

भुवेरित्यनुवर्तते । पृथग्भूते स्पष्टे च कर्तरि भुवेः णिव्वड इत्यादेशो भवति । णिव्वडइ, पृथक् स्पष्टो वा भवतीत्यर्थः ॥ २ ॥

प्रभौ हुप्पः ॥ ३ ॥

त्वित्यनुवर्तते । प्रभुकर्तृकस्य भुवो हुप्प इत्यादेशो भवति तु ॥ अङ्गे वि न पहुप्पइ ॥ पक्षे । पहवइ प्रभवति ॥ ३ ॥

हु क्ते ॥ ४ ॥

भुवः क्तप्रत्यये परे हु इत्यादेशो भवति । हुअं ॥ ४ ॥

हुरचिति ॥ ५ ॥

चिद्वर्जिते प्रत्यये परे हु इत्यादेशो रिद् भवति तु । हुन्ति । होन्ति । हुओ ॥ अचितीति किम् । होइ ॥ ५ ॥

---

1. S होहुवहावा for होहुवहवा in the Sūtra. K भवेस्तु. M भवेः for भुवेस्तु in the Sūtra. KM भवेः for भुवेः. BT हरिहीणविभवो for परिहीणविहवो. B परभइ; S पहवइ; MT वहइ for पभवइ. B उभइ M उब्भवअइ; T उब्भुअइ for उभअ. S हुतं; T हंतं for हुत्तं. 2. T णिर्बन्धः for णिव्वडः in the Sūtra, Com. and illustrations. K णिव्वडइ for णिव्वडइ. 3. BT अंगे वि अ न for अङ्गे वि न. 4. M हूक्ते; T हूर्तेः for the Sūtra. M हूअं; S हुति for हुअं. 5. S om. the Sūtra and Com. upto हुओ. T om रिद्. T om. हुओ.

आघ्राक्षिस्नामाइग्घणिज्झराब्बुत्ताः ॥ ६ ॥

आजिघ्रतिक्षयतिस्नातीनां धातूनाम् आइग्घ णिज्झर अब्बुत्त इत्यादेशा यथासंख्यं भवन्ति तु । आइग्घइ आजिघ्रति । णिज्झरइ क्षयति । अब्बुत्तइ स्नाति ॥ पक्षे । अग्घाइ । खअइ । ण्हाइ ॥ ६ ॥

रा वेर्लियः ॥ ७ ॥

लीङ् श्लेषणे इत्यस्य धातोः वि इत्युपसर्गात्परस्य रा इत्यादेशो भवति तु । विराइ । विराअइ । विलिज्जइ ॥ ७ ॥

निना ल्हिक्कणिलुक्कणिलिअलिक्कलुक्कणिरुग्घाः ॥ ८ ॥

लिय इत्यनुवर्तते । नि इत्युपसर्गेण सह लीयतेः ल्हिक्क णिलुक्क णिलिअ लिक्क लुक्क णिरग्घ इति षडादेशा भवन्ति तु । ल्हिक्कइ । णिलुक्कइ । णिलिअइ । लिक्कइ । लुक्कइ । णिरुग्घइ ॥ पक्षे । णिलिज्जइ ॥ ८ ॥

सारः प्रहुः ॥ ९ ॥

प्रहरतेः सार इत्यादेशो भवति तु । सारइ ॥ पक्षे । पहरइ ॥ ९ ॥

प्रसुरुवेल्लवअल्लौ ॥ १० ॥

प्रसरतेः उवेल्ल वअल्ल इत्यादेशौ भवतः । उवेल्लइ । वअल्लइ । पसरइ ॥ १० ॥

महमहो गन्धे ॥ ११ ॥

प्रसरतेर्गन्धविषये महमह इत्यादेशो भवति तु । महमहइ मालईगन्धो ॥ गन्ध इति किम् । पसरइ ॥ ११ ॥

---

6. M °जि° for °क्षि° in the Sūtra. MT °अब्भुत्ताः in the Sūtra and Com. S °अब्भंताः in the Sūtra and Com. M °जयति°; T °क्षियति° for °क्षयति°. M झिज्जइ जयति; T क्षियति for क्षयति. M om. पक्षे here and elsewhere and hence the omission is not recorded hereafter. S अब्भंतइ for अब्बुत्तइ. 7. M लीयः for लियः in the Sūtra. 8. M °णिलीअ°; T °णिलीय° in the Sūtra and Com. MT °णिरग्घाः for णिरुग्घाः in the Sūtra, Com. and illustrations. 9. M वर्तते for अनुवर्तते. 10. S अवेल्ल° for उवेल्ल° in the Sūtra. T उव्वेलपअल्लौ in the Sūtra, Com. and illustrations. 11. T माडईगंधो for मालईगन्धो. After °गन्धो M add S पक्षे पसरइ गंधो.

झरझूरसुमरविम्हरहरहललुढपअरपम्हुहाः स्मरतेः ॥ १२ ॥

स्मरतेः झर झूर सुमर विम्हर हर हल लुढ पअर पम्हुह इति नवादेशाः भवन्ति तु । झरइ । झूरइ । सुमरइ । विम्हरइ । हरइ । हलइ । लुढइ । पअरइ । पम्हुहइ ॥ पक्षे । सरइ ॥ १२ ॥

व्याप्रेराअड्डः ॥ १३ ॥

व्याप्रियतेः आअड्ड इत्यादेशो भवति तु ॥ आअड्डइ । वावरइ ॥ १३ ॥

निस्सुर्णिहरनिलदाढवरहाढाः ॥ १४ ॥

निःसरतेः निहर निल दाढ वरहाढ इति चत्वार आदेशा भवन्ति तु । निहरइ । निलइ । दाढइ । वरहाढइ । नीसरइ ॥ १४ ॥

जाग्रेर्जग्गः ॥ १५ ॥

जागृ निद्राक्षये इत्यस्य धातोः जग्ग इत्यादेशो भवति तु । जग्गइ । जागरइ ॥ १५ ॥

पट्टघोट्टडल्लपिज्जाः पिबेः ॥ १६ ॥

पिब इति विहितादेशस्य पा पाने इत्यस्य धातोः पट्ट घोट्ट डल्ल पिज्ज इत्यादेशाश्चत्वारो भवन्ति तु । पट्टइ । घोट्टइ । डल्लइ । पिज्जइ ॥ पक्षे । पिबइ ॥ १६ ॥

---

12. Bp S •जूर• for °झूर• in the Sūtra, Com. and illustrations. KM •लढ° for °लुढ° in the Sūtra, Com. and illustrations. S •पम्हहाः for •पम्हुहाः in the Sūtra. M विस्मरतेः for स्मरतेः in the Sūtra. 13. MT आअड्ढ ; S आअंडः in the Sūtra, Com. and illustrations. KS वावारइ; M वारइ for वावरइ. 14. M नीहरनील° in the Sūtra, and Com. T •धाढ• for •दाढ° in the Sūtra, Com. and illustrations. S वरहाडाः in the Sūtra. K नीहरइ for णिहरइ. 15. K जागृतेर्जग्गः for the Sūtra. Mss. om. तु in Com. promiscuously and hence not noted henceforward. 16. KM इति चत्वार आदेशा भवन्ति. T पीवइ for पिवइ.

धुवो धूञः ॥ १७ ॥

धूञ् कम्पने इत्यस्य धातोः धुव इत्यादेशो भवति तु। धुवइ। धुणइ ॥ १७ ॥

हणः शृणोतेः ॥ १८ ॥

श्रु श्रवणे इत्यादेशो भवति तु। हणइ। सुणइ ॥ १८ ॥

म्लैर्वापव्वाऔ ॥ १९ ॥

म्लै गात्रविनामे इत्ययं धातुः वा पव्वाअ इत्यादेशावापद्यते तु। वाइ। पव्वाअइ। मिलाइ ॥ १९ ॥

कृञः कुणः ॥ २० ॥

डुकृञ् करणे इत्यस्य धातोः कुण इत्यादेशो भवति तु। कुणइ। करइ ॥ २० ॥

काणेक्षिते णिआरः ॥ २१ ॥

कृञ इत्यनुवर्तते। कृञः काणेक्षितविषये णिआर इत्यादेशो भवति तु। णिआरइ, काणेक्षितं करोतीत्यर्थः ॥ २१ ॥

निष्टम्भे णिट्ठुहः ॥ २२ ॥

निष्टम्भविषयस्य कृञः णिट्ठुह इत्यादेशो भवति तु। णिट्ठुइ, निष्टम्भं करोतीत्यर्थः ॥ २२ ॥

श्रमे वापम्फः ॥ २३ ॥

श्रमविषयस्य कृञः वापम्फ इत्यादेशो भवति तु। वापम्फइ, श्रमं करोति ॥ २३ ॥

---

17. S धुवो धूङः for the Sūtra. धूङ् कम्पने for धूञ् कम्पने. 18. T हुणः for हणः in the Sūtra, Com. and illustrations. 19. T मम्लैर्वापम्वायौ for the Sūtra. K °पब्बाऔ in the Sūtra. T उप्पाअइ for पव्वाअइ. 20. S कृङः कुणः for the Sūtra. 21. T काणेक्षिके for °क्षिते in the Sūtra and Com. Bp णिअरः; S णाआरः for णिआरः in the Sūtra. S कृङ् for कृञ्. KM °विषयस्य for °विषये. 23. T वावंफः for वापम्फः in the Sūtra, Com. and illustrations.

संदाणोऽवष्टम्भे ॥ २४ ॥

अवष्टम्भविषयस्य कृञः संदाण इत्यादेशो भवति तु। संदाणइ, अवष्टम्भं करोति ॥ २४ ॥

णिव्वोलो मन्युनौष्ठमालिन्ये ॥ २५ ॥

मन्युना करणेन यदोष्ठमालिन्यं तद्विषये कृञो णिव्वोल इत्यादेशो भवति। णिव्वोलइ, मन्युना ओष्ठं मलिनं करोति ॥ २५ ॥

गुललश्चाटौ ॥ २६ ॥

चाटुविषयस्य कृञो गुलल इत्यादेशो भवति। गुललइ, चाटु करोतीत्यर्थः ॥ २६ ॥

पअल्लो लम्बनशैथिल्ययोः ॥ २७ ॥

लम्बनशैथिल्यविषयस्य कृञः पअल्ल इत्यादेशो भवति। पअल्लइ, लम्बयति शैथिल्यं करोति वा ॥ २७ ॥

क्षुरे कम्मः ॥ २८ ॥

क्षुरविषयस्य कृञः कम्म इत्यादेशो भवति तु। कम्मइ, क्षुरं करोति ॥ २८ ॥

णिलुञ्छो निष्पाताच्छोटे ॥ २९ ॥

निष्पतनविषयस्य आच्छोटनविषयस्य च कृञः णिलुञ्छ इत्यादेशो भवति तु ॥ णिलुञ्छइ, निष्पतति आच्छोटयति वा ॥ २९ ॥

---

24. B सद्दाणो for संदाणो in the Sūtra, Com. and illustrations. 25. KM णिव्बोलो for णिव्वोलो in the Sūtra, Com. and illustrations. After °मालिन्यं B adds करोति. 26. T गुग्लः for गुललः in the Sūtra. T गुल्लइ for गुललइ. 27. M लंब° for लम्बन° in the Sūtra. M om. from पअल्लइ down to the end of Com. 28. M om. the Sūtra and Com. upto तु. M करोतीत्यर्थः for करोति. 29. B णिलुञ्छो in the Sūtra, Com. and illustrations. K निष्पातविषयस्य for निष्पतनविषयस्य. K आच्छोटविषयस्य for आच्छोटन°. K om. च.

साहट्टसाहरौ संवुः ॥ ३० ॥

संपूर्वस्य वृणोतेः साहट्ट साहर इत्यादेशौ तु भवतः । साहट्टइ । साहरइ । संवरइ ॥ ३० ॥

ओहिरोग्घौ निद्रः ॥ ३१ ॥

निपूर्वस्य द्रै स्वप्ने इत्यस्य धातोः ओहिर उग्घ इत्यादेशौ तु भवतः । ओहिरइ । उग्घइ । णिद्दाइ ॥ ३१ ॥

उद्व ओरुम्मावसुऔ ॥ ३२ ॥

उत्पूर्वस्य वा गतिगन्धनयोः इत्यस्य धातोः ओरुम्मा वसुआ इत्यादेशौ तु भवतः । ओरुम्माइ । वसुआइ । उव्वाइ ॥ ३२ ॥

रुवो रुञ्जरुण्टौ ॥ ३३ ॥

रु शब्दे इत्येतस्य रौतेर्धातोः रुञ्ज रुण्ट इत्यादेशौ तु भवतः । रुञ्जइ । रुण्टइ । रुवइ ॥ ३३ ॥

कोक्कवोक्कौ व्याहृः ॥ ३४ ॥

व्याहरतेः कोक्क वोक्क इत्यादेशौ तु भवतः । कोक्कइ । वोक्कइ । वाहरइ ॥ ३४ ॥

संनाम आदृङः ॥ ३५ ॥

आद्रियतेः संनाम इत्यादेशो भवति तु । संनामइ आदरइ ॥ ३५ ॥

ओहरौसरावपवतरेस्तु ॥ ३६ ॥

अवपूर्वस्य तॄ प्लवनतरणयोः इत्यस्य धातोः ओहर ओसर इत्यादेशौ तु भवतः । ओहरइ । ओसरइ ॥ त्वधिकारे पुनस्तुग्रहणमधिकारस्यानुस्मरणार्थम् ॥ ३६ ॥

---

31. T ओहीरोग्घौ for ओहिरोग्घौ in the Sūtra. T ओहीर for ओहिर. T ओहीरइ for ओहिरइ. 32. B °वसऔ; KMS °वसूआ for °वसुऔ in the Sūtra. 34. °पोक्कौ for °वोक्कौ in the Sūtra, Com. and illustrations. 36. M ओह° for ओहर° in the Sūtra, Com. and illustrations. M त्विकरणे for त्वधिकारे. Bp °कर्षणार्थं for °नुस्मरणार्थम्.

शकेस्तरतीरपारचआः ॥ ३७ ॥

शक्लृ शक्तौ इत्यस्य धातोः तर तीर पार चअ इति चत्वार आदेशा भवन्ति तु । तरइ । तीरइ । पारइ । चअइ ॥ पक्षे सक्कइ ॥ तरतेरपि तरइ ॥ तीर पार कर्मसमासौ इत्यनयोरपि । तीरइ । पारइ ॥ त्यजेरपि । चअइ ॥३७॥

सोल्लपउल्लौ पचेः ॥ ३८ ॥

डुपचष् पाके इत्यस्य धातोः सोल्ल पउल्ल इत्यादेशौ तु भवतः । सोल्लइ । पउल्लइ । पअइ ॥ ३८ ॥

वेअडः खचेः ॥ ३९ ॥

खचतेर्वेअड इत्यादेशो भवति तु । वेअडइ । खअइ ॥ ३९ ॥

णिव्वलो मुचेर्दुःखे ॥ ४० ॥

दुःखविषयस्य मुच्लृ मोक्षणे इत्यस्य धातोः णिव्वल इत्यादेशो भवति तु । णिव्वलइ, दुःखं मुञ्चतीत्यर्थः ॥ ४० ॥

अवहेडमेल्लणिल्लुञ्छोसिकदिसडरेअवछण्डाः ॥ ४१ ॥

